॥ श्रीजिनाय नमः ॥

# ॥ श्रीसमरादित्यचरित्रं भाग १. ॥

( कर्त्ता— -श्रीमतिवर्धनगणी )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

वीरसंवत्—२४४२. विक्रमसंवत—१९७२. सने—१९१५.

किं. रु.-७-८-०

☞ श्रीजैनभास्करोदय प्रेस. जामनगर. ☜

श्री मोहनलाल जैन ज्ञान भं. गोपीपुरा, सुरत

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

## ॥ अथ श्रीसमरादित्यचरित्रं प्रारभ्यते ॥

( प्रथमो भागः )

( कर्ता—श्रीमतिवर्धनगणी )

श्री मोहनलालजी
जैन ज्ञान भंडार
गोपीपुरा, सुरत.

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. ( जामनगरवाळा )

श्रीमंतं परमात्मतापदमितं त्रैलोक्यपूज्यं परं । नाभेयादिसमस्ततीर्थपगणं सिद्धांश्च सिद्ध्याश्रितान् ॥ आचार्यान् गणिपुंडरीकप्रभृतीन् पूज्यानुपाध्यायकान् । साधून् दर्शनबोधचारुचरितान् द्वेधा तपःसंयुतान् ॥ १ ॥ सद्ज्ञानामृतवारिधीन् गुणगुरून् श्रीसद्गुरून् भक्तितो । नत्वा विघ्नविनाशनाय मनसि स्मृत्वा च वाग्देवतां ॥ सद्वैराग्यविधायकं सुमनसामादेयमत्यादरात् । कुर्वे चारु चरित्रमार्यसमरादित्यस्य भूमिपतेः ॥ २ ॥ युग्मं ॥ श्रीहरिभद्रमुनींद्रै—र्विहितं प्राकृतमयं समस्तीह ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समरादित्यचरित्रं । तथापि तदतीवविषमार्थं ॥ ३ ॥ आधुनिकमंदबुद्धिक—सत्वपरिज्ञानहेतवे तस्मात ॥ सफलोऽस्तु मे प्रयासः । प्रसादतः सार्वसुगुरूणां ॥ ४ ॥ उपनयतु मंगलं वो । जिनस्य मुखरालिवृंदसंमीलिता ॥ तीर्थप्रवर्तनसमये । देवविमुक्ता कुसुमवृष्टिः ॥ ५ ॥ इति मंगलाचरणं. ॥ अथोपदेशः—भो भव्याः! यूयं श्रोतुं योग्यानि शृणुत? प्रशंसनीयानि वस्तूनि प्रशंसत? आचरितुं योग्यानि कार्याण्याचरत? परिहर्तुं योग्यानि कार्याणि परिहरत? तत्र श्रोतव्यानि नरसुरशिवसुखोत्पादकान्यर्थसाराणि सर्वज्ञवचनानि, येषां यशस्त्रिभुवने विस्तृतमस्ति तान्येव जिनवचनानि पंडितलोकानां प्रशंसनीयानि, तत्रैव भणितानि सम्यक्त्वज्ञानचारित्राणि स्पृहणीयानि च, तथैवाचरणीयानि निश्चारहितेन दारिद्र्यविनाशकानि चिंतामणिरत्नतुल्यानि सम्यक्त्वज्ञानचारित्राणि, तथा परिहर्तव्यानि कुगतिवासस्य हेतुभूतानि मिथ्यात्वादीनि लोकविरुद्धकार्याणि च. अत्र पुनः श्रोतव्ये तावदधिकारः प्रस्तुतः, एष च सर्वज्ञभाषितानि श्रोतव्यानीति भणितं, वक्ष्ये तत्प्रतिबद्धां । भव्यजनानंदकारिणीं परमां ॥ संक्षेपतो महार्थां । चरितकथां तां निशामयत ॥ १ ॥ तत्र च त्रिविधं कथावस्त्विति पूर्वाचार्यप्रवादः, तद्यथा—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दिव्यं १ दिव्यमानुषं २ मानुषं च ३, तत्र दिव्यं नाम यत्र केवलमेव देवचरितं वर्ण्यते, दिव्यमानुषं पुनर्यत्र द्वयोरपि देवमानुषयोश्चरितं वर्ण्यते, मानुषं तु यत्र केवलं मनुष्यचरितं वर्ण्यत इति. अत्र सामान्यतश्चतस्रः कथा भवंति, तद्यथा—अर्थकथा १ कामकथा २ धर्मकथा ३ संकीर्णकथा च ४, तत्रार्थकथा नाम या द्रव्योपार्जनोपायैः संबद्धासिमषीकृषिवाणिज्यशिल्पादिविचित्रमहोपायसंप्रयुक्ता तादृशपदार्थविरचिता सार्थकथेति भण्यते. १. या पुनः कामोपायविषया चित्तव्यामोहककलादाक्षिण्यव्यासानुरागपुलकितप्रतिपत्तियोगसारा दूतीव्यापारव्यंगिताभिप्रायानुवर्तनादिपदार्थमिलिता सा कामकथेत्युच्यते. २. या पुनर्धर्मोपायगोचरा क्षमामार्दवार्जवनिर्लोभतातपःसंयमसत्यशौचाकिंचन्यब्रह्मचर्यप्रधानाऽणुव्रतदिग्देशविरत्यनर्थदंडविरतिसामायिकपौषधोपवासोपभोगपरिभोगातिथिसंविभागयुक्तानुकंपाकामनिर्जरादिपदार्थसंप्रयुक्ता सा धर्मकथेति निगद्यते. ३. या पुनर्धर्मार्थकामाख्यत्रिवर्गोपायैः संबद्धा सर्वकथाग्रंथार्थविरचिता लोकवेदसमयप्रसिद्धा दृष्टांतहेतुकारणैर्युक्ता सा संकीर्णकथेत्युच्यते. ४. एतासां च कथानां त्रिविधाः श्रोतारो भवंति, यथा–अधमा मध्यमा उत्तमा इति, तत्र ये क्रोधमानमायालोभसमाक्रांतमतयः परलोकदर्शनपराङ्मुखा इहलोकपरमार्थ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दर्शिनो जीवेषु निर्दयास्ते, तथाविधास्तामसा अधमपुरुषा दुर्गतिप्रापणोद्यतायां सुगतिप्रतिपक्षभूतायां परमार्थतोऽनर्थबहुलायामर्थकथायामासक्ता भवंति. १. ये पुनः शब्दादिविषयविषमोहितमनसो भावदेषींद्रियानुकूलवर्तिनोऽभावितपरमार्थमार्गा इदं सुंदरमिदं सुंदरतरमिति सुंदरासुंदरेष्वनिश्चितमतयस्ते राजसा मध्यमपुरुषाः पंडितजनोपहसनीयायां विडंबनामात्रप्रतिबद्धायामिहभवे परभवे च दुःखसंवर्धिकायां कामकथायामासक्ता भवंति. २. ये पुनरीषत्सुंदरतरा उभयोर्लोकयोः सापेक्षा व्यवहारनयमतेन निपुणाः परमार्थतः सारविज्ञानरहिताः क्षुद्रभोगेष्वबहुमानिन उदारभोगानां विशिष्टतृष्णारहितास्ते किंचित्सात्विका मध्यमपुरुषा एवाध्यवसायभेदतः सुगतिदुर्गतिवर्तिन्यां जीवलोकस्वभावविलासायां शृंगारादिसकलरससारसंमीलितायां विविधभावोत्पत्तिकारणभूतायां संकीर्णकथायामासक्ता भवंति. ३.

ये पुनर्जन्मजरामरणजनितवैराग्या जन्मांतरेऽपि कुशलभावितमतयः कामभोगेभ्यो विरक्ताः पापलेपतो मुक्तप्राया विज्ञातपरमपदस्वरूपाः सिद्धिसंपत्तेर्निकटवर्तिनस्ते सात्विका उत्तमपुरुषाः स्वर्गनिर्वाणसमारोहणवर्तिन्यां बहुजनप्रशंसनीयायां सकलकथासुंदरायां महापुरुषसेवितायां धर्मकथा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यामेवासक्ता भवंति. ४. ततः कारणादहमपीदानीं दिव्यमानुषवस्तुगतां धर्मकथामेव कीर्तयिष्यामि. उक्तं च धर्मशास्त्रकारैः—धम्मेण कुलपसूई । धम्मेण य दिव्वरूवसंपत्ती ॥ धम्मेण धणसमिद्धी । धम्मेण सुवित्थरा कित्ती ॥ १ ॥ धम्मो मंगलमउलं । ओसहमउलं च सव्वदुक्खाणं ॥ धम्मो बल-मतिविउलं । धम्मो ताणं च सरणं च ॥ २ ॥ किं जंपिएण बहुणा । जं जं दीसइ सम्मत्तजिय-लोए ॥ इंदियमणाभिरामं । तं तं धम्मप्फलं सव्वं ॥ ३ ॥ जीयंमि मरणकाले । मोत्तूणं दुक्खसंवि-ढत्तंपि ॥ अन्नं देहं सयणं । धम्मोच्चिय होइ सुसहाओ ॥ ४ ॥ पावेइ य सुरलोयं । तत्तोवि सु-माणुसत्तणं धम्मो ॥ तत्तो दुक्खविमोक्खं । सासयसुक्खं लहुं मोक्खं ॥ ५ ॥ इत्यादि. ॥ यः प्राणी मध्यस्थः कुशलश्च तं धर्मं जानन् करोति स सर्वज्ञोक्ता धार्मिकाः कथा जानाति शृणोति च, त-स्मात्कारणात्प्रथमं धर्मगुणमाश्रित्याराधकविराधकयोर्गुणदोषप्रादुर्भावकं भवपूर्वभवनिबद्धं भव्यजंतू-नां संवेगकरं समरादित्यनाम्नोऽवंतिदेशराजस्य चरितं वक्ष्यामि, भो भो भव्याः! यूयं शृणुत? अ-त्र च द्वयोरपि बहवो भवाः संति, परं ते सर्वे नोपयोगिनः, केवलं नवसु भवेषु परस्परं योगो जा-तस्तत इयं संख्या भणिता.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यथा तेनैव भगवता गिरिसेनकृतोपसर्गसहनपर्यंते संजातकेवलज्ञानेन वेलंधरसुरस्य मुनि-
चंद्रस्य च राज्ञो नर्मदाप्रमुखराज्ञीनां च तच्चरितं शिष्टं, तथा तच्चरितं प्रकटार्थं संक्षेपेणाहमपि वक्ष्ये.
अत्र श्रीहरिभद्रसूरिभिः पूर्वाचार्यभणिता एतच्चरित्रसंग्रहणीगाथा लिखिताः संति, ताश्चेमाः—गु-
णसेणअग्गिसम्मा १ । सीहाणंदा य तह पियापुत्ता २ ॥ सिहिजालिणिमाइसुया ३ । धणधण-
सिरिमो य पइभज्जा ४ ॥ १ ॥ जयविजया य सहोयर ५ । धरणो लच्छी य तह पइभज्जा ६ ॥
सेणविसेणा पित्तिय । उत्ता जम्मंमि सत्तमए ७ ॥ २ ॥ गुणचंदवाणमंतर ८ । समराइच्च गिरिसे-
णपाणो उ ९ ॥ एकस्स तओ मोक्खो—णंतो बितीयस्स संसारो ॥ ३ नगराइ खित्तिपइठं १ ।
जयउर २ कोसंबि ३ सुसमनयरं च ४ ॥ कालंदी ५ मायंदी ६ । चंपा ७ उज्झाय ८ उज्जेणी ९
॥ ४ ॥ गुणसेणस्सुववाओ । सोहम्मसणंकुमारबंभेसु ॥ सुक्काणयारणेसु । गेविज्जाणुत्तरेसु च ॥
॥ ५ ॥ इयरस्सुववाओ पुण । विज्जुकुमारेसु होइ नायव्वो ॥ सेसो अणंतरो उण । रयणाइसु
अहक्कमसो ॥ ६ ॥ सागरमेगं पंच य । नवपणरसे य तह य अठ्ठारा ॥ वीसं तीसं तित्तीस—मे-
व पढमस्स देवेसुं ॥ ७ ॥ देवेसु सढ्ढपलियं । सागरतियसत्तदस य सत्तरस ॥ बावीसं तेत्तीसं ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बितीयस्स ठिई उ नरएसुं ॥ ८ ॥ एवमेताश्चरितसंग्रहणीगाथाः. सांप्रतमेतासामेव गुरूपदेशानुसारेण विस्तरेण जावार्थः कथ्यते—

इहैव जंबूद्वीपाख्ये । द्वीपेऽपरविदेहके ॥ क्षेत्रे प्रोत्तुंगधवल— प्राकारपरिमंडितं ॥ १ ॥ नलिनीवनसंछन्न—परिखापरिवेष्टितं ॥ सुविजक्तत्रिकाद्यध्व—श्रेणिजिः शोभितं सदा ॥ २ ॥ जवनैर्जितदेवेंद्र—जवनद्यायमुज्ज्वलं ॥ क्षितिप्रतिष्टितं नाम । समस्ति नगरं महत् ॥ ३ ॥ त्रिजिर्विशेषकं ॥ यत्र नार्यो मुखैः पद्मं । कोकिलां जल्पितेन च ॥ जयंति कमलं नेत्रै—र्गतिजिः कलहंसकान् ॥ ४ ॥ यत्र च व्यसनं पुंसां । विद्यासु यशसि स्पृहा ॥ सदा पापेषु जीरुत्वं । धर्मे चैव धनस्य धीः ॥ ५ ॥ तत्र जूपोऽस्ति संपूर्ण—मंडलस्त्वमृगांकितः ॥ पूर्णचंद्र इति ख्यातो । जनतानंददायकः ॥ ६ ॥ तस्यास्त्यंतःपुरे मुख्या । देवी कुमुदिनी सती ॥ कामस्य रतिरिवेष्टा । सद्भोगसुखवर्धिनी ॥ ७ ॥ गुणसेनः कुमारोऽस्ति । तयोः पुत्रो महागुणी ॥ नवरं बालजावेन । नित्यं केलिप्रियः किल ॥ ८ ॥ तस्मिन्नेव पुरे धर्म—शास्त्रसंदोहपाठकः ॥ कुशलो लौकिकाचारे—ष्वल्पारंजपरिग्रही ॥ ए ॥ सर्वलोके बहुमान्यो । यज्ञदत्तः पुरोहितः ॥ तस्य पुत्रः सोमदेवा—ग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भोद्भूतोऽग्निशर्मकः ॥ १० ॥ स च कीदृशः ?—बृहत्त्रिकोणोत्तमांगो । वृत्तपिंगललोचनः ॥ स्थानमात्रोपलक्ष्यन्य—ग्नवचिर्पटनासिकः ॥ ११ ॥ बिलमात्रकर्णछिद्रो । विकृताधरदंतयुक् ॥ दीर्घग्रीवो लघुभुजः । संकुचितभुजांतरः ॥ १२ ॥ वक्रलंबोदरश्चैक—पार्श्वोन्नतकटीतटः ॥ अतिबिभित्सको लोके । भृकुटीभीषणाननः ॥ १३ ॥ विषमप्रतिष्ठितोरु—द्वंद्वोऽतिस्थूलकठिनदुर्जंघः ॥ विषमावस्थितचरणो । वह्निशिखाजालपिंगकचः ॥ १४ ॥ चतुर्भिः कलापकं ॥ तं चाग्निशर्मनामानं । द्विजपुत्रं कुमारकः ॥ गुणसेनाभिधो नित्यं । विडंबयति कौतुकात् ॥ १५ ॥ कथमित्याह—वाद्यैर्मृदंगकंसाल—पटहाद्यैः प्रवादितैः ॥ नर्तयति पुरीमध्ये । सह हस्ततलं हसन् ॥ १६ ॥ आरोप्य रासभे हृष्ट—बालवृंदवृतं पुनः ॥ सूर्पखंडमयछत्रं । वाद्यमानाग्रडिंडिमं ॥ १७ ॥ आरोपितमहाराज—शब्दं च बहुशोऽपि तं ॥ त्वरितं त्वरितं राज—मार्गे हिंडयति स्वयं ॥ १८ ॥ त्रिभिर्विशेषकं ॥ एवं प्रतिदिनं चैव । कृतांतेनेव तेन च ॥ तस्य कदर्थ्यमानस्य । जाता वैराग्यभावना ॥ १९ ॥ तदानेन यच्चिंतितं तदाह—

बहुजणधिक्कारहयाणं । हसणिज्जा य सव्वलोयस्स ॥ पुव्विं अकयसुपुण्णा । सहंति परपरिभवं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुरिसा ॥ २० ॥ जइ ता न कज्ज धम्मो । सप्पुरिसनिसेविज्ज अहन्नेणं ॥ जम्मंतरम्मि धणियं । सुहावहो मूढहियएण ॥ २१ ॥ एण्हिंपि फलविवागं । ज्जग्गं दट्ठूणमकयपुन्नाणं ॥ परलोयं बंधुत्तू-यं । करेमि मुणिसेवियं धम्मं ॥ २२ ॥ जम्मंतरेवि जेणं । पावेमि न ईरिसं महाभीमं ॥ सयल-जणहसणिज्जं । विडंबणं हुज्ज न जणाउ ॥ २३ ॥ एवं विचिंत्य संप्राप्त—वैराग्यो निर्गतः पुरात ॥ प्राप्तश्च मासमात्रेण । कालेन स तपोवनं ॥ २४ ॥ तत्कुत्र संस्थितं कीदृशं किंनामकं चेत्याह—तद्देशसंधिमध्यस्थं । रमणीयतरं शुचि ॥ चंपकाशोकपुन्नाग—बकुलादिनगाकुलं ॥ २५ ॥ प्रशांत-मृगसिंहादि—विरुद्धश्वापदान्वितं ॥ सुगंधिद्दविरुद्दाम—सध्धूमपटलांकितं ॥ २६ ॥ पर्यंतगिरिन-दीकं । तापसजनहृदयजनितपरितोषं ॥ सुखसंतोषं नाम । तपोवनं प्रसिद्धं समस्ति भुवि ॥ २७ ॥ त्रिनिर्विशेषकं ॥ संप्राप्य च ततो दीर्घ—मार्गखिन्नशरीरकः ॥ मुहूर्तमात्रं विश्रम्य । प्रविष्टस्तत्तपो-वनं ॥ २८ ॥ दृष्टश्च तेन तद्देशे । सत्तापसकुलप्रभुः ॥ नाम्ना त्वार्जवकौण्डिन्य—स्तापसः स्वक्रिया-परः ॥ २९ ॥ स कीदृश इत्याह—वल्कलविपुलजटाभृत् । त्रिदंडमृगचर्मधारकः सौम्यः ॥ भस्मर-जःकृततिलक—स्तयीयुतोंतिककमंडलुकः ॥ ३० ॥ कदलीगृहांतरे च । ध्यानगतः स्वासने सुखनि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षसः ॥ परिवर्तयंश्च दक्षिण—करेण रुद्राक्षमालां स्वां ॥ ३१ ॥ मंत्राक्षरजपनेन च । मनाक्चल-
त्कंठसुंदरोष्टपुटः ॥ नासास्थापितदृष्टिः । परिवर्जितशेषकरणीयः ॥ ३२ ॥ अतसीत्वङ्मयसद्योग—प-
ट्टसंगतकृतासनविशेषः ॥ निर्जितविषयविकारो । नित्यं संतुष्टगूढपथ्यः ॥ ३३ ॥ पंचभिः कुलकं ॥
हर्षोल्लसितरोमांचो । दृष्ट्वा तापसमीदृशं ॥ अहो धन्योऽस्म्यहो धन्य । इति जल्पन् द्विजांगजः ॥
॥ ३४ ॥ भून्यस्तजानुशीर्षेण । कराभ्यां च पुनः पुनः ॥ प्रहतक्ष्मातलोऽसौ द्रा—क्तं ननाम सुभ-
क्तितः ॥ ३५ ॥ युग्मं ॥

तेनापि तं तथा प्रेक्ष्य । बहुमानकृतेऽतिथेः ॥ ध्यानयोगं विमुच्याशु । स्वागतप्रश्नपूर्वकं ॥३६॥
आसनमासनमहो । इति संमानितस्ततः ॥ तापसैस्तदानीत—मुटजांगणसेविभिः ॥ ३७ ॥ यु-
ग्मं ॥ ऋषिणा चात्रोपविशे—त्युक्तः सविनयं ततः ॥ पुरोहितसुतस्तस्मि—न्नुपविष्टः कुशासने ॥
॥ ३८ ॥ पृष्टः स ऋषिणा भद्रो—पागतोऽसि कुतो भवान् ॥ ततः सविस्तरं तेन । स्ववृत्तांतो नि-
वेदितः ॥ ३९ ॥ भणितश्चर्षिणा वत्स । प्राग्जन्मकृतकर्मणां ॥ इयं परिणतिर्दुष्टा । यानुभूता त्व-
या किल ॥ ४० ॥ एवं कर्मवशादेव । प्रायः सर्वेऽपि देहिनः ॥ भजंति बहुसंक्लेशान् । नानायोनि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षु सर्वदा ॥ ४१ ॥ तस्माद्नृपापमानेन । पीडितानां नृणामिह ॥ दारिद्र्यदुःखिनां लोके । दौर्गा-
ग्येण कलंकिनां ॥ ४२ ॥ इष्टलोकवियोगाग्नि—तप्तानां चेदमेव हि ॥ वनवासव्रतमिह—परलो-
कसुखावहं ॥ ४३ ॥ शैतव्यस्थानमुत्कृष्ट—मस्त्यत्र परसंगजं ॥ दुःखं लोकापमानं च । न पश्यंति
कदाचन ॥ ४४ ॥ दुर्गतौ पतनं न स्या—त्ततश्च वनवासिनः ॥ पुरुषाः सर्वथा धन्या । इति जा-
नीहि निश्चितं ॥ ४५ ॥ चतुर्भिः कलापकं ॥ इत्थं श्रुत्वोपदेशं तं । प्रोक्तं तेनाग्निशर्मणा ॥ भग-
वन्नेवमेवैत—न्न संदेहोऽत्र कश्चन ॥ ४६ ॥ तस्माद्भगवतो यद्य—स्त्यनुकंपा ममोपरि ॥ उचितो
वाहमेतस्या—रण्यवासव्रतस्य वै ॥ ४७ ॥ एतद्व्रतप्रदानेना—नुग्रहं कुरु तर्हि मे ॥ ऋषिणा भा-
णितो वत्स । त्वं वैराग्यपथानुगः ॥ ४८ ॥ करोम्यनुग्रहमत—स्त्वमेतस्योचितोऽप्यसि ॥ योऽसमर्थो
नरः कोऽपि । स एवानुचितः किल ॥ ४९ ॥ त्रिभिर्विशेषकं ॥ ततः कियत्सु घस्रेषु । व्यतिक्रांते-
षु सादरं ॥ तस्मै निजकमाचारं । कथयित्वा सविस्तरं ॥ ५० ॥ प्रशस्ते दिवसे योगे । करणे च
मुहूर्तके ॥ लग्ने तापससंबद्धा । दीक्षा दत्ता तपस्विना ॥५१॥ युग्मं महापराभवोत्पन्न-वैराग्यभरभा-
वितः ॥ तस्मिन्नेव दिने चायं । प्रतिज्ञां महतीं व्यधात् ॥ ५२ ॥ सर्वतापसयुक्तस्य । समक्षं स्वगु-

P.P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रोः स्वयं ॥ यथा नान्यं मया याव—ज्जीवं मासोपवासिना ॥ ५३ ॥ पारणादिवसे च प्रा—क्प्र-विष्टेनाद्यगेहतः ॥ एवं लाभे ह्यलाभे वा । प्रत्यागंतव्यमेव वै ॥ गृहांतरं न गंतव्यं । पारणार्थं तु कर्हिचित् ॥ ५४ ॥ षड्भिर्दी ॥ त्रिभिर्विशेषकं ॥

एवं कृतप्रतिज्ञस्य । तस्य तामनुरक्ततः ॥ अतिक्रांतानि भूयांसि । पूर्वलक्षाणि निश्चितं ॥५५॥ तपोवनसमीपस्थ—वसंतपुरवासिनः ॥ लोकस्य गुणरक्तस्य । भक्तिस्तंप्रत्यभूद्बहु ॥ ५६ ॥ अहो महातपस्व्येष । इहलोकेऽतिनिःस्पृहः ॥ देहेऽप्यप्रतिबद्धश्च । सफलं ह्यस्य जीवितं ॥ ५७ ॥ इत्या-दि लोका वदंतिस्मेति शेषः. उक्तं च—जनपक्षपातबहुमा—निनापि यत्नो गुणेषु कर्तव्यः ॥ आपद्यंते हि गुणा । अबोधमपि जनममत्सरिकं ॥ ५८ ॥ इतश्च पूर्णचंद्रो रा—ज्ञुणसेनकुमारकं ॥ कृतोद्वाहोत्सवं राज्ये—ऽभिषिच्य बहुमानतः ॥ ५९ ॥ सार्धं कुमुदिनीदेव्या । तत्तपोवनमाश्रय-त् ॥ गुणसेनकुमारस्तु । राजा जातः प्रतापवान् ॥ ६० ॥ युग्मं ॥ स च कीदृश इत्याह—अने-कशूरसामंत—प्रणतांह्रिद्वयः सदा ॥ निर्जितात्मीयदेशारि—मंडलश्चंडशासनः ॥ ६१ ॥ दशदिक्प्र-सृतस्वछ—यशोवृंदसुविश्रुतः ॥ धर्मार्थकामनामत्रि—वर्गसंपादने रतः ॥ ६२ ॥ युग्मं ॥ अन्यदा

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

च नृपः काल—क्रमेणैव यथासुखं ॥ वसंतसेनया राज्या । सार्धमानंदपूरितः ॥ ६३ ॥ सर्वलोक-
प्रशंसार्हं । राज्यसौख्यमनुत्तरं ॥ आगतोऽनुनवन् रम्यं । वसंतपुरपत्तनं ॥ ६४ ॥ युग्मं ॥ प्रविष्टश्च
महामंग—लोपचारेण पूजनैः ॥ पूजितश्च गतः सार्धं । तैः स्वप्रासादमुत्तमं ॥ ६५ ॥ विमानछं-
दकं नाम । प्रावृम्लीलावलंबिनं ॥ यत्र कृष्णागुरोर्धूम—श्रेण्यो मेघतमःसमाः ॥ ६६ ॥ तडिल्लता
इवाभांति । सुरत्नावलयः पुनः ॥ जलधारा इवेक्ष्यंते । मौक्तिकावलयस्तथा ॥ ६७ ॥ बलाकापं-
क्तिभिस्तुल्या । भांति चामरपंक्तयः ॥ पट्टांशुकालयश्चेंद्र—धनुश्छायापहारिकाः ॥ ६८ ॥ जलसे-
कसुगंध्युर्वी—भागा इव सुशोभनाः ॥ भ्रमरैराकुलाः पुष्पो—पचाराः संति सर्वतः ॥ ६९ ॥ प्रो-
क्तेन बहुना किं नु । यश्च स्वप्नोऽपमोऽस्ति हि ॥ मोहनिद्राप्रसुप्तानां । पुरुषाणां भुवस्तले ॥ ७० ॥
पुराकृतोल्लसद्भाग—धेयानां विपुलं फलं ॥ इव यो वर्तते रम्य—तरश्च सकले पुरे ॥ ७१ ॥ नव-
भिः कुलकं ॥ तत्र च यथानुरूपं । पौरजनं सर्वमेव संमान्य ॥ कृत्वा च तद्विसर्जन—मथ नृपस्त-
कदहोरात्रं ॥ ७२ ॥ बहुविधनाटकनर्त—क्यादिविनोदेन चारुणा सम्यक् ॥ निर्गमयामास यथा ।
क्षणमेकं सुखनिमग्नः सन् ॥ ७३ ॥ युग्मं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्वितीये च दिने कृत्वा । प्रातःकृत्यानि सर्वतः ॥ उचितावसरेऽश्वानां । वाहनार्थं स निर्गतः
॥ १४ ॥ बाल्हिकाद्यास्तुरंगाश्च । बहवस्तेन वाहिताः ॥ तदुत्पन्नस्य खेदस्य । दूरीकरणहेतवे ।१५।
अश्ववाहनभूमेश्च । तटस्थे रमणीयके ॥ सहस्राम्रवनोद्याने । उपविष्टो महीपतिः ॥ १६ ॥ युग्मं.
अत्रांतरे गृहीतस्व—नागरंगविहंगकौ ॥ आगतौ तत्प्रदेशे च । द्वौ तापसकुमारकौ ॥ १७ ॥ दृष्ट-
श्चाभ्यां महाराजो । भ्राजमानः स्वतेजसा ॥ प्रसिद्ध्या स्वके शास्त्रे । आशीषा चाभिनंदितः ।१८।
अभ्युत्थानासनदाना—द्युपचारेण भूभुजा ॥ सद्यो बहुमतौ चैतौ । प्रोचतुर्भूमिपालकं ॥ १९ ॥
किमूचतुरित्याह—गुणसेनमहाराज । वेदाश्रमगुरोस्तव ॥ धर्माधर्मव्यवस्थायाः । कारकस्य यथो-
चितं ॥ २० ॥ देहोदंतपरिज्ञान—निमित्तमिह प्रेषितौ ॥ आवामृषिकुलार्येण । सांप्रतं त्वं प्रमाण-
कं ॥ २१ ॥ युग्मं ॥ श्रुत्वैवं भणितं राज्ञा । पूज्यः कुलपतिः क्व सः ॥ ताभ्यामुक्तमितो नाति—
दूरे ह्यस्ति तपोवने ॥ २२ ॥ ततश्च स नृपो भक्ति—कौतुकाभ्यां च तद्वनं ॥ गतो दृष्टाश्च तेनांत
—र्बहवस्तत्र तापसाः ॥ २३ ॥ ततः संजातसंवेगो । यथार्हमभिवंद्य तान् ॥ उपविष्टः कुलपतेः ।
समीपे शुद्धमानसः ॥ २४ ॥ कियत्कालं धर्मकथा—व्यापारेणर्षिणा सह ॥ विनयेन स्थितस्तत्र ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नत्वावोचदृषिंप्रति ॥ ८५ ॥ भगवन् मद्गृहाहार—ग्रहणेन ममोपरि ॥ कुरु प्रसादमात्मीय—परि-
वारसमन्वितः ॥ ८६ ॥ ततः कुलपतिः प्रोचे । वत्सैवं भवतात्किंत्व ॥ किंत्वेकोऽस्त्यग्निशर्माख्यो-
ऽस्मासु तापससत्तमः ॥ ८७ ॥ स च न प्रत्यहं भुंक्ते । किंतु मासात्परं सदा ॥ तत्रापि पारणाघस्रे
। यत्र पूर्वं प्रविष्टवान् ॥ ८८ ॥ तद्गृहादेव लाभे वा—ऽलाभे वापि निवर्तते ॥ गृहांतरं न गच्छेच्च
। पारणार्थं हि कर्हिचित ॥ ८९ ॥ युग्मं ॥ तस्मान्महातपोयुक्तं । तं मुक्त्वांगीकृता तव ॥ प्रार्थना-
स्माभिरित्थं त—द्वचः श्रुत्वा नृपोऽब्रवीत ॥ ९० ॥ भो पूज्यानुगृहीतोऽस्मि । क्व पुनः स महातपाः
॥ पश्यामि तावत्कुर्वे स्व—मपापं तस्य दर्शनात ॥ ९१ ॥ ऋषिणाभाणि चैतस्या । आम्रश्रेणेरध-
स्तने ॥ भूभागे वत्स सध्यान—माश्रितस्तिष्ठति स्वयं ॥ ९२ ॥

ततश्च सत्वरं राजा । गतो माकंदवीथिकां ॥ दृष्टश्च तेन सत्पद्मा—सनासीनोऽग्निशर्मकः ॥
॥ ९३ ॥ स्थिरीकृताक्षियुग्मः सं—श्चित्तव्यापारशांतिमान् ॥ ध्यानं तथाविधं ध्यायन् । किमप्युत्कृ-
ष्टतापसः ॥ ९४ ॥ युग्मं ॥ ततो हर्षवशाज्जात—रोमांचेन महीभुजा ॥ प्रणतः सोऽपि चाशीर्भि-
रभिनंदितवान् मुदा ॥ ९५ ॥ स्वागतं ते भणित्वोप—विशेति समजल्पयत् ॥ राज्ञोपविश्य भ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णितं । सुखासनमुपेयुषा ॥ ९६ ॥ किमुक्तमित्याह—भगवन् किं तवैतस्य । महादुष्करतायुजः ॥
तपश्चरणरूपस्य । व्यवसायस्य कारणं ॥ ९७ ॥ तदाग्निशर्मसंज्ञेन । तापसेनोक्तमादितः ॥ भो म-
हासत्व दारिद्र्य—दुःखं परपराभवः ॥ ९८ ॥ कुरूपता तथा नृप—पुत्रश्च गुणसेनकः ॥ कल्याण-
मित्रमित्येत—त्कारणानां चतुष्टयं ॥ ९९ ॥ युग्मं ॥ अथ श्रुत्वा निजं नाम । जाताशंकेन भूभु-
जा ॥ भणितं भगवन्नास्तां । तावत्तत्कारणत्रयं ॥ १०० ॥ कथं पुनर्महाराज—पुत्रो हि गुणसेन-
कः ॥ कल्याणमित्रमित्येतत् । श्रुत्वा प्रोचेऽग्निशर्मकः ॥ १ ॥ श्रूयतां भो महासत्वे—त्येवं क-
ल्याणमित्रकः ॥ ये नरा उत्तमाः स्युस्ते । धर्ममाददते स्वयं ॥ २ ॥ परप्रेरणया मर्त्या । मध्यमा-
स्तु महीतले ॥ प्राणिनः प्रतिबुध्यंते । जघन्यास्तु कदापि न ॥ ३ ॥ प्रेरयति यस्तु धर्मे । जीवं ब-
हुविधनयेन केनापि ॥ संसारचारकगतं । स एव कल्याणमित्रमिति ॥ ४ ॥ ततः कौमारवृत्तांतं ।
स्मृत्वा राज्ञा स्वमानसे ॥ लज्जावनतवक्त्रेण । भणितं भगवन्ननु ॥ ५ ॥ एकांतेन कथं त्वं हि ।
त्रैलोक्यहितकारिणि ॥ धर्मेऽस्मिन् प्रेरितो ब्रूहि । तदोक्तं तापसेन वै ॥ ६ ॥ युग्मं ॥ श्रूयतां भो
महासत्व । प्रेरणाः संत्यनेकधा ॥ केनापि हेतुमात्रेण । प्रेरितोऽस्मि महामते ॥ ७ ॥ चिंतितं च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो राज्ञा—स्याहो गुर्वनुभावना ॥ पराभवोऽपि चानेन । ह्युपकारतयाददे ॥ ८ ॥ परनिंदापरि-
हारं । विदधानश्च सर्वथा ॥ निजशुद्धस्वभावत्वा—न्नापकारं तु मन्यते ॥ ९ ॥ अहो मया महा-
पाप—कर्मणा दारुणं खलु ॥ अकार्यं विहितं तस्मा—त्कथयाम्यधुनाप्यहं ॥ १० ॥ एतस्य पुरतो-
ऽकार्या—चरणांकेन दूषितं ॥ आत्मानमिति संचिंत्य । जल्पितं तेन भूभुजा ॥ ११ ॥ युग्मं ॥ भ-
गवन् स महापाप—कर्मकार्यहकं तव ॥ चेतःसंतापकार्यस्मि । नाम्ना त्वगुणसेनकः ॥ १२ ॥ भ-
णितं तापसेनाग्नि—शर्माख्येन तदा तव ॥ स्वागतं भो महाराजा—गुणसेनो भवान् कथं ॥१३॥
येन त्वया परपिंड—जीविकामात्रवैभवः ॥ तपोविभूतिमीदृक्षां । प्रापितोऽहं नरेश्वर ॥ १४ ॥ त-
स्मात्त्वं गुणसेनोऽसि । न चैवागुणसेनकः ॥ श्रुत्वैतद्भणितं राज्ञा—हो ते महानुभावता ॥ १५ ॥
किंवा तपस्विनो नैवा—प्रियं वक्तुं विजानते ॥ न हि चंद्रमसो बिंबा—त्पतंत्यंगारवृष्टयः ॥ १६ ॥
तत एतत्प्रवृत्त्यालं । पूज्य पारणकं तव ॥ कदा भविष्यति ब्रूहि । तेनोक्तं पंचभिर्दिनैः ॥ १७ ॥
राज्ञोक्तं भगवंस्तर्हि । कर्तव्यो मद्गृहे खलु ॥ पारणकप्रसादश्च । ह्युपरोधो न तेऽस्ति चेत् ॥१८॥
विज्ञातश्च मया पूज्य । तावत्कुलपतेर्मुखात ॥ त्वत्प्रतिज्ञाविशेषोऽतः । प्रार्थयेऽहमनागतं ॥ १९ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऋषिणोक्तं महाराज । तावदायातु तद्दिनं ॥ को जानात्यंतरे कार्यं । किमपीह भविष्यति ॥ २० ॥
अपि च—एतत्करोमि सांप्रत—मेतत्कृत्वा च पुनरिदं कल्प्ये ॥ कर्तास्मि कोऽनुविद्या—त्स्वप्नोपम-
जीवलोकेऽस्मिन् ॥ २१ ॥ तस्मात्तावन्महाराज । ह्यागछतु दिनं तकत् ॥ राज्ञोक्तं भगवन् विघ्ना—
भावे त्वागम्यतां खलु ॥ २२ ॥ ऋषिणा भणितं राजन् । यद्येवं भवदाग्रहः ॥ तत एव मया नूनं ।
प्रार्थनांगीकृता तव ॥ २३ ॥ ततः प्रणम्य भूपालो । हर्षोल्लसितदेहभाक् ॥ वेलां कामप्यतिक्रम्य ।
प्रविष्टो नगरं निजं ॥ २४ ॥ कृता कुलपतेः पूजा । गुणसेनमहीभुजा ॥ परिवारयुतस्याशु । स्वभ-
क्तिविभवोचिता ॥ २५ ॥

अथ पंचसु घस्रेष्व—तिक्रांतेष्वग्निशर्मकः ॥ तापसः पारणाघस्रे । पारणार्थं नृपौकसि ॥२६॥
प्रविष्टः प्रथमं चैव । तस्मिंश्च दिवसे परं ॥ कथंचिद् नृपतेः शीर्षे । उत्पन्ना तीव्रवेदना ॥ २७ ॥
युग्मं ॥ ततो राजकुलं सर्व—मेव व्याकुलतां गतं ॥ प्रविष्टाश्च तदा तत्र । वैद्यशास्त्रविशारदाः ॥
॥ २८ ॥ चिकित्सासंहिता नाना—विधा वैद्याः पठंति च ॥ औषधानि च पिष्यंते । विविधानि
चिकित्सकैः ॥ २९ ॥ दीयंतेऽनेकरत्नानां । लेपाः खेदापहारिणः ॥ जाताः किंकृत्यमूढाश्च । बुद्धि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मंतोऽपि मंत्रिणः ॥ ३० ॥ शांतिकर्म समारब्धं । मंत्रोच्चारणपूर्वकं ॥ आहूतेश्च प्रदानेन । राज्य-
मान्यैः पुरोहितैः ॥ ३१ ॥ तथा म्लानसुपुष्पस्र—क्शोभं नष्टांगरागकं ॥ नेत्रांबुपूरनिर्धौत—क-
पोलदलपंक्तिकं ॥ ३२ ॥ पुनः करतलन्यस्त—विन्नायमुखपंकजं ॥ जातमंतःपुरं सर्व—मुद्विग्नमव-
नीशितुः ॥ ३३ ॥ युग्मं ॥ विमुक्तकंदुकक्रीड—मनादृतविभूषणं ॥ निरुत्साहतया त्यक्त—चित्रक-
र्मपरीचयं ॥ ३४ ॥ निवृत्तगीतनृत्याद्या—रंभं सकलमेव च ॥ कन्यकांतःपुरं जातं । विमनस्कं न-
रेशितुः ॥ ३५ ॥ युग्मं ॥ वेत्रयष्टिषु विन्यस्त—विन्नायवदनाः समे ॥ प्रतीहारा अभूवंश्च । दुर्म-
नस्का नृपार्तितः ॥ ३६ ॥ तथा कंचुकिनस्त्यक्त—स्वव्यापारा नृपौकसि ॥ सूपकारप्रभृतयो । व्यग्र-
चित्ताश्च जज्ञिरे ॥ ३७ ॥ तत एवंविधे राज—कुले स ह्यग्निशर्मकः ॥ वेलां कामपि निर्गम्य । नि-
र्गतो राजमंदिरात् ॥ ३८ ॥ केनाप्यपृष्टवार्तोको । निर्गत्य स्वतपोवनं ॥ गतो दृष्टश्च योगिभि—रि-
तरैर्भणितश्च तैः ॥ ३९ ॥ परिम्लानशरीरस्त्वं । पूज्याविहितपारणः ॥ इवोपलक्ष्यसे तत्किं । कृतं
पारणकं न हि ॥ ४० ॥ न प्रविष्टोऽधुना राज्ञो । गुणसेनस्य मंदिरं ॥ इति श्रुत्वाग्निशर्माख्य—
तापसेनोक्तमादितः ॥ ४१ ॥ नरेंद्रमंदिरेऽहं च । प्रविष्टोऽभूत्तपोधनाः ॥ किंतु नूनं नरेंद्रः सो—ऽ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तीव्रापटुशरीरकः ॥ ४२ ॥ उद्विग्नपरिजनं त—द्गेहं सर्वं विलोक्य च ॥ अशक्नुवन्नहं द्रष्टुं । ता-
दृशं द्राग्विनिर्गतः ॥ ४३ ॥ तापसैर्भणितं नात्र । संदेहः कोऽपि विद्यते ॥ राजा दृढमपटुर्वंगो ।
निश्चयेन भविष्यति ॥ ४४ ॥ अन्यथा च कथं तादृ—क्तपस्विजनभक्तितः ॥ पूज्यपारणकं ज्ञा-
त्वा । सावधानो भवेन्न हि ॥ ४५ ॥ स्वयमेवेति शेषः. अन्यच्च—स नरेंद्रोऽस्ति योगिना—मुप-
र्यत्यंतभक्तिभृत् ॥ यतः कुलपतेरग्रे । सद्भूतगुणकीर्तनं ॥ ४६ ॥ बहु तेन कृतं ह्यासीत् । श्रुत्वेति
भणितं तदा ॥ अग्निशर्माख्यऋषिणा । तस्यारोग्यं भवत्वलं ॥ ४७ ॥ गुर्वादिपूजकत्वात्किं । म-
माहारेण तापसाः ॥ ततोंगीकृतवान् मासो—पवासव्रतकं पुनः ॥ ४८ ॥ त्रिभिर्विशेषकं ॥

इतश्च गुणसेनेन । राज्ञा शांतशिरोर्तिना ॥ पृष्टः परिजनस्तस्या—द्याहो गुरुतपस्विनः ॥४९॥
पारणादिवसोऽस्त्यत्रा—गतः स यदि वा न हि ॥ आगतश्चेत्तदा नूनं । केनचित्पूजितो न वा ॥
॥ ५० ॥ युग्मं ॥ तैः प्रोक्तं भो महाराजा—गतोऽभूत्किंतु तत्क्षणे ॥ त्वच्छीर्षवेदनाजन्य—संता-
पत्यक्तस्वक्रिये ॥ ५१ ॥ परिच्छदे च सर्वस्मिन् । केनचित्पूजितो न हि ॥ पृष्टो वाऽज्ञातवृत्तांतः ।
सर्वं तव परिच्छदं ॥ ५२ ॥ व्यग्रचित्तं समालोक्य । कियत्कालं प्रतीक्ष्य च ॥ उद्विग्नमानसः सोऽ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पि । निर्गतो राजमंदिरात् ॥ ५३ ॥ त्रिभिर्विशेषकं ॥ राज्ञोदितमहो मेऽद्या—धन्यता स्खलितोऽ-
स्म्यहं ॥ महालाभान्महानर्थं । प्राप्तश्च मुनिपीडनात् ॥ ५४ ॥ एवं विलप्य दिवसे । द्वितीये प्रात-
रेव च ॥ गतस्तपोवनं तेन । दृष्टाः सर्वेऽपि तापसाः ॥ ५५ ॥ लज्जानम्रेण शीर्षेण । प्रणता वि-
धिना पुनः ॥ कुलपत्यादिभिः सर्वै—राशीषा चाभिनंदितः ॥ ५६ ॥ स्वागतं ते महाराजो—प-
विशेत्युदितः पुनः ॥ कुलार्येण ततो राजा । लज्जावनतमस्तकः ॥ ५७ ॥ विमुक्तदीर्घनिःश्वास ।
उपविष्टो मुनेः पुरः ॥ ततस्तथा सचिंतं तं । दृष्ट्वा प्रोक्तं तपस्विना ॥ ५८ ॥ तं राजानमिति शे-
षः. चतुर्भिः कलापकं ॥ वत्सोद्विग्न इवात्यंतं । लक्ष्यसे ब्रूहि मे ततः ॥ उद्वेगकारणं शीघ्रं । य-
द्यवाच्यं भवेन्न हि ॥ ५९ ॥ राज्ञोक्तं भगवन्नस्ति । कथनीयं भवत्पुरः ॥ अवाच्यवस्तुविषयो—
द्विग्नस्येहागमं कुतः ॥ ६० ॥ ततः कुलपतिः प्रोचे । साधुवत्सोचितश्च ते ॥ विवेकस्तत्किमुद्वेग-
कारणं वद मत्पुरः ॥ ६१ ॥ नृपेणोक्तं भगवत । आज्ञामादृत्य कथ्यते ॥ अन्यथेदृग्दुराचारं । व-
दितुं शक्यते कथं ॥ ६२ ॥ तदा कुलपतिः प्रोचे । वत्स मातृसमः खलु ॥ तपस्विलोकः सर्वस्य ।
लज्जा तंप्रति का ततः ॥ ६३ ॥ भवान् कथयतु तस्मा—द्येन ज्ञात्वा प्रवृत्तिकां ॥ उद्वेगं तं निरा-

P.P. Ac. Gunratnasuri M.S.          Jun Gun Aaradhak Trust

समरा- कुर्वे । सदुपायेन केनचित् ॥ ६४ ॥ राज्ञोक्तं पूज्य यद्येवं । तत शृएवेषोऽग्निशर्मकः ॥ तापसः प्र-
चरित्रं थमं चैव । मंदपुण्यस्य दुर्धियः ॥ ६५ ॥ अविमृष्टार्थकर्तुर्मे । नीचाचाररतस्य च ॥ संबंधिनः सु-
निर्वेदा—त्तापसोऽभूदिहाश्रमे ॥ ६६ ॥ युग्मं ॥ एतस्मिन् स्वीकृतोत्कृष्ट—व्रतेऽपि न मया तकत् ॥
२२ नीचाचरणमुत्सृष्ट—मित्युद्विग्नोऽस्म्यहं दृढं ॥ ६७ ॥ ऋषिणा भणितं वत्स । यद्येवं तदलं
तव ॥ संतापेनामुना चेत्त्व—त्कारणात्तापसोऽनि ॥ ६८ ॥ ततस्त्वमेव चैतस्य । धर्ममार्गप्रवर्तकः ॥
कल्याणमित्रमिति किं—मुद्विग्नोऽसि नराधिप ॥ ६९ ॥ युग्मं ॥ विज्ञातधर्मशास्त्रस्य । बिभ्यतः प-
रलोकतः ॥ तवाधुना न किमपि । दुष्टाचारं विभावये ॥ ७० ॥ किं वा कृतं त्वयेदानीं । तस्य त-
न्मे निवेदय ॥ राज्ञोक्तमधुना पूज्य । तावदेनं निमंत्र्य च ॥ ७१ ॥ मासोपवासपर्यंते । पारणार्थं
ममौकसि ॥ प्रविष्टस्य शिरःपीडा—पीडितेन मया पुनः ॥ ७२ ॥ प्रमादादपरिज्ञाप्य । स्वकीयपरि-
वारकं ॥ कृत्वास्याहारविघ्नं च । कृतं धर्मांतरायकं ॥ ७३ ॥ त्रिर्निर्विशेषकं ॥ ऋषिणा भणितं वत्स
। यत्किंचित्त्वेतदस्ति ते ॥ अपराधो न कोऽप्यत्र । वृथैवोद्विजसे कथं ॥ ७४ ॥ नराः कार्यमकार्यं
वा । न जानंत्यतिपीडिताः ॥ न च तस्याशने विघ्ना—द्भवेद्धर्मांतरायकं ॥ ७५ ॥ किंतु जाता त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पोवृद्धि–रुद्वेगेनालमित्यथो ॥ राज्ञोक्तं भगवन् याव—न्नूनं तेन महात्मना ॥ ७६ ॥ आहारग्रहणं गेहे । मदीये न कृतं मुदा ॥ तावन्मम हृदुद्वेगो । व्यपगच्छेत्कथं मुने ॥ ७७ ॥ युग्मं ॥ मुनिनोक्तमथो वत्स । निर्विघ्नं यद्भविष्यति ॥ तस्य पारणकं तत्र । त्वद्गृहे खलु भोक्ष्यते ॥ ७८ ॥ ततस्तपस्विनाथेना—हूतोऽसावग्निशर्मकः ॥ तापसो बहुमानेन । प्रोक्तश्चादाय हस्तके ॥ ७९ ॥ अकृत्वा पारणां वत्स । निर्गतो यन्नृपालयात् ॥ त्वमेतेन दृढं राजा । संतापं प्राप्तवान् हृदि ॥ ८० ॥ ह्यः शिरोर्तिरतीवासी—दस्यातो वेदनावशात् ॥ पूजितो न त्वमेतेने—त्यतो नैषोऽपराध्यति ॥८१॥ तुभ्यमिति शेषः. ॥ प्रोक्तं चानेन मद्गृहे । यावदग्न्यादिशर्मकः ॥ भुक्तवान्न हि तावन्मे । उद्वेगो नापगच्छति ॥ ८२ ॥ अतः संप्रति संप्राप्ते । पारणावसरे त्वया ॥ अविघ्नेन मदुक्त्या च । नरेंद्रबहुमानतः ॥ ८३ ॥ एतस्य मंदिरे वत्स । कर्तव्या खलु पारणा ॥ तदाग्निशर्मसंज्ञेन । तापसेनोक्तमादरात ॥ ८४ ॥ भवदाज्ञा प्रमाणं मे । पूज्याः कारणमंतरा ॥ नृपः प्राप्नोति संतापं । न किमप्यस्ति मे हृदि ॥ ८५ ॥ यतोऽनेन न मे किंचि—त्परलोकविरुद्धकं ॥ कृतं ततो नरेंद्रोऽहो । अस्य गुर्वनुभावता ॥ ८६ ॥ विचिंत्येति कियद्वेलं । पर्युपास्य तपस्विनः ॥ प्रविष्टो नगरं पूर्णो । मासश्चा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तवान् क्रमात् ॥ ८७ ॥ पंचभिः कुलकं ॥

अत्रांतरे च संप्राप्ते । पारणादिवसे मुनेः ॥ निवेदितं नृपालाय । ह्यागत्य चरपूरुषैः ॥ ८८ ॥ महाराजातिविषम—विक्रमं चातिगर्वितं ॥ प्रविष्टं शैलयोः संधौ । रक्षणोपायवर्जितं ॥ ८९ ॥ अतिप्रमत्तं ते सैन्य—मप्रमत्तेन भूभुजा ॥ मानभंगाभिधानेन । रक्षितुं निजमंडलं ॥ ९० ॥ वीरचर्यां समालंब्या—र्धरात्रेऽस्तमिते विधौ ॥ निर्भयत्वेन सुप्तेषु । सर्वराजपदातिषु ॥ ९१ ॥ सर्वस्वसैन्ययुक्तेन । दत्वावस्कंदमूर्जितं ॥ निर्जितं सकलं स्वामि—न्नथ देवः प्रमाणकं ॥ ९२ ॥ चतुर्भिः कलापकं ॥ ततो राज्ञा निशम्यैत—द्वचनं हि सुदुःसहं ॥ कोपानलप्रज्वलित—रक्तनेत्रे सुबिभ्रता ॥ ९३ ॥ प्रस्फुरिताधरेणात्म—कराभिहतभूमिना ॥ अमर्षवशतो राज्ञा । प्रस्खलद्वचनेन च ॥ ॥ ९४ ॥ परिजनः समादिष्टो । यथाहो त्वरितं खलु ॥ प्रयाणपटहं देहि । विलंबं माकृथा इह ॥ ॥ ९५ ॥ सज्जयात्मीयमहितै—र्दुर्जयं गजसैन्यकं ॥ विधेहि चाश्वसैन्यं स—त्पर्याणालंकृतं द्रुतं ॥ ९६ ॥ रथौघं सज्जय प्रोच्चै—र्ध्वजमालोपशोभितं ॥ नानाप्रहरणैर्युक्तं । पत्तिसैन्यं प्रवर्तय ॥ ॥ ९७ ॥ पंचभिः कुलकं ॥ ततो भूपसमादेशा—नंतरं चैव तत्क्षणं ॥ समाकर्ण्य सुगंभीरं । प्र-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

याणपटहध्वनिं ॥ ९८ ॥ अकालदुर्दिनमिव । नृपसैन्यं समंततः ॥ विजृंभितं मनुष्याणां । कातराणां भयावहं ॥ ९९ ॥ युग्मं ॥ दुर्दिनोपमया नृपसैन्यवर्णनं यथा—मेघजालमिव यत्र हस्तिन—श्छत्रचामरगणाश्च सध्वजाः ॥ उन्नता हि बकपंक्तिसन्निभा । भांति शुक्लतरवर्णशोभिताः ॥ ॥ २०० ॥ यत्र तीक्ष्णतरखड्गदीप्तयो । ह्रादिनीव्रजसमा विभांति च ॥ शंखदुंदुभिकतूर्यनिःस्वनै—र्गर्जितारवनिभैर्युतं यकत ॥ १ ॥ युग्मं ॥ द्व अपि रथोध्दतावृत्त. ॥ अत्रांतरे रथारूढे । गुणसेननरेश्वरे ॥ स्थापिते पुरतः स्वर्ण—कलशे नीरपूरिते ॥ २ ॥ प्रहते मंगलातोद्ये । जयश्रीपालनोद्यते ॥ पठत्सु बंदिवृंदेषु । बहुधा मंगलानि च ॥ ३ ॥ तापसश्चाग्निशर्माख्यः । पारणार्थं नृपालयं ॥ प्रविष्टस्तदनु तत्र । समुदाये महीयसि ॥ ४ ॥ नृपनिर्गमनार्थं चा—कुलीभूते प्रधानके ॥ परिजने समग्रेऽपि । न केनाप्युपलक्षितः ॥ ५ ॥ चतुर्भिः कलापकं ॥ गमयित्वा ततः कांचि—द्वेलां करितुरंगमैः ॥ मत्तैर्मर्दनतो भीतो । निर्गतो नृपमंदिरात् ॥ ६ ॥ अत्रांतरे समादाय । शंकुच्छायां मनीषिभिः ॥ ज्योतिःशास्त्रार्थनिपुणै—र्भणितं गणकोत्तमैः ॥ ७ ॥ मुहूर्तं शोभनं देव । सद्यो निर्गच्छ सांप्रतं ॥ नृपेणोक्तमहो अद्य । मुनेस्तस्य तपस्विनः ॥ ८ ॥ विद्यते पारणाघस्रः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रतिपन्नं च तेन हि ॥ कार्यं कुलपतेर्वाचा ॥ मद्गृहे भोजनं खलु ॥ ९ ॥ युग्मं ॥ तदागछतु तावत्स । तपस्वी तापसोत्तमः ॥ ततस्तं भोजयित्वाशु । गमिष्यामः प्रणम्य च ॥ १० ॥ भणितं कुलपुत्रेण । ततो निकटवर्तिना ॥ देव सांप्रतमेवेह । स प्रविश्य विनिर्गतः ॥ ११ ॥ दृप्तहस्तितुरं-गौघ—संघट्टनभयात्परं ॥ अद्यापि नगरान्नैव । निर्गतोऽस्तीति तर्कये ॥ १२ ॥ युग्मं ॥ तत एत-द्वचः श्रुत्वा । ससंभ्रांतो नरेश्वरः ॥ प्रवृत्तः पृष्टतस्तस्य । निर्गछन् प्रेक्षितः पुरात् ॥ १३ ॥ स रा-ज्ञेति शेषः. ॥

ततो रथवराद्राज्ञा—वतीर्य बहुभक्तितः ॥ निपत्य पदयोरिछं । विज्ञप्तो बहुमानतः ॥ १४ ॥ कथमित्याह—भगवन् कुरु प्रसादं । निवर्तस्वाहमीप्सिते ॥ अपि प्रयाणे भवत । एवागमनहेतवे ॥ १५ ॥ स्थितोऽस्म्येतावतीं वेलां । यतस्त्वं प्राक्प्रविश्य मे ॥ प्रधानपरिवारेणा—लक्षितश्चैव नि-र्गतः ॥ १६ ॥ निवर्तस्व ततो नून—मिति श्रुत्वाग्निशर्मकः ॥ तापसः प्रोक्तवान् राजं—स्तवै तैर्वच-नैरलं ॥ १७ ॥ मत्प्रतिज्ञाविशेषस्य । ज्ञातवृत्तांत एव च ॥ विद्यसे त्वं पुनः सत्य—प्रतिज्ञा हि त-पस्विनः ॥ १८ ॥ भवंति निर्विशेषाश्च । लाभालाभेषु सर्वदा ॥ नृपेण भणितं श्रुत्वा । भगवन्

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

लज्जितोऽस्म्यहं ॥ १९ ॥ प्रमादाचरितादस्मा—द्या तीव्रतपसा तव ॥ देहपीडा समुत्पन्ना । ततोऽ-
पि मम साधिका ॥ २० ॥ मामत्यंतं दहत्येष । तीव्रसंतापपावकः ॥ तस्योपशमनायैव । मद्गृहे
कुरु पारणां ॥ २१ ॥ सप्तभिः कुलकं ॥ चिंतितं च तदा तेन । तापसेनैव भूपतिः ॥ अत्यंतं गुरु-
भक्तोऽस्ति । खेदमाप्नोति निर्भरं ॥ २२ ॥ यद्येतस्य गृहे नाहं । करिष्ये किल पारणां ॥ तदैतस्य
नरेंद्रस्य । मनोदुःखं न यास्यति ॥ २३ ॥ विचिंत्य स तपस्वीति । प्रोवाच भवतो गृहे ॥ करिष्ये
पारणां नूनं । निर्विघ्नं तद्दिनागमे ॥ २४ ॥ तदा राजातिहृष्टः सन् । प्रणम्य वदतिस्म तं ॥ निर्म-
लज्ञानिना स्वामि—न्नहं निस्तारितस्त्वया ॥ २५ ॥ एवं द्वावपि तौ हृष्ट—चित्तौ जातौ परस्परं ॥
ततो नृपो मुनिं प्रोचे । यूयं यात तपोवनं ॥ २६ ॥ अहं कुलपतेः पार्श्वे । आगत्य निजमाननं ॥
दर्शयितुं न शक्नोमी—त्युक्त्वा नृपो गृहं गतः ॥ २७ ॥ तपस्वी स्ववनं गत्वा । सर्वं कुलपतेः पुरः
॥ वदतिस्म तदा तेन । प्रोक्तं सम्यक्कृतं त्वया ॥ २८ ॥ ततस्तेन कृतं मास—क्षपणं च तृतीयकं
॥ पूर्णतां तदपि प्राप्तं । क्रमेण शुभभावतः ॥ २९ ॥ राज्ञो मनोरथैः सार्धं । प्राप्तं तत्पारणादिनं ॥
तस्मिन्नेव दिने राज्ञी । गुणसेनस्य नृपतेः ॥ ३० ॥ प्रिया वसंतसेनाख्या । प्रासूत सुतमुत्तमं ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निवेदितं च नृपाय । प्रतीहार्या सहर्षया ॥ ३१ ॥ युग्मं ॥ कथमित्याह—महाराज महादेवी । त्व-
वदभ्युदयाय हि ॥ प्रजानां भागधेयैश्च । प्रसूता तनयं सुखं ॥ ३२ ॥

ततो नृपः पुत्रजन्म—श्रवणादतिहर्षितः ॥ प्रतीहार्यै ददौ स्वांगा—भरणं कटकादिकं ।३३।
पुनराज्ञां ददौ तस्यै । समादिश वसुंधरे ॥ मदीयवचसासन्न—प्रतीहाराननेकशः ॥ ३४ ॥ किमि-
त्याह—बंधनानि समस्तानि । मोचयत ममावनौ ॥ सर्वेभ्यो घोषणापूर्वं । दानं दापयत द्रुतं ।३५।
जितशत्रुप्रमुखाणां । राज्ञां मत्पुत्रजन्मनः ॥ प्रापयत प्रवृत्तिं भो । सद्यः संदेशहारकैः ॥ ३६॥ नि-
वेदयत पौरेभ्यो । देवीपुत्रोदयं पुनः ॥ अकालक्षणभूतं द्रा—कारयत पुरोत्सवं ॥ ३७ ॥ इति श्रु-
त्वा नृपस्योक्तिं । प्रतीहार्या तया तदा ॥ समादिष्टाः प्रतीहारा । यथादिष्टं नरेंदुना ॥ ३८ ॥ वि-
हिता च नृपस्याज्ञा । प्रतीहारैः समुद्यतैः ॥ कारितं च प्रहृष्टैस्तै—र्वर्धापनकमुत्तमं ॥ ३९ ॥ कीदृ-
शमित्याह—

वादित्रध्वन्यभिव्याप्त्या—संपूरितदिगंतरं ॥ नृत्यद्विलासिनीवृंदं । स्थाने स्थाने निरंतरं ॥४०॥
विशेषमंडितैः सम्य—ग्मिलद्रामाजनैर्भृतं ॥ करास्फालिततालौघं । मृदंगमधुरध्वनि ॥ ४१ ॥ दा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नपरितुष्टबंदि—वृंदोद्घुष्टजयारवं ॥ मनोऽभिज्ञं च सर्वेषां । जनव्यूहसमाकुलं ॥ ४२ ॥ चतुर्भिः
कलापकं ॥ वसंतपुरसद्रंगे । प्रवृत्तश्च महोत्सवः ॥ एवंविधे च देव्यंग—जातजन्मातिहर्षिते ॥
॥ ४३ ॥ राज्ञा महाप्रमत्ते च । सह राजपरिछदे ॥ तापसः सोऽग्निशर्माख्यः । पारणार्थं समाययौ
॥ ४४ ॥ युग्मं ॥ राजसौधं प्रविश्याथ । वाग्मात्रेणापि केनचित ॥ अकृतप्रतिपत्तिः सन् । शीघ्रमे-
व विनिर्गतः ॥ ४५ ॥ दुष्कर्मोदयतश्चार्त—ध्यानदूषितचेतसा ॥ अनेन चिंतितमहो । तस्य राज्ञो
ममोपरि ॥ ४६ ॥ बाल्यादेवास्ति वैरानु—बंधो हि सुमहानिति ॥ तस्य पश्यत मायाभृ—चरित्रं
गूढरूपकं ॥ ४७ ॥ युग्मं ॥ तथा मनोऽनुकूलं मे । समक्षं प्रणिगद्य यत् ॥ क्रियया विपरीतं च ।
समाचरति सांप्रतं ॥ ४८ ॥ स ऋषिश्चिंतयन्निवं । निर्गतो नगराद्वहिः ॥ अस्मिन्नवसरेऽज्ञान—दो-
षेण प्रविसर्पता ॥ ४९ ॥ अज्ञावितपरमार्थ—मार्गत्वेन च दुर्धरैः ॥ कषायैः सुगृहीतोऽनू—संसं-
सारपरिवर्धिभिः ॥ ५० ॥ युग्मं ॥ ततस्तस्य गता नाशं । परलोकस्य वासना ॥ प्रणष्टा धर्मश्रद्धा
च । वैराग्यं समलं कृतं ॥ ५१ ॥ बीजभूता दुःखतरो—र्मैत्री च समागता ॥ देहपीडा च संज
ता—कृष्टश्चातिबुभुक्षया ॥ ५२ ॥ ततश्च तेन कुज्ञान—क्रोधादिवशवर्तिना ॥ क्षुधापराजितेनाति-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विमूढहृदयेन च ॥ ५३ ॥ एतदंगीकृतं घोरं । निदानं बहुदुःखदं ॥ सुचीर्णस्य मयैतस्य । व्रतस्य स्यात्फलं यदि ॥ ५४ ॥ तदैतस्य वधायास्तु । प्रतिजन्म जनिर्मम ॥ एष राजा महापापो । बाल-त्वादेव मे रिपुः ॥ ५५ ॥ त्रिभिर्विशेषकं ॥ उक्तं च—न कुणइ पईण पियं । जो पुरिसो वि-प्पियं च सत्तूणं ॥ किं तस्स जणणीजोव्वण—विद्दवणमेत्तेण जम्मेणं ॥ ५६ ॥ यः पुरुषः प्रण-यिनां स्नेहवतां प्रियं न करोति, शत्रूणां वैरिणां च विप्रियं विरूपकं न करोति, तस्य जननीयौवन-विनाशनमात्रेण जन्मना किं? व्यर्थमेव तस्य जन्मेति भावः, इति गाथार्थः.

ततोऽपकाराभावेऽपि । करोम्येतस्य विप्रियं ॥ इति कृत्वा निदानं स । स्थानमप्रतिक्रम्य तत् ॥ ५७ ॥ क्रोधानलप्रज्वलित—चित्तोऽनेकविकल्पकान् ॥ कुर्वाणोऽत्रांतरे प्राप्तः । स्वकीयं तत्तपो-वनं ॥ ५८ ॥ युग्मं ॥ त्यक्त्वा कुलपतिं शेष—तापसानपि तत्र च ॥ सद्योऽसंलक्षितश्चैव । गतो माकंदवीथिकां ॥ ५९ ॥ उपविष्टश्च विमल—शिलानिर्मितपीठके ॥ दीर्घद्वेषवशाद् भूयो—ऽप्या-रब्धोऽसौ विचिंतितुं ॥ ६० ॥ तस्याहो नृपतेः प्रत्य—नीकभावो ममोपरि ॥ यदहं सर्ववर्गेऽस्मिन् । हसनीयोऽमुना कृतः ॥ ६१ ॥ मत्प्रतिज्ञाविशेषं हि । मायाबहुलतान्वितः ॥ ज्ञात्वा तथा निमं-

त्र्यासौ । पारणकमकारयन् ॥ ६२ ॥ खलीकरोति मां मूढो । नैवं जानाति मानसे ॥ गत ईदृगव-
स्थां ना । किं खलीक्रियते किल ॥ ६३ ॥ युग्मं ॥ दुर्बलानामनाथानां । परपिंडोपजीविनां ॥ य-
मेनेव हतानां च । पीडना किल नोचिता ॥ ६४ ॥ समानशत्रुमित्राणां । निःस्पृहाणां विशेषतः
॥ परलोकार्थव्यापार—निरतानां तपस्विनां ॥ ६५ ॥ युग्मं ॥ अथवास्त्यपरित्यक्ता—हारमात्रस्य
मे किल ॥ कदर्थनेदृशी यस्मा—त्तदाहारेण मे सृतं ॥ ६६ ॥ परान्नवनिमित्तेन । यावज्जीवमतः
परं ॥ इत्याददे व्रतं याव—ज्जीविकं चातिदुर्धरम् ॥ ६७ ॥ युग्मं ॥

अत्रांतरे परित्यक्त—निजकार्योऽतिदुर्मनाः ॥ तपःक्षीणशरीरश्च । स दृष्टस्तत्र तापसैः ॥ ६८ ॥
भणितं तैश्च भगव—न्नतिक्षीणशरीरकः ॥ अप्राप्तपुष्पमाल्यादि—परिचर्योऽनिलदयसे ॥ ६९ ॥
तदद्यापि न संजातं । किमु पारणकं तव ॥ तेनोक्तं न हि संजातं । तापसैर्भणितं कथं ॥ ७० ॥
संजातं न कथं किं न । प्रविष्टो नृपमंदिरं ॥ तेन प्रोक्तं प्रविष्टोऽहं । तैरुक्तं न कथं तदा ॥ ७१ ॥
पारणकं ते संजातमिति शेषः. युग्मं ॥ तेनोक्तं स नृपो बाल—भावादेवास्ति मे रिपुः ॥ अप-
रित्यक्तवैरित्व—स्तेनाहं विप्रतारितः ॥ ७२ ॥ पूर्वं मया न विज्ञातो । ज्ञातः सांप्रतमेव च ॥ वै-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

रानुवक्रो विनीत । इव संलक्ष्यते स च ॥ ७३ ॥ तस्य मिथ्याविनीतस्या—द्यापि वैरानुवक्रता ॥
नापगच्छति येनोप—हास्यबुद्ध्या निमंत्र्य मां ॥ ७४ ॥ अनार्यचेष्टितेनैव । तैस्तैर्मायाप्रकारकैः ॥
दुष्टलोकोचितैरेवं । पराभवति मां किल ॥ ७५ ॥ अद्यापि तेन विज्ञाय । पारणादिवसं मम ॥
अकस्मात्कारितो नूनं । विस्तारेण महोत्सवः ॥ ७६ ॥ प्रविश्याहं ततो राज—गृहं ह्यबहुमानतः ॥
ज्ञातनृपपरीवारा—भिप्रायो लघु निर्गतः ॥ ७७ ॥ ततोऽन्यतापसैरुक्तं । नैवं संभाव्यते प्रभो ॥
गुणसेननरेंद्रे तु । तपस्विजनवत्सले ॥ ७८ ॥ अथवा भाववैचित्र्या—त्पुंसां संभाव्यते न किं ॥
नास्ति कोऽपि जनो लोके । कषायाणामगोचरः ॥ ७९ ॥ इत्युक्त्वा तैः कुलपते—रत्युद्विग्नैर्निवे-
दितं ॥ भगवन्नग्निशर्माख्य—तापसस्याधुनापि हि ॥ ८० ॥ पारणकं न संजातं । वृत्तांतेनामुना
खलु ॥ ततः कुलपतिः शीघ्र—मेतो भ्रांतस्तदंतिके ॥ ८१ ॥ युग्मं ॥ तेन संपूजितश्चाग्नि—श-
र्माख्येन तपस्विना ॥ यथोचितोपचारेण । ततः कुलपतिर्जगौ ॥ ८२ ॥ अधुनापि न ते वत्स ।
जातं पारणकं कथं ॥ अहो तस्य नरेंद्रस्या—चरणं निंद्यलोकवत ॥ ८३ ॥ तपस्विनोक्तं भगवन्
। प्रमत्ता एव नृमिपाः ॥ भवंति कश्च तद्दोष । एष दोषो ममैव च ॥ ८४ ॥ कथमित्याह—येना-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हमपरित्यक्ता—हारमात्रप्रसंगकः ॥ संस्तस्यापि नरेंद्रस्य । प्रविशामि गृहं किल ॥ ८५ ॥ एतन्मा-
त्रोऽपि संगोऽयं । यावज्जीवं मयाधुना ॥ परित्यक्तः पराभूतेः । सर्वस्या बीजसन्निजः ॥ ८६ ॥ अ-
तो विज्ञपयाम्येव—मर्थेऽस्मिन् भगवन्नहं ॥ अन्यथा ज्ञापनीयो न । भवद्भिर्मुनिसत्तमैः ॥ ८७ ॥
तदा कुलपतिः प्रोचे । त्यक्तं वत्साशनं यदि ॥ कायभंगस्तदा भावी । कृतं नैवोचितं त्वया ॥८८॥
किंतु नृपोपरि क्रोधः । कर्तव्यो नैव सर्वथा ॥ यतः सर्वो जनो भुंक्ते । फलं स्वकृतकर्मणां ॥८९॥
भक्तं च—सव्वो पुव्वकयाणं । कम्माणं पावए फलविवागं ॥ अवराहेसु गुणेसु य । निमित्तमित्तं
परो होइ ॥ ९० ॥ एवं शिक्षां प्रदायर्षि—रग्निशर्मतपस्विने ॥ सेवार्थं तापसान् मुक्त्वा । स्थानं
कुलपतिर्गतः ॥ ९१ ॥

इतश्च गुणसेनेन । राज्ञा परिजने निजे ॥ अकालोत्सवसौख्यान्य—नुभवत्यतिहर्षतः ।९२।
अतिक्रांते पारणका—वसरे च स्मृतं यथा ॥ पारणादिवसोऽद्यास्ति । नूनं तस्य तपस्विनः ॥९३॥
युग्मं ॥ अहो ह्यधन्यता मंद—भाग्यस्य मम निश्चितं ॥ महातपस्विनस्तस्य । संपन्ना नैव पारणा
॥ ९४ ॥ तर्कयेऽहमिति ध्यात्वै—वं पृष्टोऽनेन पार्श्वगः ॥ स किं महानुभावोऽद्य । तपस्वीहागतो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न वा ॥ ९५ ॥ युग्मं ॥ गवेषयित्वा निपुणं । ततस्तेन निवेदितं ॥ अयि देवागतोऽभूत्स । किं-
तु ज्ञातो न केनचित् ॥ ९६ ॥ देवीपुत्रसमुद्भूत्या—नंदितेऽतिप्रमत्तके ॥ परिछदेऽचामिप्राप्य ।
शीघ्रमेव विनिर्गतः ॥ ९७ ॥ युग्मं ॥ नृपेणोक्तमहो पाप—परिणामो ममास्ति हि ॥ महातप-
स्विनस्तस्य । धर्मविघ्नविधानतः ॥ ९८ ॥ देवीपुत्रोदयं चाप्या—पदमेव वितर्कये ॥ गृहेषु मंदपु-
ण्यानां । वसुधाराः पतंति न ॥ ९९ ॥ न च प्रमाददोषेण । दूषितोऽहं गतः स्वतः ॥ जवंति नि-
यमात्सत्य—प्रतिज्ञाश्च तपस्विनः ॥ ३०० ॥ अथाहं स्वमुखं तस्मै । दर्शयितुं न शक्नुयां ॥ तस्मा-
त्वं गछ नो सोम—देव शीघ्रं पुरोहित ॥ १ ॥ अज्ञापयन्मदीयत्वं । तस्य तीव्रतपस्विनः ॥ गवे-
षयित्वा वृत्तांतं । शीघ्रं मह्यं निवेदय ॥ २ ॥ किं तेन विहितं चेत्या—शंकते हृदयं मम ॥ एवं
राज्ञा समाज्ञप्तः । सोमदेवपुरोहितः ॥ ३ ॥ गतस्तपोवनं तेन । दृष्टो गिरिनदीतटे ॥ तपस्विजन-
वृंदेन । सर्वतः परिवारितः ॥ ४ ॥ जपविष्टः कुशैर्दीर्घै—र्निर्मिते गुरुसंस्तरे ॥ अमर्षवशतो राज—
कथालग्नोऽमिशर्मकः ॥ ५ ॥ पंचभिः कुलकं ॥ विनयानतशीर्षेण । सोमदेवपुरोधसा ॥ प्रणतश्च
ततस्तेना—प्याशीःपूर्वकमादरात् ॥ ६ ॥ तव स्वागतमित्युक्त्वा—दिष्टश्चोपविशेति सन् ॥ जपवि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्टः पुरस्तस्य । सोमदेवपुरोहितः ॥ ७ ॥ युग्मं ॥
प्रोक्तं चानेन भगव—न्नतिक्षीणशरीरकः ॥ लक्ष्यसे तत्किमेतद्वै । तदा प्रोचे तपस्विना ॥
॥ ८ ॥ अन्यतः प्राप्तवृत्तीनां । निरीहाणां तपस्विनां ॥ युक्तमेव कृशत्वं तु । तदा प्रोक्तं पुरोधसा
॥ ९ ॥ एवमेतन्निरीहा हि । भवंति सुतपस्विनः ॥ किंतु मुक्ताफलस्वर्ण—मणिधान्यादिवस्तुषु ॥
॥ १० ॥ न पुनर्धर्मकार्योप—कारके भोजनेऽपि च ॥ न चेदृशा जना अत्र । पात्रदानपराङ्मु-
खाः ॥ ११ ॥ ये भवादृग्मुनींद्रेभ्यः । प्रपन्नेभ्यः शिवायनं ॥ सर्वदा समचित्तेभ्यः । शत्रौ मित्रे तृ-
णे मणौ ॥ १२ ॥ संसारवार्धिपोतेभ्यः । कुर्वद्भ्यो दुष्करं तपः ॥ आहारमात्रमपि नो । प्रयच्छंति
सुभक्तितः ॥ १३ ॥ षड्भिः कुलकं ॥ अग्निशर्मर्षिणा प्रोक्तं । सत्यमेतन्न हीदृशाः ॥ इह लोका
विमुच्यैकं । गुणसेननरेश्वरं ॥ १४ ॥ पुरोधसोक्तं भगवन् । गुणसेनेन किं कृतं ॥ ज्ञायते खलु
स क्ष्मापो । लोके धर्मपरायणः ॥ १५ ॥ तपस्विनोक्तमीदृक्षः । कोऽन्यो धर्मपरः पुमान् ॥ यो नि-
र्जितस्वदेशोऽपि । हंति सम्यक्तपस्विनः ॥ १६ ॥ इति तस्य वचः श्रुत्वा । सोमदेवेन चिंतितं ॥
कुपितस्तापसो ह्येष । एभिर्वाक्यैर्विलोक्यते ॥ १७ ॥ यथा च दीर्घदर्भौघ—रचिते स्रस्तरे शुचौ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लक्ष्यते नृपविष्टोऽसौ । बहुमत्सरपूरितः ॥ १८ ॥ तथा नरेंद्रजन्येनौ—दासीन्येनैव सांप्रतं ॥ प्रतिपन्नमनेनात्र । भवेदनशनं खलु ॥ १९ ॥ युग्मं ॥ पृच्छ्यमानश्च गृह्णाति । एषोऽश्रोतव्यमेव वै ॥ अस्मत्स्वामिपरीवाद—मश्रद्धेयं मनस्यपि ॥ २० ॥ ततोऽन्यतापसादेव । वृत्तांतमुपलभ्य च ॥ एतदीयं यथा ज्ञातं । स्वामिनेऽहं निवेदये ॥ २१ ॥ इति संचिंत्य नत्वा तं । निर्गतः सोमदेवकः ॥ पृष्टश्चानेन दर्भादि—युक्तहस्तोऽन्यतापसः ॥ २२ ॥ स्नातुंकामो गिरिनदीं । प्रविशन् भगवन्ननु ॥ प्रतिपन्नं किमद्याग्नि—शर्माख्येन तपस्विना ॥ २३ ॥ युग्मं ॥ तेनापि बाष्पनीरार्द्र—लोचनेन सविस्तरं ॥ आख्यातं तदनुष्ठानं । सोमदेवो गतः पुरं ॥ २४ ॥ यथास्थितं तु भूपाय । निवेदितमनेन च ॥ ततो राजाधिकं तत्र । जातखेदो मनस्यभूत ॥ २५ ॥ स्वकीयं धारयन्नंगं । चिंताभारेण निर्बलं ॥ सकलांतःपुरश्रेष्ठि—परिवारसमन्वितः ॥ २६ ॥ पादचार्येव भूमीशो । ह्यग्निशर्मतपस्विनः ॥ प्रसादनार्थमुद्युक्तः । संप्राप्तो ऽाक्तपोवनं ॥ २७ ॥ युग्मं ॥

अत्रांतरे च विज्ञात—नरेंद्रागमनेन वै ॥ प्रफुल्लवदनाब्जेन । मुनिबालेन सत्वरं ॥ २८ ॥ नरेंद्रागमनं तस्मै । ह्यग्निशर्मतपस्विने ॥ निवेदितं ततस्तेन । क्रोधज्वलितवर्ष्मणा ॥ २९ ॥ कुल-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पतिः समाहूत । उपकारं विलंघ्य च ॥ निष्ठुरं भणितो भो भो । अस्याकारणवैरिणः ॥ ३० ॥
नृपाधमस्य वक्रं च । न शक्नोम्यवलोकितुं ॥ तदिमं प्रोच्य यत्किंचिद् । दूरादेव विसर्जय ॥ ३१ ॥
चतुर्भिः कलापकं ॥ चिंतितं हि कुलार्येण—पहतोऽयं कषायकैः ॥ युक्तमेव ततस्ताव—दस्य भू-
पत्यदर्शनं ॥ ३२ ॥ अस्येति नव्यक्रोधोदयदूषितचित्तस्येति शेषः. ततः कुलपतिः स्तोक—भूमिकां
भूपसन्मुखं ॥ गतो दृष्टश्च म्लानांगो—ऽनेन राजा स्वतंत्रयुक् ॥ ३३ ॥ राज्ञा सपरिवारेण । प्रण-
तो विनयेन सः ॥ अभिनंद्याशिषा सम्य—ग्वदतिस्म नराधिपं ॥ ३४ ॥ एतस्यां चंपकश्रेण्या—
मेहि श्रीमन्नरेश्वर ॥ मुदोपविश संशुद्धे । भूतलेऽस्मिन्निजोचिते ॥ ३५ ॥ आज्ञापयति यत्पूज्य ।
इत्युक्त्वा भूमिपादयः ॥ कुलपत्यन्विताः सर्वे । गताश्चंपकवीथिकां ॥ ३६ ॥ उपविष्टः कुलपतिः ।
शिलाधिष्टे कुशासने ॥ भूमावेव पुरस्तस्य । राजा च स परिच्छदः ॥ ३७ ॥ ततः कुलपतिः प्रोचे ।
महाराजाधुना कथं ॥ अंतःपुरपरीवार—युतेन भवता किल ॥ ३८ ॥ इयतीं भूमिकां याव—त्पा-
दैरागमनं कृतं ॥ अयोग्यमिदमाकर्ण्य । नृपेणोक्तं महामुने ॥ ३९ ॥ वयं चानुचितस्यैव । कर्तारः
स्मो भुवस्तले ॥ अथवाधमलोकानां । मादृशानाममेधसां ॥ ४० ॥ इदमेवोचितं यत्सु—प्रमादा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

स्सत्तपस्विनः ॥ जनस्य हननेनेष्ठं । धर्मविघ्नविधानकं ॥ ४१ ॥ चतुर्भिः कलापकं ॥ एतदाचरणा-
त्पूज्य । महापापं मयार्जितं ॥ क्व पुनः सोऽस्ति सुमहा—नुभावो ह्यग्निशर्मकः ॥ ४२ ॥ प्रणमा-
मि महर्षिं तं । तद्दर्शनमवाप्य च ॥ शोधयामि निजात्मानं ॥ पापकर्माधिकारिणं ॥ ४३ ॥ ऋषि-
णोक्तं महाराज । संतापं हृदि माकृथाः ॥ इयन्मात्रं न चैतेन । त्वन्निर्वेदेन सांप्रतं ॥ ४४ ॥ व्य-
धाय्यनशनं किंतु । कल्प एवायकं मुनेः ॥ यदंत्यसमये देह—स्त्यज्यतेऽनशनेन हि ॥ ४५ ॥
युग्मं ॥ राज्ञोक्तं किं बहूक्तेन । प्रेक्षे तं तापसोत्तमं ॥ ऋषिणोक्तं महाराज । सृतं तद्दर्शनेन ते ॥
॥ ४६ ॥ इदानीं ध्यानलग्नः स । तत्किं तस्येष्टकर्मणि ॥ विघ्नेन त्वं पुरीं गच्छ । पुनः कापि वि-
लोकयेः ॥ ४७ ॥ आज्ञापयति यत्पूज्य । आगमिष्याम्यहं पुनः ॥ इत्युक्त्वात्यंतविमना—स्ततो नृ-
पतिरुत्थितः ॥ ४८ ॥ नत्वा कुलपतिं सद्यः । प्रवृत्तो नगरींप्रति ॥ ततो दयावतैकेन । लघुना ता-
पसेन तु ॥ ४९ ॥ पश्चादृत्वाल्पनृभाग—मग्निशर्मतपस्विनः ॥ अभिप्रायो नरेंद्राय । तस्मै सर्वो
निवेदितः ॥ ५० ॥ ततो व्यचिंति राज्ञेह । पुनरागमनेन किं ॥ केवलं भगवानेष । प्रयासे पा-
त्यते मुनिः ॥ ५१ ॥ एष इति कुलपतिरिति शेषः. तस्मान्मे नोचितं स्थातुं । पुरेऽस्मिंश्च तप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्विनः ॥ तस्याश्रोतव्यमप्यन्यत् । श्रोष्यामीति विचिंतयन् ॥ ५२ ॥ वसंतपुरमायातो । दैवज्ञान् पृष्टवान् कदा ॥ शुद्धोऽस्माकं क्षितिप्रति—ष्टिते गमनवासरः ॥ ५३ ॥ युग्मं ॥ तत्कर्मनिपुणत्वेन । तैश्च लब्ध्वा शुभं दिनं ॥ विज्ञप्तं नो महाराज । कल्य एव विशुध्यति ॥ ५४ ॥ ततो राज्ञा समाज्ञप्तो । निजः परिजनोऽखिलः ॥ कल्ये सर्वान् प्रयाणाय । प्रवर्तयत सत्वरं ॥ ५५ ॥

ततो राजा द्वितीयेऽह्नि । भूयः परिकरान्वितः ॥ निर्गतोऽखंडप्रयाणैः । प्राप्तो मासेन तत्पुरं ॥ ॥ ५६ ॥ ऊर्ध्वीकृतध्वजव्यूहं । बहुधा भूषितापणं ॥ संशोधितसुपुष्पोप—चारराजपथं पुनः ।५७। धवलीकृतप्रासाद—मालाभिरुपशोभितं ॥ महाविभूत्या प्रविष्टः । पुरं क्षितिप्रतिष्टितं ॥ ५८ ॥ युग्मं ॥ तत्रापि तोरणश्रेणि—कृतवंदनमालकं ॥ विशेषरम्यप्रासादं । सर्वतो भद्रसंज्ञकं ॥ ५९ ॥ प्रविष्ट इति पदमिहापि योज्यं. तस्मिन्नेव दिने तत्र । चागतः सूरिशेखरः ॥ मासकल्पविहारेण । विहरन् संयमाध्वनि ॥ ६० ॥ शिष्यवर्गेण संयुक्तः । संपूर्णद्वादशांगभृत् ॥ चतुर्ज्ञानातिशयवान् । शुद्धः सर्वांगसुंदरः ॥ ६१ ॥ नवयौवनसत्कांत्या । समाश्रितशरीरकः ॥ मंडनमिव मेदिन्या । दृष्टांत इव धर्मिणां ॥ ६२ ॥ सर्वजनलोचनाना—मानंद इव मूर्तिमान् ॥ सर्वोत्कृष्टधन्यतायाः । सद्मेव व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सुधातले ॥ ६३ ॥ सर्वस्यादेयभावस्य । वासस्थानमिवाद्भुतं ॥ खनिर्वा गुणरत्नानां । क्षांतेः कुलगृहं यथा ॥ ६४ ॥ विपाकसर्वस्वमिव । स्फुरत्कुशलकर्मणः ॥ नृपवंशोद्भवः सूरि—र्नाम्ना विजयसेनकः ॥ ६५ ॥ षड्भिः कुलकं ॥ श्रेष्ठिनोऽशोकदत्तस्या—रामे शुद्धमवग्रहं ॥ मार्गयित्वा सतंत्रः स । आचार्यः समवस्थितः ॥ ६६ ॥ आरामवर्णनं यथा—यत्र सुदुर्लभविवराः । सहकारा नृपतयो व नयबलिनः ॥ पत्रफलपुष्पवृंदै—रभिरामैः संभृताः शश्वत् ॥ ६७ ॥ तस्थुरधोमुखमध्या । वापीतटपादपाः शुभाकृतयः ॥ सत्पुरुषाः परनारी—दर्शनभीता इवात्यंतं ॥ ६८ ॥ कामिदरिद्रजनानां । हृदयानीवाकुलानि भूयांसि ॥ वल्लीगृहाणि सुतरां । समंततो यत्र वर्तंते ॥ ६९ ॥ बहुविधविषयासक्ता । लोके पारंभिका इवात्यर्थं ॥ यत्रोत्तमतरुपूर्णे । निंबास्तरवो न शोभंते ॥ ७० ॥ नव्यवरा इव सुकुसुम—रक्तवसना वरा विराजंते ॥ रक्ताशोका वृक्षा । अन्येऽपि च बहुविधाः संति ॥ ॥ ७१ ॥ हिमवद्गिरिशिखराणीव । यत्र चैत्यानि संति जिनराजां ॥ बहुप्रासुकभूभागे । तत्र च भगवान् स परिवसति ॥ ७२ ॥ षड्भिः कुलकं ॥

इतश्च गुणसेनेन । राज्ञास्थानगतेन वैः ॥ पृष्टं किलाद्य केनेहा—श्चर्यं दृष्टं किमप्यहो ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ ७३ ॥ ततो विज्ञातविजय—सेनाचार्यप्रवृत्तिना ॥ पुंसा कल्याणकाख्येन । प्रोक्तं नत्वा नरेश्वरं
॥ ७४ ॥ महाराज मया दृष्ट—माश्चर्यं नगराद्बहिः ॥ राज्ञोक्तं कथय किं त—त्स प्रोवाच महीप-
ते ॥ ७५ ॥ इहाशोकवनोद्याने—ऽशोकदत्तस्य श्रेष्ठिनः ॥ संबद्धे सर्वदृष्टव्य—दर्शने सुमहोत्सवः
॥ ७६ ॥ नवीनयौवनस्थोऽपि । विकाररहितः सदा ॥ विनिर्जितरतीशोऽपि । चानुरक्तस्तपःश्रियां ॥
॥ ७७ ॥ सुमुक्तसर्वसंगोऽपि । सर्वलोकोपकारकृत ॥ लावण्योत्कर्षसंयुक्तः । सद्धर्म इव मूर्तिमान् ॥
॥ ७८ ॥ गंधारदेशभूपस्य । लक्ष्मीसेनस्य चात्मजः ॥ पौत्रः समरसेनस्य । गृहीतमुनिलिंगकः ॥
॥ ७९ ॥ सूरिर्विजयसेनाख्यो । मया दृष्टो गुणांबुधिः ॥ इति श्रुत्वा नराधीशः । कथयामास तं-
प्रति ॥ ८० ॥ अहो त्वं कृतपुण्योऽसि । त्वया प्राप्तं दृशोः फलं ॥ श्वोऽहमपि नमस्यामि । पूज्यं
मुक्त्वांतरायकं ॥ ८१ ॥ षड्भिः कुलकं ॥ अथ रात्रौ व्यतीतायां । कृतप्रत्यूषकृत्यकः ॥ गतो राजा
तमुद्यानं । दृष्टश्चानेन सूरिराट् ॥ ८२ ॥ अनेकसाधुसंयुक्तो । दीप्यमानः स्वतेजसा ॥ संपूर्णः
शारदश्चंद्र । इव तारगणैर्वृतः ॥ ८३ ॥ युग्मं ॥ ततः संजातसद्रोमो—द्गमेनातिप्रमोदतः ॥ हर्षबा-
ष्पजलापूर्ण—लोचनद्वितयेन च ॥ ८४ ॥ भून्यस्तजानुहस्तेन । प्रणतोऽनेन भूभुजा ॥ दत्तश्च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गुरुणा तस्मै । धर्मलाभोऽतिदुर्लभः ॥ ७५ ॥ शारीरमानसानेक—दुःखराशिविनाशकः ॥ शाश्व
ताक्षयसौख्यद्रु—बीजभूतो मनोरमः ॥ ७६ ॥ त्रिभिर्विशेषकं ॥ ततोऽष्टादशशीलांग—सहस्रविव
धोद्वहान् ॥ शेषसाधूंश्च वंदित्वो—पविष्टो गुरुसन्निधौ ॥ ७६ ॥ विस्मितेन च तद्रूपा—चाराज्यां
जगदेऽमुना ॥ भगवन् सर्वसंपूर्ण—मनोरथततेरपि ॥ ७७ ॥ संजातमीदृशं किं ते । भवनिर्वेद
कारणं ॥ येन त्यक्त्वा महाराज्य—मीदृशं व्रतमाश्रितः ॥ ७८ ॥ अशीति शेषः. युग्मं ॥ प्रोक्तं
विजयसेनेन । राजन्निर्वेदकारणं ॥ पृच्छसि संसृतौ यत्त्वं । सुलभं किल तत् शृणु ॥ ८० ॥ तथा
हि—नारकतिर्यग्नरकसुरभवेषु भ्रमतां जीवानां जन्मजरामरणभयं विना किंचित्सुखं किमस्ति? य
स्य जन्ममरणभयानि न भवंति स कोऽपि संसारे नारको वा तिर्यङ् वा मनुष्यो वा देवो वा कि
मस्ति? जन्मादिभिर्गृहीतानां च कथं सुखं भवति? कूटे पतितानां दृढं व्याधैर्विलुप्यमानानां मृग
बालानामिव सर्वेषां सत्वानां या लक्ष्मीः साप्यस्थिरत्वात्सुखं न करोति, तस्यां कः प्रतिबंधः? तथा
केन कर्मणा ममात्रोत्पत्तिर्जाता? अस्माद्भवात्पुनरपि क गंतव्यं? यः पुमानेतावदपि चिंतयति स
कोऽत्र संसारे निर्वेदं न प्राप्नोति? अन्यच्च—अत्र महासमुद्रमध्यगतं रत्नमिव चिंतामणिसदृशं दु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्लनं मनुष्यत्वमस्ति, तथा प्रबलपवनचालितकुशाग्रजलबिंदुवच्चंचलं जीवितमस्ति, कुपितभुजंगभीषणफणाजालसदृशाश्च कामभोगाः संति, शरज्जलधरकामिनीकटाक्षगजकर्णविद्युद्वच्चंचला च ऋद्धिरस्ति. अकृतशुभतपश्चरणानां च दारुणस्तिर्यग्नारकेषु विपाकः. अपि च—भयरोगशोकप्रियवियोगदुःखाग्निप्रज्वलिते नटनाटकसमाने संसारे कः पुमान् स्वास्थ्यं करोति? मोक्षरूपे शाश्वते स्थाने सति परममुनिभिः प्रदर्शिते तस्योपाये च सति सत्पुरुषाणां मोक्षसाधने एव यत्नो युक्तः. एवं च महाराज! संसार एव मम निर्वेदकारणं, तथापि पुनर्निमित्तमात्रमेतत्संजातमिति शृणु?—

इहैव विजये चास्ति । गंधारो नाम मंडलः ॥ नगरं तत्र गंधार—पुरं नाम मनोरमं ॥९०॥ तन्निवास्यस्म्यहं राजं—स्तत्र तिष्ठामि सर्वदा ॥ सखा विभावसुर्मेऽभूद् । द्वितीयहृदयोपमः ॥ ९१ ॥ पुरोधसः सोमवसो—स्तनयो बहुवल्लभः ॥ रोगपीडितदेहोऽभू—त्कदाचित्स च पापतः ॥ ९२ ॥ युग्मं ॥ क्रमेण मत्समक्षं सो—ऽकस्मात्कालेन संहृतः ॥ ततोऽहं तद्वियोगाग्नि—ज्वलच्चित्तः स्थितोऽभवं ॥ ९३ ॥ तावत्साधुविहारेण । विचरंतः सुसाधवः ॥ वर्षावासनिमित्तं च । चत्वारः समुपागताः ॥ ९४ ॥ स्थिताश्च नगरान्नाति—दूरे गिरिगुहांतरे ॥ प्रोक्ताश्च मे निजैर्भृत्यै—र्विज्ञायाति

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समरा-
चरित्रं
४४

प्रिया इति ॥ ७५ ॥ गिरीति गंधारगिरीत्यर्थः. गतोऽहं तान् मुनीन् नंतुं । शीघ्रमेव गुणाकरान् ॥ दृष्टाश्च तत्र ते पूज्या । लग्नाः स्वाध्यायकर्मणि ॥ ७६ ॥ प्रहृष्टवदनाब्जेन । वंदिता विनयान्मया ॥ भगवद्भिरहं धर्म—लाभोक्त्या स्वभिनंदितः ॥ ७७ ॥ सुखवार्ता मया पृष्टा । तैश्चाहमनुभाषितः ॥ कांचिद्वेलां पर्युपास्य । प्रविष्टोऽहं निजं पुरं ॥ ७८ ॥ ते च पूज्याः सर्वकाल—मेव वर्षासु चारुणा ॥ मासोपवासतपसा । जयंतीति विभावनात् ॥ ७९ ॥ उपलब्धं मया सम्य—ग्दर्शनं धर्ममुत्तमं ॥ आदिमं सर्वधर्माणां । दुर्लभं गुरुकर्मभिः ॥ ४०० ॥ युग्मं ॥ प्रवर्धमानश्रद्धस्य । सेवमानस्य प्रत्यहं ॥ व्यतिक्रांताश्च मे मासा—श्चत्वारोऽपि प्रमोदतः ॥ १ ॥ चरमायां रजन्यां मे । जाता चिंता महत्तरा ॥ कल्येऽवश्यं गमिष्यंति । ते महांतस्तपस्विनः ॥ २ ॥ ततोऽहमर्धयामाव—शेषायां निशि निर्गतः ॥ दर्शनार्थं भगवता—मुत्सुको नगराद्बहिः ॥ ३ ॥ गतश्च यावद् भूभागं । स्तोकं तावच्चचालत् ॥ जगर्ज गंधारगिरि—र्वातः सुरभिमारुतः ॥ ४ ॥ समुद्योतितमाकाशं । व्याप्तो जयजयारवः ॥ ततो जातमहानंदः । प्रस्थितोऽहं सुसत्वरं ॥ ५ ॥ यावत्पश्यामि गंधार—गिरिदर्याः समीपके ॥ तृणपत्राद्यपहृतं । भूमिपट्टं समीकृतं ॥ ६ ॥ गंधोदकं च प्रवृष्टं । विकीर्णः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुसुमोत्करः ॥ सुरसंघाः समायाताः । स्तुवंति मुनिपुंगवान् ॥ ७ ॥ तथाहि—अहो सुलब्धं मानुष्यं । भवद्भिः पुरुषोत्तमैः ॥ ध्वस्ता रागादयो दोषाः । कर्मसैन्यं निराकृतं ॥ ८ ॥ तीर्णो भवसमुद्रोऽसौ । सिद्धिः प्राप्ता सुदुर्लभा ॥ यत्रास्ति शाश्वतं सौख्य—मपौद्गलिकमद्भुतं ॥ ९ ॥ युग्मं. ततो व्यचिंति मयका । केवलज्ञानमुज्ज्वलं ॥ एषां प्रादुरभून्नूनं । मुक्ता निःशेषदुःखतः ॥ १० ॥ एते इति शेषः.

अत्रांतरे मया दृष्टाः । प्रभावात्केवलस्य हि ॥ रत्नसिंहासनासीनाः । शांतभावाश्च सर्वथा ॥ ॥ ११ ॥ केवलश्रीसमिद्धांगा । मूर्ता गुणगणा इव ॥ साधवो भगवंतस्ते । सर्वभावविदः सदा ॥ ॥ १२ ॥ युग्मं ॥ ततो हर्षाश्रुपूर्णाक्षि—युगलेन सुभक्तितः ॥ जातरोमोद्गमेनाशु । पंचांग्या प्रणता मया ॥ १३ ॥ अत्यंतशोभनाचिंत्या—वस्थामनुभवन्नहं ॥ वंदित्वा पुरतस्तेषा—मुपविष्टो महीतले ॥ १४ ॥ तदा केवलिना धर्म—कथारब्धा मनोरमा ॥ सुरा नराश्च हृदये—प्सितं पृष्टुं समुद्यताः ॥ १५ ॥ अहमेतान् भगवतः । परिपृच्छामि किं पुनः ॥ यावदेतद्विचिंतेयं । तावद् हृद्यागमत्सुहृत् ॥ मच्चित्ते शल्यभूतोऽभू—द्यो विभावसुनामकः ॥ १६ ॥ षट्पदीयं ॥ ततो व्यचिंति मय-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

का । कुतोत्पन्नोऽस्ति मे सखा ॥ पृछाम्येवं विचिंत्येति । मया पृष्टः स केवली ॥ १७ ॥ भगवन्
कोऽपि कालोऽभू—न्मृतस्य सुहृदो मम ॥ स कोत्पन्नोऽस्ति कां वाधा—वस्थामनुभवत्यहो ॥१८॥
विज्ञातमोक्षमार्गस्या—पि मे चेतसि वा कथं ॥ तद्वियोगाग्निसंजात—संतापः नोपशाम्यति ।१९।
केवलज्ञानिना प्रोक्तं । शृणु भद्र इहैव च ॥ पुरे गंधारकाख्ये हि । रजकोऽस्त्यूसदिन्नकः ॥ २० ॥
ऊसदिन्ननामा वस्त्रक्षालकोऽस्तीत्यर्थः. तस्य गेहे शुनी नाम्ना । मधुपिंगातिचंचला ॥ तस्याः कु-
क्षौ समुत्पन्नः । शूनकः सोऽभवत्खलु ॥ २१ ॥ स च बद्धोऽतिकठीन—रज्ज्वा क्षुत्क्षीणदेहभृत ॥
पार्श्ववर्तिखरिखैर—प्रहाराद्भयमादधत् ॥ २२ ॥ इहैव सांप्रतं भद्र । ह्यवस्थांतरमीदृशं ॥ दारुणं क-
र्मवशतो—ऽनुभवन् वर्तते खलु ॥ २३ ॥ युग्मं ॥ जन्मांतरे च भरते । पुष्करार्धगते तव ॥ कुसु-
मादिपुरस्थस्य । श्रेष्टिपुत्रस्य श्रीमतः ॥ २४ ॥ नाम्ना कुसुमसारस्य । पत्नी चात्यंतवल्लभा ॥ श्री-
कांतासंज्ञिकासीत्स । तदभ्यासाच्च सांप्रतं ॥ २५ ॥ तद्वियोगानलोत्पन्नः । संतापो मनसि स्थितः ॥
नोपशाम्यति नृश्रेष्ट । चिररागो हि दुस्त्यजः ॥ २६ ॥ त्रिभिर्विशेषकं ॥

ततो मयैतदाकर्ण्य—थौदासीन्यं सुविभ्रता ॥ तत्स्नेहमोहिते नैव । तस्य मोक्षणहेतवे ॥२७॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

प्रेषिता कुसदिन्नस्य । गृहं निजकपुरुषाः ॥ प्रोक्ताश्च लघु तं श्वानं । मोचयित्वा ततो मुदा ॥२८॥
सत्पानभोजने दत्वा । गृहीत्वेहैव सत्वरं ॥ आगच्छतेति तदनु । गतास्ते पुरुषाः किल ॥ २९ ॥
त्रिभिर्विशेषकं ॥ आत्माधीनं गृहीत्वा तं । शीघ्रं संपादितं मम ॥ शासनं तैः स दृष्टश्च । मयका
नातिदूरतः ॥ ३० ॥ स कीदृश इत्याह—क्षुद्रजंतुशतव्याप्त—रोमवृंदः शरीरके ॥ कृमिव्यूहकृतप्रा-
ज्य—क्षतैश्च परितोंकितः ॥ ३१ ॥ अतिक्षीणशरीरश्च । चलज्जिह्वाकरालकः ॥ दृश्यमानातिधवल
—दशनश्रेणिसंयुतः ॥ ३२ ॥ मंदं मंदं चलन् श्वान—स्तदा तं च तथाविधं ॥ पश्यतो मम सं-
जातः । संवेगो हृदये महान् ॥ ३३ ॥ त्रिभिर्विशेषकं ॥ चिंतितं च मया चित्ते । भववासोऽतिदा-
रुणः ॥ यतोऽत्र प्रेम जीवाना—मीदृक्पर्यवसानकं ॥ ३४ ॥ अत्रांतरे च मत्पार्श्वे । प्राप्तास्ते तेन
संयुताः ॥ नरा निवेदितस्तैश्च । स्वामिन्नेष स कुर्कुरः ॥ ३५ ॥ ततः स मां विलोक्य श्वा । प्रचल-
द्दीर्घपुच्छकः ॥ बाष्पांबुपूर्णनयन । उदग्रीवश्चालिताननः ॥ ३६ ॥ प्राप्यावस्थांतरं तादृ—क्किमपि
ह्यनवेद्यकं ॥ आक्रंदितुं समारब्धः । स्नेहमावेदयन्निव ॥ ३७ ॥ युग्मं ॥ ततः पूज्यो मया पृष्टः ।
किमेतद्भगवन्ननु ॥ तेन प्रोक्तं पूर्वभवा—भ्यासात्स्नेहोऽयमीदृशः ॥ ३८ ॥ मयोक्तं भगवन्नत्र ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मां जानाति किमेषकः ॥ स्वामिनोक्तं विशेषान्नो । किंतु सामान्यतः किल ॥ ३९ ॥ संसारस्य
स्वभावोऽयं । नूनमीदृश एव च ॥ यत्प्राक्तनभवाभ्यस्ता—नाभोगादपि भावना ॥ ४० ॥ अनुव-
र्तते लोकानां । कंचित्कालं शुभाशुभा ॥ इति ज्ञानिवचः श्रुत्वा । मयोक्तं भगवन्नथ ॥ ४१ ॥
कस्य कर्मण एषोऽस्ति । विपाक इति कथ्यतां ॥ ज्ञानिनोक्तं जातिमद—मानोत्पन्नस्य कर्मणः ॥
॥ ४२ ॥ मयोक्तं भगवन् मानः । कोऽनेन विदधे पुरा ॥ केवलज्ञानिना प्रोक्तं । शृणु राजतनूद्भ-
व ॥ ४३ ॥ षड्भिः कुलकं ॥

अन्यदा च प्रवृत्तेऽत्र । मदनस्य महोत्सवे ॥ विचित्रवेषयुक्तानां । पौरालीनां विनिर्गमे ।४४
वयःस्थवृंदयुक्तेन । तत्र मित्रेण तेन च ॥ प्रशंसनीयां वसंत—क्रीडां विदधता वने ॥ ४५ ॥ स-
मीपचारिणी दृष्टा । वस्त्रशोधकधोरणी ॥ दृष्ट्वा चाज्ञानदोषेण । गर्वितेन कुलादिना ॥ ४६ ॥ पा-
र्श्वेऽस्माकं कथं नीच—श्रेणिरेषा व्रजेदिति ॥ कदर्थिता विनैवाग—स्ते सर्वे वस्त्रशोधकाः ॥४७॥
मुख्योऽयमिति कृत्वाथ । तत्र गाढं विडंब्य च ॥ कुसदिन्नो निबद्धांगः । प्रापितश्चारकं ततः ।४८।
पंचभिः कुलकं ॥ अत्रांतरे गुरुमान—परिणामप्रवर्तिना ॥ बद्धं परभवस्यायु—स्तव मित्रेण तेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समरा-चरित्रं ४९

हि ॥४९॥ निवृत्ते च ततस्तस्य । मदनस्य महोत्सवे ॥ किल नागरिकैर्लोकै—रुसदिन्नो विमोचितः
॥ ५० ॥ तत्कर्मपरिणामेन । श्वतयोत्पन्न एष च ॥ मृत्वात्रैव पुरे नूनं । श्रुत्वैतच्चिंतितं मया ॥५१॥
अहो धिगस्तु संसार—वासस्य किल कारणं ॥ यत्र स्वल्पं सुखं दृष्ट—नष्टं दुःखं फलं बहु ॥५२॥
तस्मात्पृछाम्यहं ताव—द्भगवंतं किमंतकं ॥ एतन्निदानं किं चैष । भव्योऽभव्योऽस्ति वा भवे ॥५३॥
सिद्धिगामी न वा प्राप्त—बोधिबीजोऽथवा न हि ॥ विचिंत्येति मया पृष्टं । ज्ञानिना भणितं ततः
॥ ५४ ॥ युग्मं ॥ शृणु यत्पर्यवसानं । निदानमिदमस्ति तत् ॥ इतः शुनकभावात्तु । मृतः सन्नेष
एव च ॥ ५५ ॥ अस्य चैवोसदिन्नस्य । गृहे चैकास्ति गर्दभी ॥ उत्पत्स्यते हि तत्कुक्षौ । रासभ-
त्वेन भारवाट् ॥ ५६ ॥ युग्मं ॥ तद्भवे सुबहुक्लेश—मनुभूय मृतश्च सन् ॥ तद्गृहे माइदिन्नाख्य—
चंडालस्यांगनोदरे ॥ ५७ ॥ उत्पत्तिं लप्स्यते क्लीव—भावेन तदनु स्वयं ॥ निष्क्रांतः सन् कुरूप-
त्व—दौर्भाग्यादिसुदूषितः ॥ ५८ ॥ अज्ञातविषयासंगः । कंचित्कालं तथैव च ॥ जीवित्वा सिंह-
निहतो । देहं त्यक्त्वा ततः पुनः ॥ ५९ ॥ तस्या एव हि मातंग्याः । कुक्षावुत्पत्स्यते किल ॥
स्त्रीभावेन ततो गर्भा—न्निर्गता बाल्यवर्तिनी ॥ ६० ॥ बालसर्पेण दष्टा सा । मृत्वोसदि न्नधामनि ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दत्तिकाकिंकरीकुक्षौ । तदैवोत्पत्स्यते स्वयं ॥ ६१ ॥ जात्यंधक्लीबभावेन । कुब्जत्वेन च कर्मतः ॥ सर्वलोकपराभूतः । कियत्कालमतीत्य च ॥ ६२ ॥ पुरदाहेऽन्यदा जाते । वह्निना ज्वलितांगकः ॥ तस्या एव मृतो दास्याः । कुक्षावुत्पत्स्यते खलु ॥ ६३ ॥ स्त्रीभावेन समुत्पन्ना । पंगुला पीठसर्पिणी ॥ भविष्यति ततोऽत्रैव । नगरे राजवर्त्मना ॥ ६४ ॥ गच्छंती विकृतेन व्या—पादिता मत्तहस्तिना ॥ अस्य चैवोसदिन्नस्या—थो कालंजणिकास्त्रियाः ॥ ६५ ॥ कुक्षावुत्पत्स्यते स्त्रीत्वे—नैव जाता सती क्रमात ॥ संप्राप्तयौवना दत्वा । चोसदिन्नेन तत्र हि ॥ ६६ ॥ ऊसरक्षितसंज्ञाया—त्यंतदारिद्र्यभागिने ॥ कृतपाणिग्रहणा स्त्री । भूत्वा कालेन गर्भिणी ॥ ६७ ॥ प्रसूतिसमये चैव । महावेदनया मृता ॥ स्वमातुरेव कुक्षौ चो—त्पत्स्यते पुत्रभावतः ॥ ६८ ॥ संजातश्च स बालत्वे । एव गंधारभूभृतः ॥ नदीतीरे रममाण । ऊसदिन्नस्य वैरिणा ॥ ६९ ॥ चिलातनामकेनाशु । रिपुपुत्र इति स्मृतेः ॥ गृहीत्वा कंधराबद्ध—शिलः प्रक्षेप्स्यते ह्रदे ॥ ७० ॥ एतत्पर्यवसानं हि । निदानमिदमुक्तं ॥ भव्योऽयं सिद्धिगामी च । परमप्राप्तबीजकः ॥ ७१ ॥ मयोक्तं भगवंस्तत्र । जलमृत्योरनंतरं ॥ स समुत्पत्स्यते कुत्र । पुनर्भवसमूहके ॥ ७२ ॥ कदा वा बोधिसंपत्ति—र्मुक्तिसं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

१च्च निस्तुला ॥ नविष्यति तदा पूर्ण—ज्ञानिना नणितं शृणु ॥ ७३ ॥ उत्पत्स्यते व्यंतरेषु । ज-लमृत्योरनंतरं ॥ ततस्तस्मिन् नवे चैवा—नंदतीर्थकरांतिके ॥ ७४ ॥ सम्यक्त्वं शाश्वतानंद—बीजं प्राप्स्यति संगतं ॥ ततश्च कर्मवशतो । भ्रमन् गतिचतुष्टये ॥ ७५ ॥ संख्येयेषु व्यतीतेषु । नवेष्व-त्रैव मंम्रले ॥ नृपतित्वं समासाद्य । नुक्त्वा नोगान् समीहितान् ॥ ७६ ॥ विद्याधरश्रमणस्य । ग-णेरमरतेजसः ॥ पार्श्वे दीक्षां समादाय । केवलं प्राप्य सेत्स्यति ॥ ७७ ॥ त्रयोविंशत्या कुलकं ॥ तत एतत्समाकर्ण्य । हृदि चिंतयतो मम ॥ संजातः किल संवेगो । निवृत्ता नवतो मतिः ॥ ७८ ॥ भवत इति नवकारागृहादित्यर्थः.

ततोऽनुज्ञाप्य पितरौ । कृत्वा कृत्यं यथोचितं ॥ निष्क्रांत इंद्रदत्ताख्य—गणभृत्स-विधेऽहकं ॥ ७९ ॥ तस्मादेतन्महानाग । मम निर्वेदकारणं ॥ श्रुत्वेति गुणसेनेन । राज्ञोक्तं न-गवन्हो ॥ ८० ॥ कृतार्थोऽसि सुपुण्योऽसि । साधु निर्वेदकारणं ॥ यत्त्विदं नणितं ह्यासी—न्मदग्रे नवता यथा ॥ ८१ ॥ सति शाश्वते सुवासे । तस्योपाये च परममुनिनणिते ॥ सत्पुरुषाणां युक्तो । नूनं शिवसाधने यत्नः ॥ ८२ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ किं पुनस्तच्छाश्वतं स्थानं? को वा तस्य साधक उपाय इति, विजयसेनेन प्रोक्तं, हे महाराज! शाश्वतस्थानं नाम यत्र प्राणिनोऽष्टविधकर्ममलकलंकविप्रमुक्ता जन्मजरामरणरोगशोकाद्युपद्रवरहिता निरुपमज्ञानदर्शनसुखभागिनोऽनंतमागामिदीर्घकालं तिष्ठंति, तत्पुनः सकलातिशयरत्नाकरैस्त्रैलोक्यबांधवैः सुरासुरपूजितैः सर्वज्ञैर्भणितं. एतस्यैव चतुर्दशरज्ज्वात्मकक्षेत्रलोकस्य चूडामणिभूतं परमपदं स्थानमिति. साधकः पुनरस्योपायो ज्ञानचारित्रलक्षणः प्रतिपादित इति. एष च गृहिधर्मसाधुधर्माभ्यां व्यवस्थितः, तत्र गृहिधर्मो द्वादशविधस्तथाहि—पंचाणुव्रतानि, त्रीणि गुणव्रतानि, चत्वारि शिक्षाव्रतानि च. साधुधर्मः पुनर्दशविधस्तद्यथा—क्षांति १ मार्दव २ मार्जवं ३ निर्लोभता ४ तपः ५ संयमः ६ सत्यं ७ शौच ८ माकिंचन्यं ९ ब्रह्मचर्यं च १०. एतस्य पुनर्द्विविधस्यापि धर्मस्य मूलवस्तु सम्यक्त्वं, तत्पुनर्ज्ञानावरणादिकर्मसंतानवेष्टितस्य जंतोर्दुर्लभं भवतीति. तच्च कर्म अष्टधा, तद्यथा—ज्ञानावरणीयं, दर्शनावरणीयं, वेदनीयं, मोहनीयं, आयुर्नामगोत्रमंतरायं च. एतस्य पुनर्निमित्तं—मिथ्यात्वमज्ञानमविरतिः प्रमादः कषाया योगाश्चेति. एकपरिणामजनितानां ज्ञानावरणदर्शनावरणवेदनीयांतरायाणां त्रिंशत्सागरोपमकोटीकोट्यः, मोहनीयस्य च सप्त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिः, नामगोत्रयोर्विंशतिः, त्रयस्त्रिंशत्सागरोपमाण्यायुःकर्मणः स्थितिरिति. जघन्या पुनस्तथाविधप- रिणामसंचितस्य वेदनीयस्य द्वादश मुहूर्ताः, नामगोत्रयोरष्ट मुहूर्ताः, शेषाणामंतर्मुहूर्तमिति. एवं- स्थितिकस्य चास्य कर्मणो यथाप्रवृत्तकरणेन यदा घर्षणघोलनया कथमप्येकां सागरोपमकोटाकोटीं मुक्त्वा शेषाः क्षपिता भवंति, तस्या अपि च स्तोकमात्रे क्षपिते आत्मनो रागद्वेषपरिणामलक्षणो ज्ञानावरणदर्शनावरणांतरायैर्विहितसाहाय्यो मोहनीयकर्मजनितोऽत्यंतदुर्भेदः कर्मग्रंथिर्भवति. उक्तं च—गंठित्ति सुदुब्भेउ । कक्खडघणरूढगूढगंठिव ॥ जीवस्स कम्मजणिउ । घणरागदोसपरिणामो- त्ति ॥ १ ॥ तं च ग्रंथिं प्राप्तः सन्नस्ति कश्चिज्जीवो यस्तं भिनत्ति, अन्यः कश्चित्पुनर्जीवोऽस्ति यस्तं न भिनत्ति, तत्र यो भिनत्ति सोऽपूर्वकरणेन, ततस्तस्मिन् भिन्ने सत्यनिवृत्तिकरणेन कर्मवनस्य द- वानलदग्धदेशोपमं, शिवसुखपादपस्य निरुपहतबीजं, संसारकारागारमोचनसमर्थं, चिंतामणेरपि ल- घुतोत्पादकं, अनादौ संसारसागरेऽप्राप्तपूर्वं, प्रशस्तसम्यक्त्वमोहनीयकर्माणुवेदनोपशमक्षयसमुत्थं प्र- शमसंवेगनिर्वेदानुकंपास्तिक्यलिंगं, शुभात्मपरिणामरूपं सम्यक्त्वं प्राप्नोति. तल्लाभसमकालं द्वे ज्ञाने प्रादुर्भवतस्तद्यथा—मतिज्ञानं श्रुतज्ञानं च.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततस्तस्मिन् सम्यक्त्वे प्राप्ते सति स जीवो बहुकर्ममलमुक्त आसन्ननिजस्वरूपभावः प्रशांतः संविग्नोऽनुकंपातत्परो जिनवचनरुचिश्चापि भवति. उक्तं च—सम्मत्तं उवसममा—इएहिं लक्खिज्जए उवाएहिं ॥ आयपरिणामरूवं । बज्झेहिं पसज्जोएहिं ॥ १ ॥ एसुय परिणामो खलु । जीअस्स सुहोउ होइ विन्नेउ ॥ किं मलकलंकमुक्कं । कणयं भुवि सामलं होइ ॥ २ ॥ इत्यादि. ॥ ततश्च तस्या अपि स्थितेः पल्योपमपृथक्त्वमात्रे क्षीणे सति परमार्थतः शुभतरपरिणामगर्भां देशविरतिं प्रतिपद्यते, तथाहि— स्थूलप्राणातिपातविरमणं १, स्थूलमृषावादविरमणं २, स्थूलादत्तादानविरमणं ३, परदारगमनविरमणं स्वदारसंतोषं वा ४, अपरिमितपरिग्रहविरमणं च. ५. स चैवं देशविरतिपरिणामयुक्तोंगीकृताणुव्रतोऽप्रतिपतितपरिणामो न खल्विमानतीचारान् समाचरति, तथाहि—वधं १, बंधं २, छविच्छेदं ३, अतिभारारोपणं ४, भक्तपानव्युच्छेदं च ५. तथा सहसाभ्याख्यानं १, रहोऽभ्याख्यानं २, स्वदारमंत्रभेदं ३, मृषोपदेशं ४, कूटलेखकरणं च ५. तथा स्तेनाहृतं १, तस्करप्रयोगं २, विरुद्धराज्यातिक्रमं ३, कूटतुलाकूटमानं ४, तत्प्रतिरूपकव्यवहारं च ५. तथा इत्वरपरिगृहीतागमनं १, अपरिगृहीतागमनं २, अनंगक्रीडा, ३, परविवाहकरणं ४, कामभोगतीव्राभिलाषं च ५.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथा क्षेत्रवास्तुप्रमाणातिक्रमं १, हिरण्यसुवर्णप्रमाणातिक्रमं २, धनधान्यप्रमाणातिक्रमं ३, द्विपदच-
तुष्पदप्रमाणातिक्रमं ४, कुप्यप्रमाणातिक्रमं च ५. तथान्यांश्चैवंजातीयान् संसारसागरे परिभ्रमणनि-
मित्तभूतान् शुभपरिणामत्वादेव नाचरति, तथेमानेतद्रूपानुत्तरगुणांश्च प्रतिपद्यते, तद्यथा—

ऊर्ध्वदिग्गुणव्रतं, अधोदिग्गुणव्रतं, तिर्यग्दिग्गुणव्रतं च. तथा भोगोपभोगपरिमाणलक्षणं
गुणव्रतं, उपभोगपरिभोगहेतुखरकर्मपरिवर्जनं च. तथापध्यानाचरितप्रमादाचरितहिंस्रप्रदानपापकर्मो-
पदेशलक्षणानर्थदंडविरमणगुणव्रतं च. तथा सावद्ययोगपरिवर्जननिरवद्ययोगासेवनालक्षणसामायि-
कशिक्षाव्रतं च. तथा दिग्व्रतगृहीतस्य दिक्परिमाणस्य प्रतिदिनं प्रमाणकरणं देशावकाशिकशिक्षा-
व्रतं च. तथाहारशरीरसत्कारब्रह्मचर्याव्यापारलक्षणं पौषधशिक्षाव्रतं च. तथा न्यायागतानां कल्प-
नीयानामन्नपानादीनां देशकालश्रद्धासत्कारक्रमयुक्तं परमया भक्त्यात्मानुग्रहार्थाय साधुभ्यो दान-
मितिलक्षणातिथिसंविभागशिक्षाव्रतं च, प्रतिपद्यत इति सर्वत्र संबंधनीयं. स चैवं कुशलपरिणाम-
युक्तोंगीकृतगुणव्रतशिक्षाव्रतो भावतोऽपरिपतितपरिणामो न खलु समाचरतीमानतीचारान्, तद्यथा
—ऊर्ध्वदिक्प्रमाणातिक्रमं, अधोदिक्प्रमाणातिक्रमं, तिर्यग्दिक्प्रमाणातिक्रमं, क्षेत्रवृद्धिं, स्मृत्यंत-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धानं च. तथा सचित्ताहारं, सचित्तप्रतिबद्धाहारं, अपक्वौषधिभक्षणं, दुःपक्वौषधिभक्षणं, तुच्छौषधिभक्षणं च. तथांगारकर्म, वनकर्म, शकटकर्म, भाटककर्म, स्फोटककर्म, दंतवाणिज्यं, केशवाणिज्यं, रसवाणिज्यं, लाक्षावाणिज्यं, विषवाणिज्यं, यंत्रपीडनकर्म, निर्लांछनकर्म, दवाग्निदानं, असतीपोषणं, सरोद्रहादिशोषणं च. तथा कांदर्प्यं, कौकुच्यं, मौखर्यं, संयुक्ताधिकरणं, उपभोगपरिभोगातिरेकं च. तथा मनोदुःप्रणिधानं, वचोदुःप्रणिधानं, कायदुःप्रणिधानं, सामायिकस्य स्मृतेरकरणं, सामायिकस्यानवस्थितस्य करणं च. तथा आनयनप्रयोगं, प्रेषणप्रयोगं, शब्दानुपातित्वं, रूपानुपातित्वं, बहिः पुद्गलप्रक्षेपणं च. तथाऽप्रतिलेखितदुःप्रतिलेखितशय्यासंस्तारकारोहणं, अप्रमार्जितदुःप्रमार्जितशय्यासंस्तारकारोहणं, अप्रतिलेखितदुःप्रतिलेखितभूमावुच्चारप्रश्रवणयोः परिष्ठापनं, अप्रमार्जितदुःप्रमार्जितभूमावुच्चारप्रश्रवणयोः परिष्ठापनं, पौषधोपवासस्य सम्यगननुपालनं च. तथा सचित्ते निक्षेपणतां, सचित्तपिधानतां, कालातिक्रमं, परव्यपदेशं, मत्सरितां च. अन्यानप्येवंजातीयान् गुणव्रतशिक्षाव्रतातीचारान्नाचरति.

ततः स जीवोऽनेनानुरूपेण कल्पेन विहृत्य तस्याः कर्मस्थितेः परिणामविशेषेण तस्मिन्नेव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जन्मन्यनेकेषु वा जन्मसु संख्येयेषु सागरोपमेषु क्षपितेषु सर्वविरतिलक्षणं क्षमामार्दवार्जवमुक्तितपःसंयमसत्यशौचाकिंचन्यब्रह्मचर्यरूपं यतिधर्मं प्राप्नोति. तत एवमेवोपशमश्रेणिं, एवमेव च क्षपकश्रेणिमिति; उक्तं च—सम्मत्तंमि उलद्धे । पलियपुहुत्तेण सावओ होज्जा ॥ चरणोवसमखयाणं । सागरसंखंतरा हुंति ॥ १ ॥ एवमप्रतिपतिते सम्यक्त्वे देवमनुष्यभवेष्वन्यतरश्रेणिवर्जमेकभवेन च सर्वाणि प्राप्नोति. ततः क्षपकश्रेणिसमाप्तौ शाश्वतमनंतं केवलवरज्ञानदर्शनं प्राप्नोति. ततः क्रमेण क्षपितशेषभवोपग्राहिकर्मा सर्वकर्मविप्रमुक्तः प्राप्नोति शाश्वतं स्थानमिति.

अत्रांतरे च गुरुवचनश्रवणोत्पन्नशुभपरिणामानलदग्धबहुकर्मेंधनेन भावतोंगीकृतसम्यक्त्वाणुव्रतगुणव्रतशिक्षाव्रतेन गुणसेनेन राज्ञा भणितं, भगवन्! धन्योऽहं येन मया पापमलप्रक्षालनं रागादिविषविनाशनं प्रशमादिगुणकारणं भवकारागारनिस्सारणं भवद्वचनं श्रुतमिति. ततः समादिशत यूयं सांप्रतं यन्मया कर्तव्यं? अथवा समादिष्टमेव भगवता, तस्माद्देहि तावन्मह्यं गृहिधर्मसारभूतान्यणुव्रतादीनि गुणस्थानानि? गुरुणा प्रोक्तं कर्तव्यमेतत्त्वादृशानां भव्यजंतूनामिति. ततो विधिपूर्वकं तस्मै राज्ञे दत्तान्यणुव्रतानि, बहुविधमनुशासितश्च. ततः सपरिवारं गुरुं परमभक्त्या वंदि-

P.P. Ac. Gunratnasuri M.S.        Jun Gun Aaradhak Trust

त्वा राजा नगरं प्रविष्टः, कृतभोजनोपचारश्च परिणतप्राये दिवसे स पुनरपि निर्गतः, वंदिताश्चाने-
न गुरवः, कालोचितमनुशासितश्च गुरुणा, ततश्च कांचिद्वेलां विधिना पर्युपास्य पुनः पुरं प्रविष्ट इ-
ति. एवमुभयकालं गुरुदर्शनतद्वचनश्रवणसौख्यमनुभवतो मासोऽतिक्रांतः, परिणतस्तस्य धर्मः, क-
ल्पसमाप्तौ च गतोऽन्यत्र भगवान् विजयसेनाचार्य इति. ततोऽतिक्रांतेषु कतिपयदिनेषु गुण-
सेनस्य राज्ञः प्रासादतलोपविष्टस्य हाहारवगर्भितं नववयसो जनस्य मरणे प्रयाणढक्कामिवसंसा-
रराक्षसस्याट्टहासमिव जीवलोकस्य प्रमादचरितमिव मृतकर्मिंडिमशब्दं कथमपि श्रुत्वा, तं कृतां-
तवशवर्तिनं चतुःपुरुषधृतकायं क्रंदद्वधूजनपरिवारितं मृतकं विलोक्य च परमसंवेगभावितमतेरिंद्र-
जालसदृशं जीवलोकं विज्ञाय धर्मध्यानजलप्रक्षालितपापलेपस्य चिंता समुत्पन्ना वयमप्येवमेव मर-
णधर्मा इति, अहो! खल्वेवं विरसावसाने जीवलोके ते धन्या ये त्रैलोक्यबंधुभूतेऽचिंत्यचिंताम-
णिसदृशे परमर्षिसर्वज्ञदर्शिते धर्मे कृतानुरागा आगारवासादनगारितां प्रव्रजंति. ततः प्राणिवधमृ-
षावादादत्तादानमैथुनपरिग्रहविरता द्विचत्वारिंशदेषणादोषपरिशुद्धपिंडग्राहिणः संयोजनादिपंचदोषर-
हितमितकालभोजिनः पंचसमितास्त्रिगुप्ता निरतीचारव्रतपरिपालनार्थमेव पंचविंशतिभावनोपेता अ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नशनादिप्रायश्चित्तादिबाह्याभ्यंतरतपोगुणप्रधाना मासिक्याद्यनेकप्रतिमाधारिणो विचित्रद्रव्याद्यभिग्रहरता अस्नानलोचलब्धापलब्धवृत्तयः निःप्रतिकर्मशरीराः समतृणमणिलेष्टुकांचनाः, किं बहुना? अष्टादशशीलांगसहस्रधारिण उपमातीतविबुधजनप्रशंसितप्रशमसुखसमेता अनेकग्रामाकरनगरपत्तनमडंबद्रोणमुखसन्निवेशशतसंकुलां मेदिनीं विहृत्य मिथ्यात्वघनपंकमार्गप्रतिबद्धांश्च भव्यकमलाकरान् सद्धर्मकथनदिवाकरोदयेन बोधयित्वा महातपश्चरणपरिकर्मितशरीरा जिनोपदिष्टेन मार्गेण कालमासे कालं कृत्वा पादपोपगमनेन देहं परित्यजंति. ततोऽहमपीदानीमनेनैव विधिना देहं त्यक्ष्यामीति, प्राप्तश्च मया भवशतसहस्रदुर्लभः सकललोकालोकदिवाकरः शाश्वतसुखप्रदानैककल्पपादपः सकलत्रैलोक्यनिरुपमचिंतामणिः विकटसंसारजलधिपोतभूतो धर्मसारथिर्भगवान् विजयसेनाचार्यः, अतोंगीकुर्वे धीरपुरुषसेवितां कर्मवनदहनदावानलतुल्यामेतस्य समीपे महाप्रव्रज्यामिति विचिंत्य शब्दापिता अनेन सुबुद्धिप्रमुखा मंत्रिणः, कथितश्च निजाभिप्रायः. ततस्तत्प्रसंगत एवोपलब्धजिनवचनसारैस्तैर्भणितमहो महापुरुषस्वभावानुरूपं देवेनालोचितं, खरपवनचालितकमलजलमध्यगतचंद्रबिंबवच्चंचले जीवलोके कृत्यमेतद्भव्यानां, अतो यथासुखं मा कुरु प्रतिबंधमिति. अन्यच्च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हे देव! को नाम कस्यचित्सुखकारित्वं प्रपद्य तं प्रज्वलज्ज्वालावलीव्यासाद् गृहान्निस्सरंतं वारय-ति? प्रज्वलितं च सर्वदुःखज्वलनेन संसारगृहमिति, तस्मादभिमतमस्माकमेतद्देवस्य चिंतितं, असमर्थाश्च वयं बुद्धिविभवेन भवतो मरणं निवारयितुमिति.

ततो राज्ञा तदाकर्ण्यैवमेवैतत, युष्मान् विना को मम बोधकः? एवं सबहुमानमभिनंद्य प्रहृष्टमुखकमलेन राज्ञा दापितं महाघोषणापूर्वकं महादानं, कारिता भक्तिविभवानुरूपा जिनगृहादिष्वष्टाह्निकामहिमा, संमानितश्च स्वजनवर्गः, बहुमानिताः पौरजानपदा लोकाः, दत्तं चंद्रसेनाभिधानाय ज्येष्ठपुत्राय राज्यं, स्वयं भावतोंगीकृता प्रव्रज्या, प्रभाते चेतः स्थानाद्गमिष्यामि यत्र भगवान् विजयसेनाचार्य इति विचिंत्यैकांतदेशे सर्वरात्रिकया प्रतिमया स स्थितः. इतश्च सोऽग्निशर्मतापसोऽप्रतिक्रांत एव तन्निदानात्कालं कृत्वा विद्युत्कुमारेषु सार्धपल्योपमस्थितिर्देवो जातः, दत्तश्च तेनोपयोगः, किं मया कृतं वा सेवितं वा दानं वा दत्तं येनैषा दिव्या देवर्द्धिः संप्राप्तेति? विज्ञातोऽनेन पूर्वजन्मवृत्तांतः, कुपितश्च गुणसेनस्योपरि, विभंगज्ञानेन ज्ञात्वाऽऽगतस्तस्य समीपं. दृष्टश्चानेन प्रतिमया स्थितो गुणसेनः, ततश्च क्रोधमूढहृदयेन तेन कायोत्सर्गस्थितस्य नृपस्योपरि विकुर्विता न-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रकाग्निज्वलितमिवातिघोरा रजोवृष्टिः, तया च दह्यमानोऽनाकुलं महासत्वसंपन्नो जिनप्रणीते धर्मे भावितमनाः सन्नेवं चिंतयति, शारीरमानसैर्दुःखैरभिद्रुते संसारे यदिदं दुःखं तत्सुलभं, सद्धर्मप्रतिपत्तिर्दुर्लभा, धन्योऽहं येन मयाऽपारे भवसमुद्रे भवशतसहस्रदुर्लभमिदं सद्धर्मरत्नं लब्धं, प्रयत्नेन पाल्यमानस्यैतस्य प्रभावेण जीवा जन्मांतरे दुःखदौर्गत्यं न प्राप्नुवंति, तस्मादनादौ संसारेऽनाचारदोषपरिहीणं सद्धर्मलाभगुरुकं ममैतदेव जन्म सफलं, यो मया तस्याग्निशर्मतापसस्य पराभवकरणेन क्रोध उत्पादितः, स मम हृदयेऽत्यंतं संतापमुत्पादयति, यतः प्राक्कृतमकार्यं पश्चात्तपति, इदानीं पुनर्मया जिनवरवचनात्सर्वेष्वेव जीवेषु मैत्र्यंगीकृता, विशेषतोऽग्निशर्मतापसे, एवं शुभपरिणामः स भावसाधुर्गुणसेनमहाराजस्तेन पापेन विनाशितस्ततो मृत्वा सौधर्मे कल्पे देव उत्पन्नः, तत्र चंद्रानने विमाने सागरोपमायुर्जातः, इह संक्षेपतो देवानामुत्पत्तिं वक्ष्यामि—

सामान्यत एव यथा ते भवंति, यच्चाप्सरःप्रभृतयस्तेषां निर्वर्तयंति, यथोत्कृष्टं देवस्य करणीयं, यथा गगने क्षणेन मेघेंद्रधनुर्विद्युतां संभवो भवति, तथा क्षणेनैव देवानामुत्पत्तिर्भवेत्, स पुनरिदं शरीरं त्यक्त्वा निर्मले देवशयनीयेंतर्मुहूर्तेन दिव्यं शरीरं निष्पादयति, तस्मिन् समये तत्र च देवांग-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

ना मनोहराणि गेयानि गायंति, कुसुमप्रकरं च मुंचंति, दिव्यविभ्रमसंपादितकुतूहला वाद्यमानविविधमनोहरवीणादिवादित्रयुक्ता नृत्यंति, देवा अपि तस्योत्पत्तिं ज्ञात्वा हर्षितमनसः सिंहनादं कुर्वंति, सोऽभिनवोत्पन्नो देवोऽपि च शब्दरसगंधरूपस्पर्शान् दिव्यान् कामगुणान् सम्यगनुभवन् हृष्टः सन् झटित्युत्तिष्ठति देवजननयनान्यानंदयन् दिव्यं देवदूष्यं विमुंचन् भास्वरवरशरीरधरः संपूर्णशारदचंद्र इवेति. तत्र चात्यंतशोभना देवांगना हृष्टाः सत्यो मधुरवचनैर्जय जय नंदेत्यादिभिः स्तुवंति, देवा अपि परमहृष्टाः कपोलस्थलापतितकुंडलोद्योताः सुरतरुकुसुमाभरणानि बिभ्रतो जयशब्दं वदंतो नमंति. अथ तं दिव्यं परिजनं नयनाभ्यां दृष्ट्वा किं मया प्राग्भवे दत्तं वा कृतं वा यस्येदं दिव्यं फलं प्राप्तमिति संभ्रांतः सन्नुपयोगं कृत्वा च दिव्येन निर्मलेनावधिना स्वचरितं ज्ञात्वाथ देवकरणीयं करोति, किं तदित्याह—स्वविमानवर्तिसिद्धायतनस्थशाश्वतजिनप्रतिमानां महारम्यां पूजां करोति, तथा मुहूर्तमात्रं पुस्तकरत्नं वाचयति.

अथ स्वमुखनिर्जितचंद्रबिंबाः पीनोन्नतसुमंडितवरस्तनभरसुंदरांगी त्रिवलीतरंगभंगुरमध्यविराजमानहाररम्याः शब्दायमानकटिमेखलाभिनंदितविस्तीर्णनितंबबिंबास्तप्ततपनीयसदृशमनोहरोरुयुगल-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कलिता नखवृंदसमुद्योतितकूर्मोन्नतचरणशोभा गाढपरितोषप्रसृतविलासशृंगारभावरम्याः समुद्भूतमदनबाणविह्वमनसः, एवंभूता देवसुंदरीः पश्यति, अत्यर्थमनुरक्तान् दिव्यविभवसंपन्नान्, हे स्वामिन् देवभवनानि प्रेक्षयतामिति जल्पतः किंकरगणांश्च प्रेक्षते. ततः संभोगविचक्षणाभिर्देवांगनाभिः सार्धं देवभवनानि प्रेक्षते, कीदृशानीत्याह—विस्तीर्णमरकतरत्नशिलासंचयसंजनितविपुलपीठानि, मणिरत्नखचितमनोहरस्फटिकमणिभित्तियुक्तानि, वैडूर्यरत्नमयस्तंभविरचितविचित्रशालिभंजिकाशतसंयुतानि, तथा दिव्यछत्रचामरादियुक्तांतरालानि, वरविविधदेवछंदकविरचितपर्यंकशतसंयुतानि, परिलंबितपट्टांशुकमुक्तावलिजनितशोभानि, कल्पतरुकुसुममंडितकुट्टिमसंक्रांतभ्रमरचंद्राणि, धूपघटिकाकुलानि, परिलंबितरत्नदामानि. एवंभूतानि देवभवनानि पश्यति. अथ तेषु देवभवनेषु देवांगनाभिः सह पुरासुकृतपुण्यः परितुष्टमना दिव्यवरभोगान् भुंजानः स तिष्ठति. गद्यपद्यात्मना ताव—द्रचितेऽस्मिंश्चरित्रके ॥ गुणसेनाग्निशर्माख्य-नृपतापसरूपकः ॥१॥ देवताभवसंयुक्तो । ग्रथितः प्रथमो भवः ॥ क्षमाकल्याणगणिना । यथादर्शि पुरातनं ॥२॥ युग्मं. इति श्रीखरतरगछाधीश्वरजिनभक्तिसूरिशिष्यश्रीजिनलाभसूरितत्सतीर्थ्यश्रीप्रीतिसागरगणिशिष्यवाचनाचार्यसंविग्नपक्षीय श्रीमद मृतधर्मगणि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शिष्यपाठकश्रीक्षमाकल्याणगणिनिर्मिते समरादित्यचरित्रे गद्यपद्यसंस्कृतमये गुणसेनाग्निशर्मप्रबंध-
रूपः प्रथमो भवः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ द्वितीयभववर्णनं प्रारभ्यते ॥

प्रणम्य श्रीजिनाधीशान् । विश्वविघ्नविनाशकान् ॥ नृपतापसयोरेव । द्वितीयं जन्म वर्ण्यते ॥ ॥ १ ॥ तत्र तावन्महाराज—जीवो देवो यथेप्सितान् ॥ भोगान् भुक्त्वा सुरस्त्रीभि—श्चंद्राननविमानके ॥ २ ॥ रम्याभिः सह संपूर्णं । यावत्सागरमेककं ॥ यत्रोत्पन्नस्ततश्च्युत्वा । सांप्रतं तन्निशम्यतां ॥ ३ ॥ युग्मं ॥ अत्र मूलचरित्रगाथा यथा—गुणसेणअग्गिसम्मा । ज भणियमिहासि तं गयमियाणिं ॥ सीहाणंदा य जहा । जंभणियं तं निसामेह ॥ १ ॥ द्वितीये मनुष्यभवे तौ सिंहानंदनामानौ पितापुत्रौ जातौ, तथाहि—इहैव जंबूद्वीपे द्वीपे पश्चिममहाविदेहे क्षेत्रेऽपरिमितगुणनिधानं देवपुरवरानुकारि उद्यानाराममभूषितं समस्तमेदिनीतिलकभूतं जयपुरं नाम नगरमस्ति, यत्र नगरे स्त्रीजनः सुरूपो निर्मलवेषः कलाविचक्षणो लज्जालुश्च समस्ति, पुनर्यत्र पुरुषवर्गः पर-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

दारपरिभोगे क्लीवः, परच्छिद्रावलोकनेंधः परापवादभाषणे मूकः, परद्रव्यापहरणे संकुचितहस्तः, परोपकारकरणैकतल्लिप्सश्च विद्यते. तत्र च तीक्ष्णतरखड्गनिर्दलितमत्तरिपुहस्तिमस्तकोच्छलितबहलरुधिरारक्तमुक्ताफलकुसुमप्रकरपूजितसंग्रामभूमिभागः पुरुषदत्तनामा राजास्ति, तस्य च सकलांतःपुरप्रधाना श्रीकांतानाम राज्ञी विद्यते, स नृपोऽनया देव्या सह निरुपमान् भोगान् भुक्तवान्. इतश्च स चंद्राननविमानाधिपतिर्देवो निजायुः प्रपाल्य ततश्च्युतः सन् श्रीकांताया राज्या गर्भे उत्पन्नः, दृष्टश्चानया तस्यामेव रात्रौ स्वप्ने मुखेनोदरं प्रविशन् सिंहकिशोरकः, स च कीदृशः?—निर्धूमाग्निशिखाजालसदृशकेसरसटाभारभासुरो विमलस्फटिकमणिशिलाहंसहारसदृशनिर्मलधवल ईषत्पिंगलवर्तुलसुप्रशांतनेत्रश्चंद्रलेखासदृशनिर्गतदंष्ट्रो विस्तीर्णमनोहरवक्षःस्थलोऽतितनुकदेहमध्यभागः सुनिष्पन्नकटितटः कुंडलीकृतदीर्घपुच्छः सुपरिनिष्ठितोरुसंस्थानः, किं बहुना? सर्वांगसुंदर इति. ईदृशं तं सिंहबालं दृष्ट्वा सुखेन जागृतया राज्या स स्वप्नो भर्त्रे निवेदितः, तेनोक्तमनेकसामंतप्रणतचरणयुगलो महाराजशब्दस्य निवासस्थानं पुत्रस्ते भविष्यतीति. ततः सा तद्भर्तृवचः प्रतिश्रुत्य यथासुखं तिष्ठति, उचितकाले च प्राप्ते सति महापुरुषगर्भप्रभावेण तस्या दोहदः समुत्पन्नो यथा सर्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सर्वेभ्योऽभयदानं ददामि, दीनानाथकृपणेभ्यश्चैश्वर्यसंपदं प्रयच्छामि, साधुलोकानां चोपष्टंभं ददामि, सर्वजिनमंदिरेषु च पूजां कुर्वे इति, अयं दोहदस्तया भर्त्रे निवेदितश्च, अभ्यधिकजातहर्षेण तेन संपादितश्च, तस्य संपादनेन जनपदानां जातो महान् हर्षः, अपि च—सर्वैव च धन्यानां । भवत्यवस्था परोपकाराय ॥ बालविधोरप्युदयो । जनस्य भवनं प्रकाशयति ॥ १ ॥

ततश्च यथासुखेन धर्मकार्यनिरतायाः परोपकारकरणेन सुलब्धजीवितायास्तस्या अतिक्रांता नव मासाः सार्धसप्ताहोरात्रसंयुताः, ततः प्रशस्ते तिथिकरणमुहूर्तयोगे सुकुमालपाणिपादं सकलजनमनोरथैः सह श्रीकांतादेवी पुत्रं प्रसूता, निवेदितं च राज्ञे शुभंकरनाम्न्या दासीपुत्रिकया पुत्रजन्म, तत् श्रुत्वा परितुष्टो राजा तस्यै पारितोषिकं दानं ददौ, कारितं च बंधनमोचनादिकं करणीयं, प्रवृत्तश्च नगरे महानंदः, शोधिताश्च नगरमार्गाः, कुंकुमजलेन रजः शांतिं नीतं, गुंजद्भ्रमरगणसंयुतानि विचित्रकुसुमानि विप्रकीर्णानि, हट्टानां भवनानां च शोभाः कारिताः, मार्गभवनेषु वादितानि मंगलवादित्राणि, सहर्षं च नर्तितं राजलोकनागरैः. एवं च प्रतिदिनं महानंदसौख्यमनुभवतां प्रथमो मासो व्यतिक्रांतः, प्रतिष्ठापितं च तस्य बालस्य नाम दृष्टस्वप्नानुसारेण सिंह इति.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स च सिंहकुमारो विशिष्टं पुण्यफलमनुभवन् सस्नेहस्वजनानां मनोरथैः प्रजानां पुण्येनाभज्यमान-प्रसरमनुपशोभं कलाकलापपरिवर्तितच्छायं जनमनोनयनानंदकारकं यौवनं क्रमेण संप्राप्तः, अन्यदा च संप्राप्तयौवनस्य कामस्यापि हृदयानुकूलस्तरुणजनहृदयानंदकारी वसंतसमयः समागतः, यत्र मदनः सविशेषं कुसुममयधनुर्मंडलीसमारोपितबाणो रतिं दर्शयित्वा जनहृदयानि ताडयितुं प्रवृत्तः, तस्यैवानंतरं च जय जय शब्द इव कोकिलाभिः कोलाहलः कृतः, विरहाग्निदह्यमानपथिकसमूह-धूमपटलमिव सहकारेषु भ्रमरजालं विजृंभितं, गतपतिकाश्मशानज्वलनैरिव किंशुकपुष्पैः प्रदीप्तं दिग्मंडलमिति.

तत एवंविधे वसंतसमये स सिंहकुमारोऽनेकतरुणवेष्टितो महाविभूत्या क्रीडानिमित्तं गतो वरोद्यानं, मत्तकोकिलाशब्दजनिततरुणीजनचित्तविभ्रमोल्लोलं सुरभिमलयाचलपवनप्रवर्तितकुसुम-भरभज्यमानलतावृक्षजालं मदमुदितमुखरमधुकरकुलोपगीयमानाभशोभं वसंतलक्ष्म्यावासगृहमिव क्रीडासुंदरं नामोद्यानं संप्राप्य विचित्रक्रीडाभिः क्रीडितुं प्रवृत्तश्चेति. तत्रोद्याने नातिदूरदेशे संस्थि-ता कुसुमपरिमलसुगंधिवेणीभ्रमन्मधुकरावलिर्विद्रुमलतारक्तहस्तपल्लवा चलत्कोमलतनुबाहुलता क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दलीस्तंभमनोहरोरुयुगला स्थलकमलरक्तकोमलचरणयुगला ऋतुलक्ष्मीपरिकरिता उद्यानदेवतेव लक्ष्मीकांताभिधानस्य महासामंतस्य निजमातुलस्यैव पुत्री सखीजनपरिवृता वसंतक्रीडामनुभवंती कुसुमावली नाम कन्यका तेन सिंहकुमारेण दृष्टा, ततस्तां दृष्ट्वानंतभवाभ्यस्तरागदोषेण साभिला-षं प्रलोकिता, तया कन्ययैष कुमारोऽपि दृष्टः, ततः प्रदेशात्तस्य भ्रमेणैव त्वरितं त्वरितमपसरंत्यान-या कुसुमावल्या चिंतितं, कथं क्रीडासुंदरोद्यानस्य रमणीयतया भगवान् कामदेवोऽप्यत्रैव क्रीडासु-खमनुभवतीति. अस्मिन्नवसरे प्रियंकरानाम्न्या चेट्या भणितं. हे स्वामिन्यलमलमपसरणेन, एष खलु पुरुषदत्तस्य राज्ञः पुत्रस्तवैव पितृभगिनीगर्भसंभूतः सिंहो नाम कुमार इति. अयं च प्रथमा-गमनं कृतवतीं स्वामिनीमेवमपसरंतीं प्रेक्ष्य माऽदाक्षिण्यमिति संभावयिष्यति, तस्मात्स्थीयतामिह? क्रियतामस्य महानुभावस्य राजकुमारोचित उपचारः? ततो हर्षवशपुलकितांग्यानया सविभ्रमं सा-भिलाषं च कुमारमवलोक्य भणितं, हे सखि प्रियंकरे! त्वमेवात्र कुशला, तस्मान्निवेदय किं मयै-तस्य कर्तव्यमिति? तया भणितं हे स्वामिनि? वयं प्रथमागताः स्मः, तस्मादेष कुमार आसनपरि-ग्रहेणेमं प्रदेशमलंकार्यतां? सज्जनानां संबंधवृक्षबीजभूतं स्वागतमस्य क्रियतां? कालोचितवसंत-

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

कुसुमाभरणसंयुक्तं तांबूलं स्वहस्तेनास्मै दीयतामिति? तदा कुसुमावल्या प्रोक्तं, हे सखि! अति-भयेनाहमेतस्येदं कर्तुं न शक्नोमि, तस्मात्त्वमेवात्र कालोचितं कुरु? अत्रांतरे च कुमारस्तमुद्देशं प्राप्तः, तत आसनं सज्जयित्वा प्रियंकरया भणितो रतिविरहितस्य कुसुमायुधस्य स्वागतं! महानुभाव! इहोपविश्यतां? ततः स सपरितोषमीषद्विहस्यैतावत्कालमहं रतिविरहितोऽभूवं, न पुनः सांप्रतमित्युक्त्वोपविष्टः, उपनीतं च प्रियंकरिकया वासंतीपुष्पमालायुक्तं सुवर्णभाजने तांबूलं, गृहीतं च तेन कुमारेण. अत्रांतरे च कुसुमावल्याह्वाननिमित्तं तज्जनन्या प्रेषितः संभरायणो नाम कन्यांतःपुररक्षकः समागतः, तेन सा सानुरागमर्धाक्षिप्रेक्षितैः कुमारमवलोकयंती दृष्टा च, चिंतितं चानेन रतेः समीपे मदनः समागतो यदि विधिरनुकूलो भविष्यति. ततः प्रत्यासन्नमागत्य कुमारमभिनंद्य संभरायणेन भणितं, हे वत्से कुसुमावलि! त्वज्जननी मुक्तावलीदेव्याज्ञापयति, अतिबहुकालं क्रीडितं, मा ते शरीरखेदो भवतु, तस्माच्छीघ्रमागंतव्यमिति. ततः सा कन्या यन्मताऽऽज्ञापयतीत्युक्त्वा सस्नेहं कुमारमवलोकयंत्युद्यानान्निर्गता, कुमारमेव हृदि चिंतयंती निजगृहं प्राप्ता च.

ततो मातरं प्रणम्य दंतमयोपरिभागं प्रासादमारूढा, ततः कुमारमेवानुस्मरंती विमुक्तदीर्घनिः-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्वासा पर्यंकशय्यायामुपविष्टा, तया सखीसार्थः संमान्य विसृष्टश्च. निरंतरं मुक्तनिःश्वासा शय्यामभि-षेक्तुं प्रवृत्ता, मदनशरशल्यितमना निजकार्यनिवृत्तव्यापारा नालिखति चित्रकर्म, न च विलेपनं करोति, नाहारमभिलषति, नैव निजभवनं प्रशंसति, चिरपरिचितमपि शुकसारिकासमूहं नैव पाठ-यति, मनोहरान् भवनकलहंसांश्च च क्रीडयति, न च हर्म्यतले विचरति, न च गृहवाप्यां मज्जनं करोति, न च वीणामासारयति, न च कंदुकेन क्रीडति, नैव भूषणसमूहं बहुमन्यते, यूथभ्रष्टा मृ-गीव तमेवानुस्मरंती क्षणरुद्धनेत्रप्रसरा क्षणधृतदीर्घनिःश्वासा क्षणरुद्धदेहचेष्टा क्षणमुद्रितमुखकम-ला चासीत्. अत्रांतरे तस्या धात्र्या निजसुता मदनलेखानाम्नी समाज्ञप्ता, या तस्याः कन्याया द्वि-तीयं हृदयमिव वर्तते, कथं समाज्ञप्तेत्याह—यथा क्रीडासुंदरोद्यानगमनक्रीडया दृढं परिश्रांता कुसु-मावली, अद्य तया शीघ्रं च सख्यो विसृष्टाः, तस्मात्प्रविरलजलसिक्ततालवृंतं गृहीत्वा कतिपयकर्पू-रवीटकानि बध्ध्वैतस्याः समीपे गच्छेति? समादेशानंतरं च संपादितजननीवचना रणन्मणिमयनूपु-रा कुसुमावलीसमीपं मदनलेखा सहर्षा संप्राप्ता, दृष्टा च तया वरशय्यामध्यगता बहुचिंताभरेण निस्सहमंगं धारयंती कुसुमावलीति.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततोऽजल्पनाद्विज्ञातशून्यभावया मदनलेखया पृष्टा हे स्वामिनि! किमेवमुद्विग्नेव लक्ष्यसे? किमद्य ते देवगुरूणां पूजा न संपन्ना? सख्यः किं न संमानिताः? याचकजनप्रतिपत्तिः किं न कृता? कलाकलापः किं न गृहीतः? एष गुरुजनः किं न परितुष्टः? तव परिवारः किं न विनीतः? सखीसार्थः किं नानुरक्तः? किं तव वांछितं न संजायते इति? आज्ञापयतु स्वामिनी यद्यकथनीयं न भवति? ततः कुसुमावल्या ससंभ्रमं स्वहस्तेन चूर्णकुंतलान् संयम्य भणितं, प्रिये सख्यै अपि किमकथनीयमस्ति? तस्मात् शृणु? कुसुमावचयपरिश्रमेण मे ज्वरांशोऽपि च समुत्पन्नस्तज्जनितश्च परितापानलो मां पीडयति, तन्निमित्ता चांगेष्वरतिर्विजृंभते, न पुनः किंचिदन्यदुद्वेगकारणं लक्षये इति, तदा मदनलेखया प्रोक्तं यद्येवं तर्हि गृहाण तावत्कर्पूरबीटकानि? क्रीडाखेदनिस्सहं तेंगं व्यजनेन व्यजामि, तदा कुसुमावल्या भणितं, एतदवस्थां गताया मम कर्पूरबीटकैः किं? परिव्यजनेन च सृतं, त्वमेह्यावां बालकदलीगृहं गच्छावः, तत्र मदर्थमास्तरणं सज्जीकुरु? येन तत्र गताया ममैष परितापानलोऽपगच्छतीति, ततो मदनलेखया प्रोक्तं यत्स्वामिन्याज्ञापयति, गते च ते स्वभवनोद्यानतिलकभूतं बालकदलीगृहकं, सज्जीकृतं च तदर्थं मदनलेखया सुंदरमास्तरणं, स्थिता च तत्र

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुसुमावली, समर्थितानि तस्याः कर्पूरवीटकानि, विश्वासकथालापजनितपरितोषं च तालवृंतेन व्य-
जितुमारब्धा मदनलेखा, कुसुमावली पुनरप्रस्तावदत्तशून्यहुंकारा निश्चलमुक्तनिःश्वासा तमेव हृदय-
शल्यभूतं पुनः पुनरनुस्मरंती तिष्ठति.

ततो मदनलेखया चिंतितं किं पुनरस्या अस्यान्यथाविकारभावस्य कारणमिति? पृष्टा च त-
या हे स्वामिन्यस्मिंस्तरुणजनविलासोल्लोलसागरे वसंतसमये प्राप्ते सत्यद्य क्रीडासुंदरोद्यानं गछंत्या
गतया वा त्वया तत्र किमाश्चर्यं दृष्टमिति? ततो मदनावस्थास्वभावादेव मदनस्य वामत्वेन कुसु-
मावल्याऽवांछितमपि भणितं, हे सखि! क्रीडासुंदरोद्याने मया दृष्टो रतिविरहितः कुसुमायुध इव,
रोहिणीवियुक्तश्चंद्र इव, परित्यक्तमदिरश्च हलधर इव, शचीवियुक्तश्च पुरंदर इव, तप्तकांचनसदृश-
वर्णोऽतिसुंदरसुकुमालचरणांगुलिविभागोऽतिगुप्तशिरासंधानानुबद्धपिंडिकाभागो मनोहरमयूरजंघोंत-
र्निगूढजानुसंधानो मकरवदनाकारजानुमस्तकोऽतिसुंदरसुसंगतोरुयुगलो विपुलकटितटाभोगो मनो-
हरतनुमध्यभागः पुष्टविस्तीर्णवक्षःस्थल उन्नतशिखरपरिवर्तुलबाहुमूलोऽनुच्चमांसलकूर्परविभागः पीन-
कलाचिकाप्रदेश आजानुलंबितप्रशस्तरेखाविभूषितकरतल आताम्रतलिननखवृंदः सुसमायुक्ताधरपु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

टः समसुसंगतधवलदशन आरक्तविन्नागदीर्घविशाललोचन उत्तुंगनासिकावंशो विपुलललाटपट्टः सुसमायुक्तकर्णयुगलः कृष्णसुस्निग्धकुटिलकेशभारः कृतचंदनविलेपनो निर्मलदुकूलवस्त्रविराजितांगो महामुक्ताफलमालाविभूषितग्रीवो विमलचूडारत्नमंडितमस्तकः, किं बहुना जल्पितेन? रूपस्य रूपमिव लावण्यस्य लावण्यमिव यौवनस्य यौवनमिव मनोरथानां मनोरथ इव महाराजस्य पुत्रः सिंहकुमार इति.

ततो विज्ञातान्यथाविकारभावकारणया मदनलेखया चिंतितं, युक्तः खलु स्वामिन्या अनुरागोऽथवा कमलाकरं वर्जयित्वा लक्ष्मीरन्यत्र नाभिरमते, तस्यापि च सिंहकुमारस्य कामस्य रतिमिवैतां वर्जयित्वान्या कन्या नोचिता, इति चिंतयित्वानया जल्पितं, हे स्वामिनि! स कुमारः खलु निजगुणैः सुंदरोऽस्ति, यथा पुनरद्य देव्याः प्रेषणार्थं गतया मया सुबुद्धिमंत्री लक्ष्मीकांतेन राज्ञा सह मंत्रणं कुर्वाणः श्रुतः, यदि तत्तथा भविष्यति, तर्हि रतियुक्तः काम इव सर्वः सुंदरो भविष्यतीति. कुसुमावल्या भणितं कथं श्रुत इति? तयोक्तमेवं श्रुतः—अद्य सुबुद्धिमंत्रिणा भणितं, हे देव! सिंहकुमारार्थं कुसुमावलीं मार्गयतः पुरुषदत्तमहाराजस्य महानाग्रहोऽस्ति, अस्यर्थं चात्र बृ-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

त्रांते तेनाहं भणितोऽस्मि, त्वया तथा कर्तव्यं यथैषा कुसुमावली सदृशगुणेन सिंहकुमारेण संयुज्यत इति, अन्यच्च हे देव! तं कुमारं वर्जयित्वा कुसुमावल्या अन्यो वरो नोचित इति. अत्रांतरे लज्जाहर्षनिर्भरया किमप्यकथनीयमवस्थांतरं प्राप्य मिथ्याकोपकलंकसंपादनेन चंद्रसदृशवदनया कुसुमावल्या भणितं, हे सखि! असंबद्धप्रलापिनि? किमेतदेवं प्रलपसि? मदनलेखयोक्तं हे स्वामिनि! किं वात्तासंबद्धमिति? मानससरोनिवासिनो राजहंसस्य राजहंसी च किमनुचिता? ततो देवेन भणितं हे सुबुद्धे! महाराजो मम प्राणानामपि प्रभुरस्ति, ततः सुबुद्धिनोक्तं हे देव! युक्तमेतदिति. एवं च यावद्विश्वस्तमंत्रितेन तिष्टतस्तावदागतोद्यानपालिका पल्लविका नाम चेटी, विज्ञप्ता च कुसुमावली, हे स्वामिनि! देवी त्वन्मताज्ञापयति दंतमयोपरिभागं प्रासादं त्वं गच्छ? यतो देवेनाज्ञप्तमद्य भवनोद्यानं सविशेषं शोभासंपादनाभिरामं सज्जयितव्यमत्र किल महाराजपुत्रेण सिंहकुमारेणागंतव्यमिति. ततश्चैतदाकर्ण्य यद्देव्याज्ञापयतीत्युक्त्वा सहर्षं गता दंतवलभिकं प्रासादं. इतश्च सज्जितं नवोद्यानं, ततश्च सादरमुपनिमंत्र्य कुसुमावलीदर्शनोत्सुकतया वांछितागमन एवानीतः सिंहकुमारस्तस्य कृतो भोजनसंपादनादिक उपचारः, पश्चाद्भवनोद्यानं प्रविष्टः, दृष्टश्च तेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गृहसारिकारावमुखरो ऽद्राक्षालतामंडपः, नववर इवारक्तपल्लवनिवसनोपशोभितोऽशोकसमूहः, चपल-कलहंसचालितकमलश्च भवनवापीनलिनीवनखंडः, मधुकरकोकिलारावमुखरश्च सहकारनिकरः, कु-सुममधुपानमुदितभ्रमद्भ्रमरश्रेणिपरिकरितश्च माधवीलतामंडपः, नागवल्लीनिवहसमालिंगितश्च पूगव-ल्लीप्रकरः, सुगंधपरिमलावासितदिग्मंडलश्च कुंकुमगुल्मनिकरः, मधुरमारुतांदोलितं च लोचनसुखदं कदलीगृहकमिति, स्थितश्च माधवीलतामंडपे.

अत्रांतरे च मदनलेखया कुसुमावली भणिता. हे स्वामिनि! महानुभावानां स्वजनभावात् पूर्वनिर्वर्तित एव संबंधो भवति, स एव च संभाषणपुष्पतांबूलप्रदानादिना प्रकाश्यत इति, तस्मा-त्तस्मै शरीरप्रवृत्तिपृछापूर्वकमेतस्मिन् कालेऽसंभावनीयं भावं स्वहस्तारोपितप्रियंगुमंजरीकं कर्णावतंसं, कोमलनागवल्लीपत्रयुक्तं च तांबूलं, अभिनवोत्पन्नानि च कक्कोलकफलानि, निजकलाकौशलसूच-कं च किंचित्तथारूपमाश्चर्यभूतं प्रेषयेति? ततः कुसुमावल्या प्रोक्तं, हे प्रियसखि! यत्ते प्रतिभाति तत्स्वयमेव प्रियसख्यनुतिष्टतु, ततो मदनलेखया चित्रोपकरणानि चित्रपट्टिकां च समीपे नीत्वा कु-सुमावली भणिता, हे स्वामिनि! स जनः खलु चित्रानुरागी, तस्मात्स्वामिन्यत्र स्वतुल्यवरहंसकवि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युक्तां तद्दर्शनोत्सुकां च राजहंसिकामालिखतु. ततो विज्ञातमदनलेखाभिप्रायया तयेषद्विहस्य लिखिता यथोपदिष्टराजहंसिका, मदनलेखयापि च तस्या अवस्थासूचकमुपरीदं द्विपदीखंडं लिखितं, यथा—अहिणवणेहणिज्झरुक्कंठियनिरुद्धायवयणिया । सरसुमुणालदलयगासम्मि विसइ मंदाहिलासिया ॥ दाहिणपवणविहुयकमलायरएवि अदिण्णदिठिया । पियसंगमकएण उत्तम्मइ कहं वरारायहंसिया ॥ १ ॥

तत एतां चित्रपट्टिकां पूर्ववर्णितं च प्राभृतं गृहीत्वा मदनलेखा माधवीलतामंडपं गता, इयं कुसुमावल्याः प्रियसखीति परिजनाद् ज्ञात्वा कुमारेण सा सादरमभिनंदिता, ततः ससंभ्रमं तस्य कुमारस्य चरणयुगलं प्रणम्य मदनलेखया प्रोक्तं, हे महाराजपुत्र! त्वं चित्रानुरागी, ततश्चित्रानुरागिण्या कुसुमावल्या राजपुत्र्या भवतां प्रवृत्तिनिमित्तमहं प्रेषिता, तथा स्वहस्तारोपितैषाभिनवोत्पन्ना प्रियंगुमंजरी, निजनागवल्लीसमुत्पन्नदलमहर्घं च तांबूलं, अभिनवोत्पन्नानि च कक्कोलकफलानि, एतानि च क्लिष्टविशिष्टेभ्यो दीयंते, तस्मात्त्वमेव योग्य इति विचार्य स्वामिन्या प्रेषितानि, एषा चित्रगतापि राजहंसिका तव दर्शनसुखं प्राप्नोतु. इत्युक्त्वा तयोपनीतानि च. ततः कुमा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रेण सहर्षं गृहीत्वा प्रियंगुमंजरी कर्णे धृता, ईषद्व्रीमां मुक्त्वा तांबूलं समानीतं च. अत्यधिकजा-
तहर्षेण राजहंसिका प्रलोकिता, वाचितं च तस्या अवस्थासूचकमुपरि लिखितं द्विपदीखंडं. ततस्तां
बूहुसन्मानपर्याकुलवचनेनानेन मदनविकारतश्च परिस्खलन्मधुराक्षरं जणितं च, अहो तस्याश्चित्र
कौशल्यं! अथ दर्शनादेव ज्ञायमानाप्यवस्थानेन पुनरुक्तोपन्यासमात्रेण द्विपदीखंडेन पुनः किं?
तदा हृष्टया मदनलेखया प्रोक्तं हे महाराजपुत्र! एषा द्विपदी स्वामिन्या न सूत्रिता, किंत्विदं चित्रं
दृष्ट्वा मया कृतमिदं द्विपदीखंडमिति. कुमारेण जणितं प्रथमलिखितं दृष्ट्वा सखीनामवस्थानुवादक-
रणं युज्यत इति, मार्गिता चानेन पत्रच्छेदकर्तरी, कल्पितश्च नागवल्लीदले राजहंसिकावस्थानुरूपो
वरराजहंसकः, स्फुटाक्षरा चैषा हृदयसंग्रहनिमित्तं गाथा लिखिता, यथा—मरिऊण न संपत्ती।
पियाइ कलिऊण एस वरहंसो ॥ धारेइ कहवि पाणे। अनुकूलनिमित्तजोएणं ॥ १ ॥ ततो नि-
जग्रीवात उत्तार्य समुद्रसारजूता मुक्तावल्यस्यै मदनलेखायै पारितोषिकं प्रदत्ता, समर्पितं च नागव-
ल्लीदलं, ईषद्विहस्य जणिता चैषा, त्वया कुसुमावली वक्तव्या यथास्त्यस्माकं दृढं चित्रानुरागस्त्वया
ज्ञातस्तथास्माभिरपि तव चित्रकौशल्यं विज्ञातं, ततः पुनः पुनरेवमेव चित्रानुरागिणो जनस्य लि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जचित्रकौशल्यातिशयेनानंदं कुर्या इति, ततो यन्महाराजपुत्र आज्ञापयतीत्युक्त्वा प्रणामपूर्वकं म- दनलेखा निर्गता, कुसुमावलीसमीपं प्राप्ता च, आख्यातस्तथा यथा वृत्तो वृत्तांतः, समर्पितं नागव- ल्लीदलं, कुसुमावल्या दृष्टश्च वरहंसकः, वाचिता च गाथा, हृदयेन परितुष्टा, एवं च प्रतिदिनं मद- नशरगोचरापतितजनमनआनंदकारैर्विद्याधरचक्रवाकमधुकरप्रमुखचित्रपत्रौघप्रेषणैः प्रवर्धमानानुराग- योर्यावत्स्तोका दिवसा व्रजंति तावद्राज्ञः पुरुषदत्तस्य प्रार्थनया लक्ष्मीकांतेन राज्ञा सिंहकुमाराय कुसुमावली दत्तेति, निवेदितं चैतत्प्रियंकरिकया सख्या कुसुमावल्यै, यथा हे सुतनो! त्वं सिंहकु- माराय दत्ता, इत्युक्ते च बहलपुलकितायास्तस्या अंगेषु मदन इव परितोषो विजृंभितः. अत्रांतरे च याचकजनसमूहवांछिताभ्यधिकदत्तद्रव्यजातं वाद्यमानमंगलतूर्यनिघोषापूरितदिग्मंडलं नृत्यत्पणांगना- जनविवृद्धशोभं सकलजनमानसानंदकारकं द्वाभ्यामपि नरेंद्राभ्यां वर्धापनकं कृतं. ततस्ताभ्यां गणक- माकार्य दिवसो निर्धारितः, यदृच्छया पुनरपि दत्तं चात्यर्थं दानं, ततस्तस्मिन् दिवसे च प्राप्ते कुसुमा- वली राजकन्या बंधुस्त्रीभिः संयुता प्रशस्ते मुहूर्ते प्रमृक्षणार्थं मनोहरधवलदुकूलास्तृतायां रम्यायां मासंदिकायां पूर्वाभिमुखी स्थापिता, अग्रतश्चतुरस्रे मणिमयपट्टके चरणौ स्थापितौ, तत्र नापितेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्या अनवद्यं नखकर्म कारितं, ततः परिहितरक्तवस्त्राधिकविकसद्वदनकमला सा दूर्वांकुरदध्यक्षत-व्यापृतहस्ताभी रक्तवस्त्राभिरविधवाभिर्युवतीभिर्विधिना च प्रमृक्षिता, तदा पुष्पफलोदकभृतैः स्वर्ण-कलशैः स्नपिता पूर्णयत्नेन, सुप्रशस्तं सर्वांगं रूक्षीकृतं, परितोषसांद्रपुलकितैर्गुरुभिः सर्वौषधिगंधाढ्ये केशे तस्या मस्तकेऽक्षताश्च दत्ताः, ततोऽपि च शशिवदनाः स्त्रियस्तदंगे मंडनं कर्तुं लग्नाः. तथाहि —यावकरसेन प्रथमं मनोहरौ चरणौ कृतौ, तस्या निजकांतिसदृशेन च कुंकुमरागेण जंघिके मनोज्ञे कृते, तस्याः पीने स्तनकलशयुगे पत्रलेखा अभिलिखिताः, कुंकुममिश्रचंदनरसेन च मार्जितं मुखकमलं तस्याः, समदनोऽधरश्च भर्तेव सानुरागः कृतः, नवशरत्कालविकसितकुवलयदलकांति-शोभनमुज्ज्वलमपि नयनयुगलं कज्जलरजोंजितं कृतं, वसंतलक्ष्म्या इव तस्या मुखे वरतिलको निर्मितः, उपरि लतावली रचिताऽलिकवलयैः परिकरिता.

अथ कलशब्दाकृष्टस्वभवनवापीगतराजहंसे मनोहरमणिमयनूपुरे तस्याश्चरणयोर्बद्धे, तथा नखचंद्रमयूखसंमिश्रितरत्नसंजनिततद्द्विगुणशोभाभिर्मणिवेष्टिकाभिरंगुल्यो वेष्टिताः, पुनस्तस्या विस्तीर्णे नितंबबिंबे भर्तृहृदयमिव सुरतोत्सववादित्रतुल्यं मणिमेखलादाम बद्धं, तथा तस्या बाहुमू-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

लयोर्जनमनआकर्षकध्वनिविकारे मकरध्वजवागुरे इव बाहुसरिकाभिधाने बाह्वाभरणे रचिते, तथा स्तनयोरुपरि मनोहरवरपद्मरागदलघटितः प्रवरो नितंबसंलग्नो मर्कटबंधो बद्धः, तथा मुक्ताहारः स्तनयुगसंगसंजातकामराग इव कंठमवलंब्य तस्याः परिधानीयवस्त्रग्रंथिं स्पृष्टुमारब्धः, तथा कंठे विमलमनोहरमौक्तिकग्रथितमाभरणं बद्धं, तथा तस्याः कुंकुमकृतरागयोः कर्णयोश्च रत्नकुंडले बद्धे, चंद्रलेखया च वदनमुद्योतितं, तथा घनकृष्णकुटिलमनोहरशिरोरुहैः शोभमाने तस्या मस्तके विमलं चूडारत्नं बद्धं. एवं च यावत्कुसुमावल्याः सर्वांगं मंड्यते, तावन्मंडननिपुणाभिः स्त्रीभिः सिंहकुमारे मंडिते सति गृहीतशंकुच्छायैर्विज्ञातज्योतिःशास्त्रसारैर्ज्योतिषिकैः पुरुषदत्ताय राज्ञे निकटं प्रशस्तं पाणिग्रहणमुहूर्तं निवेदितं.

ततश्च सिंहकुमारो नरपतिसमाज्ञप्तपरिजनप्रवर्तितो वाद्यमानमंगलवादित्रध्वन्यापूरितसकलदिग्मंडलः पवनप्रनृत्यध्ध्वजपटव्रातसुंदररथवरारूढराजलोकपरिकरितो मनोहरनृत्योपचारनिपुणांतःपुरसुंदरीवृंदेनात्यंतरुद्धराजमार्गः परिमंडितधवलकरिवरारूढो मृगांकसेनामरसेनकुमारपरिवृतो वसंतशरत्कालाभ्यां संगतः कंदर्प इव प्रासादमालोपरि गताभिः पुरसुंदरीभिः साभिलाषमवलोक्यमानः स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लीलं विवाहमंडपं प्राप्तः, तस्य च द्वारे विशेषोज्ज्वलनव्यवेषेण गृहीतार्थसत्कारेण मातृकाजनेन धृतः, आचारोऽयमिति कृत्वा मार्गितः, ततो हर्षोत्फुल्ललोचनः कुमारो याचिताभ्यधिकं दत्वा करि-वरादवतीर्णः, तस्य च रत्नकांचीयुक्तेन सौवर्णमुशलेन भृकुटिर्भग्ना. ततो मंडपतले जनसमूहं निरुध्य यत्र च श्वेतवरदुकूलप्रच्छादिताननां वधूस्तिष्ठति तत्र वरः प्रापितः, अवरोधीनि च कौतुकानि स-लीलं कारितः, तावन्मुखछदविस्फोटनार्थं सखीभिर्याचितः, तत ईषद्विहस्य ममैवैतत्स्वकार्यमित्युक्त्वा-चारमयं दत्तं, स्फोटिता मुखछविर्दृष्टा च तेन कुसुमावली, कीदृशीत्याह—अशोकपल्लवकृतावतंसा, ईषद्विकसद्वदनकमला, भयहर्षनिर्भरा, मनोहरस्यापि मनोहारिणं कमपि तथाविधं दिव्यं विलास-विभ्रममनुभवतीति. ततः पाणिग्रहणं बांधवजनहृदयानंदजनकं गीतमंगलोद्घातं प्रारब्धं, तदा तेन कुमारेण प्रथमं सा मृडके सानुरागे हृदये गृहीत्वा, ततः समुल्लसितस्वेदजलकरे गृहीता, करे गृ-हीत्वा च मनोहरगृहभूमिभागात्प्रवरोत्सवचातुरंतं समानीता, चातुरंतवर्णनं मूलचरित्राद् ज्ञेयं. ततो दिवसलक्ष्म्या समेतो दिवसनाथो यथोदयाचलमवलगति, तथा मणिभूषणकिरणभासुरशरीरः स कुमारो राजद्विमलश्वेतवरदुकूलवस्त्रया विकसितवदनकमलया कुसुमावल्या समेतः सहर्षं चातुरंतक

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मवलम्बः, तत्र वरमुखं प्रेक्षस्वेति भणिते च धूमेनावनतमुखायास्तस्या वध्वाः पादयोः पतितं.

अत्रांतरे च जनानामुपकारः प्रारब्धः, अतिसुगंधीनि विलेपनानि दीयंते, गुंजद्भ्रमरयुक्तानि पुष्पदामानि दीयंते, अतिसुरभिगंधयुक्ताः पटवासा दीयंते, कर्पूरबीटकप्रधानानि तांबूलानि दीयंते, दुकूलचीनांशुकादिप्रवरवस्त्राणि दीयंते, केयूरहारकुंडलप्रमुखा आभरणविशेषा दीयंते, कांबोजबाल्हिकाद्यनेकदेशोत्पन्नघोटकवृंदानि दीयंते, भद्रजातीयाद्यनेकगजविशेषा दीयंते. अत्रांतरे घृतमध्वक्तैर्वह्नौ हवनविषयीक्रियमाणे वधूवरयुगलं मंडलानि भ्रमितुं प्रारब्धं. तत्र प्रथममंडलभ्रमणे च वधूपित्रा हृष्टेन सताऽघटितसुवर्णस्य भाराणां लक्षं दत्तं, द्वितीयमंडलभ्रमणे हारकुंडलकटिसूत्रादि सारमाभरणं दत्तं, तृतीयमंडलभ्रमणे तु स्थालकचोलकादिरूप्यभांडं दत्तं, चतुर्थमंडलभ्रमणे च वधूजनकेन सुष्टु महर्घं नानाप्रकारं सुबहु वस्त्रजातं प्रदत्तमिति. पुरुषदत्तेनापि च राज्ञा स्वविभवानुरूपो महर्घो जनानामुपकारः कृतः, विमलमणिरत्नमुक्ताफलसंयुक्तं बहुमूल्यमाभरणं वध्वै प्रदत्तं. एवं विवाहमहोत्सवे वृत्ते सति कालक्रमेण प्रवर्धमानानुरागं सकलजनश्लाघनीयं विषयसुखमनुभवतोस्तयोर्दंपत्योरनेके वर्षलक्षा अतिक्रांताः. अन्यदा चाश्वपरिवाहणनिमित्तं गतेन सिंहकु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मारेण नागदेवोद्याने बहुप्रासुकप्रदेशेऽनेकसाधुपरिवारितः क्षमामार्दवार्जवमुक्तितपःसंयमसत्यशौचाकिंचन्यब्रह्मचर्यगुणनिधिः प्रथमयौवनस्थो रूपादियुक्तः संपूर्णद्वादशांगीवित्स्वशिष्येभ्यः सूत्रस्यार्थं कथयन् धर्मघोषो नामाचार्यो दृष्टः, ततस्तं दृष्ट्वा तंप्रत्यतीवबहुमानो जातः, चिंतितं चानेन, धन्यः खल्वेष साधुर्यः संसारविरक्तभावः सर्वसंगत्यागी परमोपकारनिरत एव वर्तत इति, तस्मादेतस्य समीपं गत्वैनं पृच्छामि, किं पुनरस्य कंदर्पललितसमयवर्तिनो संसारनिर्वेदकारणं? यथास्थितं च दुःखसंकुलं संसारमिति.

ततो दूरादेव जात्याश्वादवतीर्य तत्समीपं गतः, सविनयं च धर्मघोषः प्रणतः, भगवता धर्मलाभेनाभिनंदितश्च. ततः शेषसाधून् वंदित्वा स्वभावसुंदरे गुरुपादमूले भक्तिनिर्भरं स उपविष्टः, पृच्छतिस्म च, हे भगवन्! सकलगुणसंपन्मंदिरस्यापि भवतः कथमीदृशो निर्वेदो येनाकाल एवेदं श्रमणत्वं प्रतिपन्नः? ततो भगवता धर्मघोषेण प्रोक्तं, भो महाश्रावक! इदानीं धर्मस्याकालो नास्ति, निर्जितसुरासुरः सकलमनोरथशैलभंगे वज्रोपमः प्रियजनवियोगैकपरमहेतुर्विबुधजनसंवेगवर्धनो मृत्युरकाले किं न प्रभवतीति? अन्यच्च हे महाश्रावक! शोभनप्रभावाच्चरमकालेऽपि यदि ध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्मः सेव्यते, स एव धर्मः प्रथममपि किमयुक्तः? राजकुमारेण भणितं भगवन्नायुक्तः, किंत्वनिमित्तो निर्वेदो न भवतीति निर्वेदकारणं पृछामि, भगवतोक्तं संसार एव निर्वेदकारणं, तथापि पुनर्विशेषतोऽवधिज्ञानिनो निजचरित्रकथनमिति, कुमारेणोक्तं भगवन्! कीदृशमवधिज्ञानिनो निजचरित्रकथनमिति? भगवतोक्तं शृणु?—

अत्रैव विजये राजपुरं नाम नगरमस्ति, तन्निवास्यहं भवस्वरूपत एव च यावत्तद्विरक्तमनास्तिष्ठामि, तावदनेकश्रमणस्वामी स्तोकदिवसोत्पन्नावधिज्ञानोपलब्धपुण्यपापोऽमरगुप्तो नामाचार्य आगतः, जातश्च लोके लोकवादोऽहोऽयं महातपस्वी, क्षीणाश्रवद्वारः, समुत्पन्नावधिज्ञाननयनः, यथास्थितधर्मदेशनालब्धिसंपन्न इति. ततस्तन्नगरस्वाम्यरिमर्दननामा राजा, अन्यश्च नगरजनपदलोकस्तस्य दर्शनार्थं निर्गतः संप्राप्तस्तस्य पादमूलं, नरपतिना नगरजनपदेन च वंदितः, भगवता नरपतिर्नगरजनपदश्च धर्मलाभेनाभिनंदितः, ततो गुरुवचनबहुमानार्थं यथायोग्ये प्रासुके धरणीपट्टे राजा नगरलोकश्चोपविष्टः, राज्ञा यथाविहारं भगवान् पृष्टश्च, पुनर्नृपेनोक्तं हे भगवन्! भवतो भूतभविष्यद्वर्तमानग्राहकमवधिज्ञानमुत्पन्नं, तस्मान्मयि प्रसादं कुरु? निजकचरितं कथय? कदा कथं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वा भगवता शाश्वतशिवसौख्यपादपैकबीजं सम्यक्त्वं देशविरतिर्वा इहभवे परभवे वा संप्राप्ता? सा-
ध्वित्वं पुनः कदा प्राप्तमिति? भगवता भणितं शृणु?—

इहैव विजये चंपावासनाम्नी नगर्यस्ति, तत्रातीतकाले सुधनुर्नाम गृहपतिरभूत्, तस्य धनश्री-
नाम गृहिणी, तयोः सोमाभिधानाहं पुत्र्यभूवं, संप्राप्तयौवना च सती तन्नगरनिवासिने नंदसार्थ-
वाहपुत्राय रुद्रदेवाय दत्ता, विवाहश्च कृतो यावद्यथानुरूपं विषयसुखमनुभवाव इति, तावत्तत्र य-
थाकल्पविहारेण विचरंती विविधतपःक्षीणदेहा श्रुतरत्नमंडिता स्वरूपधारिणी शासनदेवतेव बाल-
चंद्रा नाम गणिनी समागता, सा मया श्वशुरगृहात्पितृगृहमभिगच्छंत्या विहारनिर्गमप्रदेशे दृष्टा,
तां च पश्यंत्या मम प्रमोदः समुत्पन्नः, लोचनाभ्यां विकसितं, पापेन प्रणष्टं, अंगैरुल्लसितं, चित्ते-
न धर्मे विजृंभितं. ततो मया नातिदूरत एव विनयरचितकरतलांजल्या सबहुमानं भगवत्यभिवंदि-
ता, तयापि च सकलसुखस्य बीजभूतो धर्मलाभो दत्तः, मयातीवभक्तिप्रीतिभ्यां भगवत्याः प्रतिश्र-
यः पृष्टः, साध्वीभिः स दर्शितः, अहं यथोचितेन विधिना पर्युपासितुं प्रवृत्ता, भगवत्या कर्मवनदा-
वानलो दुःखशैलवज्राशनिः शिवसुखकल्पपादपो वीतरागदर्शितो धर्मो मह्यं प्रोक्तः. ततः कर्मक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

योपशमभावतः सम्यक्त्वं प्राप्तं, जिनोपदिष्टो धर्मो भावितः, भवबंदिगृहान्मे चित्तं विरक्तं. ततश्च रुद्रदेवः कर्मदोषेण प्रद्वेषं कर्तुमारब्धः, तेन च कथितमेवं, विषयसुखविघ्नकारिणं धर्मं परित्यज? ततो मयोक्तं मम विषयसुखैरलं, जीवलोकस्थितिरतिचंचला वर्तते, विषयप्रमादस्य विपाकश्च दारुणोऽस्ति. तेनोक्तं केनचिद्वंचिता त्वं, दृष्टं परित्यज्यादृष्टे रतिं मा कुरु? मयोक्तं किमत्र सुखं दृष्टं? पशुगणसाधारणा इमे विषयाः, धर्मश्च प्रत्यक्षोपलभ्यमानसुखफलः कथमदृष्ट इति? ततः स मय्येवमभिलप्यमानोऽधिकतरं प्रद्वेषमापन्नो मया सह संभोगस्तेन परित्यक्तश्च. नागदेवाभिधस्य सार्थवाहस्य पुत्री नागश्रीनाम कन्यका च याचिता, परं मत्पितुर्बहुमानेन नागदेवसार्थवाहेन न दत्ता, तदा रुद्रदेवेन चिंतितमेतया जीवंत्याहं कन्यकां न प्राप्नोमि, तस्मादेनां व्यापादयामि. ततो मायाचरितेन क्वापि घटगतं सर्पं कृत्वैकदेशे संस्थाप्य संध्यासमयेऽतिक्रांते कामिनीजनसमागमनकाले च संप्राप्ते सति तेनाहं भणिता, अस्मान्नवीनघटात्पुष्पमालां मे उपनयेति? ततोऽहं तस्य मायाचरितमजानती घटसमीपं गता, तस्य द्वारपिधानं दूरीकृतं, ततो हस्तं क्षिप्त्वा भुजंगो गृहीतः, तदा तेनाहं दष्टा, ततस्तं ससंभ्रमं परित्यज्य भयव्याकुलांगी तस्य समीपं प्राप्ता, सर्पेणाहं दष्टेति रुद्रदेवाय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रोक्तं, मायाप्रमाणतश्च रुद्रदेव आकुलीभूतो निरर्थकमेव कोलाहलं कर्तुं प्रारब्धः. अत्रांतरे च मेंगैर्विशीर्णं. संधिभिर्विकलितं, हृदयेनोद्वर्तितमेव. परवशा च सती धरणीतले निपतिता. अतःपरमचिंतनीयमवस्थांतरं प्राप्य पूर्वसम्यक्त्वप्रभावतो देहं त्यक्त्वा सौधर्मे कल्पे लीलावतंसके वरविमानेऽहं पल्योपमस्थितिर्देवत्वेनोत्पन्नास्मि, तत्र च वरदेवांगनापरिगतो दिव्यान् भोगानुपभुनज्मि. अथ रुद्रदेवोऽपि तां नागदत्तसार्थवाहपुत्रीं परिणीय तया सार्धं यथानुरूपान् भोगानुपभुज्य प्रांते कालं कृत्वा रत्नप्रभायां पृथिव्यां खक्खडनाम्नि नरकावासे पल्योपमायुष्क एव नारक उत्पन्न इति. ततोऽहं यथायुष्कमनुपाल्य च्युतः सन्नत्रैव विजये सुसुमारगिरौ हस्तितयोत्पन्नः, कलभकावस्थां संप्राप्तश्च. अत्रांतरे चेतरोऽपि नरकादुध्धृत्य तस्मिन्नेव गिरिवरे शुकपक्षितयोत्पन्नः, बालभावमतिक्रांतश्च. अथ तेन तस्मिन्नेव गिरिवरे स्वभावरमणीयेषु नववनेषु हस्तिनीसमुदायपरिवृतः सलीलं परिभ्रमन् दृष्ट इति.

ततो मां दृष्ट्वा पूर्वभवाभ्यासादुत्कटकर्मोदयतश्च ममोपरि वैरपरिणामः संप्राप्तः, चिंतितं च तेनैष हस्त्यस्माद्भोगसुखात्कथं वंचनीय इति? उपायान् गवेषयितुं स आरब्धवान्. अन्यदा लीलार-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तिर्नाम विद्याधरो मृगांकसेनस्य विद्याधरस्य भगिनीं चंद्रलेखाभिधानामपहृत्य तद्भयादेव तमुद्देशं समागतः, स शुकस्तेन भणितश्च, अहमत्र गिरिनिकुंजे तिष्ठामि, अथैको विद्याधरश्चागमिष्यति, त्वया तस्मै अहं न कथनीयः, गतश्च स मह्यं कथनीयः, ततस्ते कंचित्प्रतिरूपमुपकारं करिष्यामि, एवं कृते त्वया सुष्टु मे उपकृतमित्युक्त्वा विकटतटसंस्थितं गिरिनिकुंजं सोऽवतीर्णः. शुकोऽपि तस्मिन्नेवोद्देशे नारंगवृक्षशाखागते नीडे तिष्ठति यावन्मृगांकसेन आगत्य गतः. अत्रांतरे च हस्तिनीपरिवृतोऽहं तमुद्देशमागतः, ततो मां दृष्ट्वा शुकेन चिंतितं सांप्रतं मम वांछितस्यावसरोऽस्ति. ततो मायाबहुलेन तेन स्वस्त्रिया सहालोच्य मम कर्णगोचरे प्रोक्तं, हे सुंदरि! मया ज्ञानिनो विशिष्टमहर्षेः समीपे श्रुतमस्ति, यथेह सुसुमारपर्वते सर्वकामितं नाम पत्तनमस्ति, यो यमभिलष्य पतति, स तत्क्षणेनैव तं प्राप्नोतीति, ततोऽनया पृष्टं हे भगवन्! क्व पुनः स उद्देशः? तेनोक्तं यथास्य सालतरुवरस्य वामपार्श्वेनेति, अतोऽनेन तिर्यग्भावेनालं, एहि त्वं? विद्याधरभवनप्रणिधानं कृत्वा तत्र निपतावः. इदं शुकवचस्तत्पत्न्या चांगीकृतं, तमुद्देशं द्वावपि गतौ, प्रणिधानं कृत्वा च गिरिनिकुंजे निपतितौ, तत्र स्थिताय लीलारतिविद्याधराय च ताभ्यां प्रोक्तं. ततश्चंद्रलेखया सह गग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नतलमलंकुर्वन् लीलारतिः समुत्पतितोऽस्माभिर्दृष्टश्च, तदा मे चिंता समुत्पन्ना, अहो सर्वकामित-पत्तनानुभावो यदेतच्छुकयुगलं कृतविद्याधरप्रणिधानमिह निपत्य तत्क्षणादेव विद्याधरयुगलं संजातं, तस्मादस्माकमप्यनेन तिर्यग्भावेन सृतं, ततो देवप्रणिधानं कृत्वा वयमप्यत्र निपताम इति. एवं च संप्रधार्य प्रणिधानं कृत्वा वयं तत्र निपतिताः, अत्रांतरे च शुकयुगलमुत्पतितमस्माभिर्न लक्षितं. ततः संचूरितांगोपांगोऽहं क्लेशमनुभूयाकामनिर्जरया कर्म क्षपयित्वा कुसुमशेखराभिधाने व्यंतरभौ-मनगरे देशोनपल्योपमायुर्व्यंतरदेवः समुत्पन्न इति. तत्र चाहमुदारान् भोगानुपभुनज्मि, यावदित-रोऽपि शुकत्वान्मृत्वा रत्नप्रभायामेव पृथिव्यां लोहितमुखाभिधाने नरकावासे देशोनपल्योपमस्थि-तिर्नारकः समुत्पन्न इति.

ततोऽहं निजायुः परिपाल्य च्युतः सन्नत्रैव विदेहेऽन्यस्मिन् विजये चक्रवालपुरे नगरेऽप्रतिह-तवाक्यस्य सार्थवाहस्य सुमंगलाया भार्यायाः कुक्षौ पुत्रत्वेनोत्पन्नः, कालक्रमेण जन्म च संप्राप्तः, चक्रदेव इति मम नाम च प्रतिष्ठापितं, बालभावं प्राप्तश्च. अत्रांतरे च शुकनारको नरकादुध्धृत्य तत्रैव नगरे सोमशर्माभिधाननृपपुरोहितस्य नंदिवर्धनाख्याया भार्यायाः कुक्षौ पुत्रत्वेनोत्पन्नः, ज-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न्म च संप्राप्तः, यज्ञदेव इति च तस्य नाम प्रतिष्ठापितं, कुमारभावं प्राप्तश्च. अत्रांतरे च मम तेन सह सद्भावतः प्रीतिर्जाता, तस्य तु कपटेन ततः पूर्वभवाभ्यस्तकर्मदोषेण स वक्रः सरलस्यापि मम संपन्मत्सरी वंचनाछलेन छिद्राणि गवेषयितुमारब्धः, तान्यलभमाने च तेन परिचिंतितं, एष एवं छलयितुं न शक्यते, तस्मादेवैष उपायोऽस्ति, चंदनसार्थवाहगृहं मुषित्वैतस्य गृहे द्रव्यं मुक्त्वा पश्चात्केनचिदुपायेन राज्ञे निवेद्यास्य संपदो मोषयिष्यामीति, अनेन यथाचिंतितं कृतं च, मद्गृहे द्रव्यं समानीय भणितं, हे मित्रैतत्प्रयत्नेन संगोपय? मयापि चाकालानयनजातशंकेनाप्यनिछताप्येतस्य दाक्षिण्यबहुलतया संगोपितमिति. नगरे लोकशब्दः प्रवृत्तश्च यथा चंदनसार्थवाहस्य गृहं मुषितं, ततो मम हृदये आशंका जाता, एतन्निश्चितं तदेव द्रव्यं भविष्यतीति. ततोऽहं यज्ञदेवसमीपं गतः, मया स पृष्टश्च कथमेतद्व्यवस्थितं? तेनोक्तं मान्यथा विचिंतय? पितुर्भयेन मयैतद्द्रव्यं भवते समर्पितं, न पुनरन्यथेति. ततो मम शंकापगता. अत्रांतरे च चंदनसार्थवाहेन राज्ञो ज्ञापितं, यथा हे देव! मम गृहं मुषितं, किमपहृतमिति राज्ञा पृष्टे चंदनेन निवेदितं, राज्ञा च पत्रे लिखितं. पुनस्तेनोक्तमरे! पटहेनाघोषयत? यथा चंदनसार्थवाहगृहं मुषितं, इदं द्रव्यजातं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समरा-
चरित्रं
ए१

चापहृतं, तस्माद्यस्य गृहे केनचिद्व्यवहारयोगेन तद्द्रव्यं ऽन्यदेशो वा समागतो भवेत्स चंमशासनाय राज्ञे निवेदयतु, अज्ञापितप्राप्तौ च राजा सर्वधनापहारेण शरीरदंडेन च दंडयिष्यतीति. तत आघोषणं प्रवृत्तं, घोषणे चातिक्रांते पंचसु दिनेषु गतेषु यज्ञदेवेन राज्ञे ज्ञापितं, यथा हे देव! मित्रदोषप्रकाशनं न युक्तमेव, किंत्विहलोकपरलोकविरुद्धसेविनाहिताचरणत आत्मनोऽप्यमित्रेण मित्रेण ममालं, जानता सता राज्ञे जनाय चाहितं नोपेक्षणीयं, तत ईदृशमपि देवाय निवेद्यते, राज्ञा भणितं भवान् भणतु, यज्ञदेवेनोक्तं हे देव! शृणु? मया चक्रदेवपार्श्ववर्तिपरिजनात् श्रुतं, यथा चंदनसार्थवाहगृहं चक्रदेवेन मुषितं, निजगृहे तद्द्रव्यं संगोपितं च, अथ देवः प्रमाणमिति. राज्ञोक्तं हे आर्य? एतदसंभावनीयं, स निश्चितं कुलप्रसूतोऽस्ति, कथमिदमत्यंतविरुद्धं करिष्यति? यज्ञदेवेनोक्तं हे देव! अज्ञानलोभवशवार्तिनां किमप्यसंभावनीयं नास्ति, कुलस्य च को दोषः? सुरभिकुसुमेषु किं कृमयो न भवंति? तस्मात्तावत्केनापि प्रकारेण तस्य गृहं विलोकय? ततो युक्तमेतदिति विचिंत्य चंडशासनेन राज्ञा तत्करणं समाज्ञप्तं, कारणिका भणिताश्च, नगरप्रधानपुरुषैः सह चंदनसार्थवाहभांडागारिकं गृहीत्वा चक्रदेवस्य गृहे तन्नष्टं द्रव्यं प्रलोकयतेति?

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततोऽनेनासंभावनीयेन किमथवादेशकारिणो वयमिति मंत्रयित्वा नगरप्रधानलोकान् मेलयित्वा चंदनसार्थवाहभांडागारिकं गृहीत्वा प्रहरमात्रे दिने नगरप्रधानजनाधिष्ठिताः कारणिका मे गृहं समागता इति, तैरहं पृष्टश्च हे सार्थवाहपुत्र! केनापि किंचिदेवंजातीयं द्रव्यं व्यवहारयोगेन तव नोपनीतमिति? ततो मयाऽसंजातशंकेनोक्तं न हि न हि, तैर्भणितं त्वया कोपो न कार्यः, इयं नृपाज्ञास्ति यत्त गृहमवलोकनीयमिति, मयोक्तं नात्र कोपस्यावसरः, महाराजस्य समारंभः प्रजापरिरक्षणनिमित्तमेव.

ततो नागरवृद्धैः सह राजपुरुषा मे गृहं प्रविष्टाः, तत्र च तैर्नानाप्रकारं द्रविणजातं विलोकितं, पुनः प्रयत्नस्थापितं चंदननामांकितं हिरण्यभाजनं दृष्टं, तद्बहिर्नीत्वा चंदनभांडागारकाय दर्शितं, तेन च तदवलोक्य सदुःखमिव भणितं, तत्सदृशं तावदेतद्विलोक्यते, न पुनर्निस्संदेहं विजानामीति. कारणिकैरुक्तं तावदपहृतद्रव्यनिवेदनपत्रकं वाचय? तत्र किमिदमीदृशं लिखितं न वेति? पत्रकं वाचितं, लिखितं दृष्टं, नागरकारणिका लोका भयं प्राप्ताः, तैर्भणितं च हे सार्थवाहपुत्र! तवेदं कुतः? ततो मया चिंतितं सद्भावस्थापितं मित्रन्यासं कथं प्रकाशयामि? तेनापि कथ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मप्येष एवमेव संप्राप्तो भवेत्तस्मात्स्वप्राणरक्षणेन मित्रप्राणान् कथं विनाशयामीति विचिंत्य मयोक्तमेतद्भाजनं मदीयमेवेति. तदा तैरुक्तमेवं तर्हि चंदननामांकितं कथं? मयोक्तं न जानामि कथंचिद्भाजनपरावर्तो भविष्यति, तैर्भणितं किंसंख्याकं? किं वा हिरण्यजातमत्रास्ति? मयोक्तं न सुष्टु स्मरामि, यूयं स्वयमेव पश्यत? कारणिकैरुक्तं पत्रकं वाचय? किंद्रविणयुक्तं किंसंख्याकं वा तच्चंदनसार्थवाहभाजनमिति? पत्रकं वाचितं यावद्दीनारद्रविणयुक्तं दशसहस्रसंख्याकं च, ततस्तैस्तद्भाजनं छोटयित्वा विलोकितं, पत्रकलिखितोऽर्थो मिलितः, नागरकारणिका विस्मिताः, तैः परिचिंतितं च, अस्खलितवाक्ये सार्थवाहपुत्रे चक्रदेवे कथमेवं भविष्यतीति? पुनरपि स पृष्टः, हे सार्थवाहपुत्र! नेदृश्याज्ञेयं, तस्मात्प्रकटार्थं कथय? तवेदं कुतः? ततो मया तदेवानुचिंत्य तदेवोक्तमिति. तदा तैरेव दैवं धिगस्त्वित्युक्त्वा भणितं, अन्यदपि किंचित्परकीयं तव गृहे न तिष्ठति? मयोक्तं न किंचित, ततस्तैः पत्रकं वाचयित्वा सविशेषं मे गृहं विलोकितं, यथावाचितं च समस्तमेव द्रव्यं दृष्टं, अत्रांतरे च कोट्टपालपुरुषा ममोपरि कुपिताः, तैश्चाहं नरपतिसमीपं नीतः, सर्वोऽपि वृत्तांतः प्रोक्तश्च, तदा राज्ञाहं भणितः, हे सार्थवाहपुत्र! विज्ञातोभयलोकमार्गस्त्वं, तस्मात्त्वयीद-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

मीदृशमसाधुचरितमसंभावनीयं न संभावयामीति? तस्मात्त्वं कथय कोऽत्र परमार्थ इति? ततो मया तदेव चिंतयित्वा बाष्पजलव्याप्तलोचनेन सता नृपतेः पुरतो न किमपि जल्पितं. ततः समुत्पन्नाशंकेनापि राज्ञा तातबहुमानतो दुर्वचनमभाषित्वा कदर्थनां चाकृत्वा मम देशान्निष्कासनं समाज्ञप्तं, ततश्चाहं राजपुरुषैर्नगरान्निष्काशितो नगरदेवतावनसमीपे मुक्तश्च, राजपुरुषाः प्रतिनिवृत्ताः, मम चिंता समुत्पन्ना एतावत्पराभवभाजनेनाद्यापि जीवितेन किं? तस्मादेतस्मिन्नगरदेवतावनसमासन्ने वटवृक्षे आत्मानमुल्लंबयामीति विचिंत्य वटसमीपं प्राप्तः.

अत्रांतरे च कथंचिदिमं व्यतिकरमवधिज्ञानेन ज्ञातवत्या नगरदेवताया ममोपर्यनुकंपा समुत्पन्ना, तदा नृपजननीशरीरे प्रविश्य तयैवं यथास्थितमेव सर्वं राज्ञे निवेदितं, अनया राजा भणितश्चामुके नगरोद्यानसमीपवटवृक्षे चक्रदेव आत्मानमुद्बंधनेन परित्यक्तुं व्यवसितोऽस्ति, तस्मात्त्वं शीघ्रं निवारय? संमान्य च नगरं प्रवेशयेति? ततः क्रोधस्नेहाकुलतया संकीर्णं रसमनुभवन् राजा अरे गृह्णीत गृह्णीत दुराचारं यज्ञदेवमित्यादिश्य प्रधानवाहनारूढो यथासंनिहितपरिजनेन सह त्वरितं त्वरितं नगरान्निर्गतः, नगरोद्यानं प्राप्तश्च, वटवृक्षशाखागत उत्तरीयनिबद्धपाशे स्थापितया ग्रीव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यात्मानं प्रबाधितुंकामोऽहं राज्ञा दृष्टः, ततः स दूरत एव संभ्रमातिशयेन भो चक्रदेव! मा साहसं मा साहसमिति कथयन् वटसमीपं प्राप्तः, स्वयमेव पाशोऽपनीतः, करे गृहीत्वाहं स्वपार्श्वे स्थापितः, सबहुमानं भणितश्च, भो सार्थवाहपुत्र! युक्तं नाम तव मया पृष्टस्यापि सद्भावाकथनमिति. ततो मया चिंतितं, हंत! किमेतदिति. केनचिन्मित्रगुह्यं प्रकाशितं भविष्यति. अत्रांतरे च राज्ञोक्तं भो सार्थवाहपुत्र! एष व्यतिकरो भगवत्या नगरदेवतया मम मातुः शरीरं प्रविश्य मह्यं प्रोक्तः, यथा त्वं निर्दोषः, दोषकारी पुनरत्र दुराचारो यज्ञदेवोऽस्ति, तस्मात्त्वया क्षंतव्यं यन्मयाऽज्ञातपरमार्थेन त्वं कदर्थितोऽसीति. ततो यज्ञदेवो महाकष्टं संप्राप्त इति विचिंत्य मया राजा भणितो हे देव! राजधर्मोऽयं, प्रजापरिरक्षणोद्यतस्य देवस्य नास्ति दोषः, देवेन यज्ञदेवस्य मूलशुद्धिरपि गवेषणीया, तस्मिन् महानुभावेऽनाचरणा न संभाव्यते, राज्ञोक्तं मूलशुद्धिर्गवेषिता, भगवत्या नगरदेव्या प्रोक्तं, सर्वमिदं तेन पापेन विहितमिति देव्युक्तं राज्ञा चक्रदेवाय कथितं, तथा तव दोषप्रकाशनेन मम चित्ते स्थितं चेत्युक्त्वा यज्ञदेवकथितवृत्तांतोऽपि तेन प्रोक्तः, तदा मया चिंतितं हंत! किमेतदसंभावनीयं? अत्रांतरे च राजपुरुषैर्बध्ध्वा यज्ञदेव आनीतो राज्ञे निवेदितश्च, राज्ञा प्रोक्तमरे!

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

एतस्य जिह्वां छित्वा लोचने उत्पाटयत? तदा यज्ञदेवो विषण्णः, ततो मया चरणयोर्निपत्य राजा विज्ञप्तो हे देव! एषोऽपराधः क्षम्यतां? यज्ञदेवो मुच्यतां? राज्ञोक्तं हे सार्थवाहपुत्र! न युक्तमेतदेष खलु दुराचारो वर्तते, तस्मादन्यद्विज्ञपयेति? मयोक्तं देवान्येनालं, यदि ममोपरि देवस्य बहुमानोऽस्ति, तर्हीदमेव संपादयतु देवः, राज्ञोक्तमलंघनीयवचनस्त्वमिति त्वमेव जानासि, ततो मया देवप्रसाद इति भणित्वा तच्चरणयोः पतित्वा यज्ञदेवो मोचितः.

ततोऽहं राज्ञा संमान्य निजकमंदिरं प्रेषितो महत्या विभूत्या स्वगृहं गतः, अहो यज्ञदेवस्याधमत्वमिति लोकवादश्च जातः, मम निर्वेदश्च समापन्नः, पश्यत? ईदृशानामपि मित्राणामीदृशः परिणामः, अहो संसारस्यासारता, कर्मपरिणतेश्च विचित्रता, प्राणिचित्तानि दुर्लक्ष्याणि, तस्मान्न जानीमः किमत्र युक्तमिति? अत्रांतरे च सुगृहीतनामाग्निभूतिर्नाम गणधरस्तत्र समागतः, नगरोद्याने स्थितश्च, बहिर्गतेन मया दृष्टः, तंप्रति मम बहुमानश्च संजातः, स मया प्रणतः, तेन मह्यं धर्मलाभो दत्तः, अहं तस्य पादमूले उपविष्टः, सर्वदुःखविघटनसमर्थं धर्मं मया स भगवान् पृष्टः, भगवता च क्षमादिकः साधुधर्मः प्रोक्तः, तं धर्मं शृण्वतो मम देशविरतिपरिणामः समुत्पन्नः, प्रवर्ध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मानसंवेगस्य च मम भवविरक्तता जाता, मया च चिंतितं संसारप्रवर्धनमात्रफलेनानेन परिक्लेशा- नां समूहेनालं, प्रव्रज्यां गृह्णामीति. अत्रांतरे च कर्मसंघातो गलितः, बंधनस्थितिः प्रचलिता, आ- त्मवीर्येण प्रस्फुरितं, सर्वविरतिपरिणतिः समुत्पन्नेति. धर्मकथावसाने च मया भगवान् गुरुर्विज्ञप्तः, भगवताहमनुगृहीतः, भवविस्तारान्मम चित्तं विरक्तं, तस्माद्भगवानादिशतु किं मया कर्तव्यमिति. ततस्तेन श्रुतज्ञानिना मम भावं विज्ञाय प्रोक्तं, भवतो महापुरुषसेवितं श्रमणत्वं कर्तुं युज्यत इ- ति. ततो मया तस्य समीपे श्रमणत्वमंगीकृतं, विधिना परिपालितं च. ततो निजायुः परिपाल्य कालमासे कालं कृत्वा देहं त्यक्त्वा ब्रह्मलोके नवसागरोपमायुर्वैमानिकदेवत्वेनोत्पन्नोऽस्मि, इतरो- ऽपि च यज्ञदेवस्त्रिसागरोपमस्थितिः शर्कराप्रभायां नारक उत्पन्न इति.

ततोऽहं निजायुः परिपाल्य देवलोकाच्च्युतः सन्निहैव विदेहे गंधिलावतीविजये रत्नपुरे र- त्नसारनाम्नः सार्थवाहस्य श्रीमत्या भार्यायाः कुक्षौ पुत्रत्वेनोत्पन्नः, इतरोऽपि च तत उध्धृत्याखे- टकश्वानो भूत्वा मृत्वा त्रिसागरोपमायुस्तत्रैवोत्पद्य ततश्चोध्धृतो नानातिर्यग्भवेषु भ्रांत्वा तत्रैव रत्न- पुरे तातगृहदास्या नर्मदाभिधानायाः कुक्षौ पुत्रत्वेनोत्पन्न इति, उचितसमये आवां द्वावपि जन्म

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

संप्राप्तौ, बालभावं प्राप्तौ च, आवयोर्नामनी प्रतिष्ठापिते, तत्र मम चंडसार इतरस्यानहग इति, यौवनं प्राप्तौ च, मया दारसंग्रहः कृतः, एवं च विषयासक्तौ तिष्ठावः, पूर्वभवाभ्यासतश्चास्य ममोपरि वंचनापरिणामो नापगच्छति. अन्यदा च तत्र मासकल्पविहारी भगवान् विजयवर्धनाचार्यः समागतः, अस्य पादमूले मया श्रावकधर्मश्चांगीकृतः. अन्यदा च नरपतौ दीर्घदंडयात्रागते सत्यस्मासु ग्रामांतरगतेषु सत्सु विंध्यकेतुनाम्ना शबरसेनापतिना तत्पुरं हतविहतं कृत्वा कोऽपि लोकोऽपनीतः, अस्माभिश्च श्रुतं, वयं समागतास्तत्पुरं च श्मशानागारसदृशं दृष्टं, गृहमानुषा गवेषिता यावत्सर्वमेव तिष्ठति, नवरं चंद्रकांता मे भार्यापहृतेति. ततो मेऽरतिः समुत्पन्ना, चिंता जाता हाऽदृष्टमद्वियोगा सा तपस्विनी कथं प्राणान् धारयिष्यतीति? अत्रांतरे च देवशर्माभिधानेन वृद्धब्राह्मणेनाहं प्रोक्तः, हे सार्थवाहपुत्र! मा संतापं प्राप्नुहि? पुनरप्येतस्मिन्नेव देशे श्रीस्थलाभिधानात्सन्निवेशादेवमेव शबरैर्लोकोऽपहृत आसीत्स सर्वाखंडितचरित्रं सर्वस्वो महता द्रव्येण मुक्त इति.

ततोऽहमेतदाकर्ण्य कतिपयदिनेष्वतिक्रांतेषु शबरेषु स्वभूमिमुपगतेष्वनहगसहितः सर्वसारं द्रव्यजातं सुस्निग्धसंभृतं च पाथेयं गृहीत्वा चंद्रकांताविमोक्षणनिमित्तं चलितः, तया च मम वियो-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

गव्याकुलया शीलखंडनाशंकिन्या क्वापि शून्यग्रामासन्नकूपतटवासितायां शबरसेनायां निशाचरमस-
मये प्रयाणककोलाहले प्रवृत्ते सति शबरसंघातेषु पर्यंतरक्षणव्यापृतेषु सत्सु जीवितव्यनिरपेक्षया
तस्मिन्नेव जीर्णकूपे आत्मा प्रपातितो जलमध्ये च पतिता, जलप्रभावेण न मृता च. ततस्तद्गतमे-
व प्रतिकूपमाश्रित्योपवेष्टुमारब्धा, कण्ठगतप्राणा च सती जीवितशेषेणैव यावत्प्राणान् धारयति ता-
वद्वयं तमुद्देशं प्राप्ताः, अनहगस्यापि च पूर्वभवनिमित्तात्तद्द्रव्यदर्शनतश्च ममोपरि वंचनापरिणामः
समुत्पन्नः, अनेन च चिंतितं कथमेष वंचनीय इति, ततः सोऽनेकविकल्पपर्याकुलहृदयः, अहं च
शुद्धस्वभाव इति, एवं व्रजावः, पाथेयद्रव्यजातानि च प्रत्येकं हस्तगोचराणि भवंति. अन्यदा च
मम हस्ते पाथेयं, तस्य हस्ते द्रव्यजातमित्येवमनुगच्छंतौ तमुद्देशं प्राप्तौ यत्र सा चंद्रकांता तिष्ठति,
स कूपो दृष्टश्च. अवांतरे च सूर्योऽस्तमितः, संध्या च लुलिता, ततोऽनहगेन चिंतितं सारं द्रव्यजा-
तं मम हस्तगतमस्ति, निर्मानुषं चेदमरण्यं वर्तते, पातालगंभीरकूपश्च समासन्नोऽस्ति, अपराधविव-
रसमाछादकोंधकारश्च प्रवृत्तः, तस्मादेतस्मिन् कूपे एनं प्रक्षिप्यास्मात्स्थानान्निवर्ते इति विचिंत्य तेन
भणितं, भो सार्थवाहपुत्राहमत्यर्थं तृषापीडितोऽस्मि, तस्मादेतं जीर्णकूपं विलोकय किमत्रोदकम-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्ति न वेति? ततो मया गृहीतपाथेयपोट्टलेनैव सता कूपो दृष्टः. अत्रांतरे चातिविश्वस्तहृदयस्य लोकस्य मृत्युरिव मम समीपमनहग आगतः, तेनाहमकस्मात्तस्मिन् कूपे प्रक्षिप्तः, पानीयमध्ये प-तितश्च, ततः सोऽनहगस्तस्मात्प्रदेशान्निवृत्तः, अहमपि च संभ्रांतः सन् प्रतिकूपकैकदेशे लग्नः, जय-विश्रृंखला चंद्रकांता स्पृष्टा च, तया च स्त्रीस्वभावतो भयकातरं भणितं 'नमो अरिहंताणमिति.' ततो मया शब्द उपलक्षितः, मम हृदयेनोच्छ्वसितं, अन्नयमन्नयं जिनशासनरक्षानामिति सा भ-णिता च, तयापि च मे शब्द उपलक्षित, रोदितुं प्रवृत्ता सा मया समाश्वासिता, वृत्तांतं पृष्टा च, तया च स्ववृत्तांतः प्रोक्तः, मयापि चास्यै निजवृत्तांतः प्रोक्त इति. तदा तया भणितं हा! अनह-गेन दुष्टं कृतं, मयोक्तं हे सुंदरि! न दुष्टं कृतं, परमोपकारी खलु स महानुभावो यत्त्वं संयोजिते-ति. अल्पनिद्रयोश्चावयो रजनिरतिक्रांता, उद्गतः सूर्यः, ततो मयास्यै पाथेयं दत्तं, तया च प्रोक्तं युष्माभिरगृहीते कथमहं गृह्णामीति, ततो मया स्नेहकातरं तस्या हृदयं ज्ञात्वाऽकाले एव पाथेयं गृ-हीतं, भुक्तं चावाभ्यां, ततो मया चिंतितं केन पुनरुपायेनावामस्माद्भवसमुद्रादिव कूपकादुत्तरिष्याव इति? एवं च चिंतयतोः कतिपयदिनेषु पाथेयं क्षीणं, जीविताशा प्रणष्टा; मम चिंता च जाता

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

कथं जिनमतं प्राप्य प्रव्रज्यामकृत्वाऽकृतार्थो मरिष्यामीति? अत्रांतरे तस्याश्चंद्रकांताया वामलोचनेन स्फुरितं, ममापि दक्षिणेन स्फुरितं, तया च प्रोक्तं हे आर्यपुत्र! मम वामं लोचनं स्फुरितं, ततो मया तस्यै हृदयसंकल्पो दक्षिणचक्षुःस्फुरणं प्रोक्तं, एषा समाश्वासिता च, हे सुंदर्यावयोरेभिर्निमित्तविशेषैरवश्यमेष क्लेशो न चिरकालानुसारी, तस्मात्त्वया न संतापः कार्य इति, अनया चांगीकृतं.

एवं यावदहोरात्रं तत्र निवसावस्तावद्बब्बरराजधान्या रत्नपुरनिवासिनंदिवर्धनसार्थवाहस्य संबंधी रत्नपुरगाम्येव सार्थः समागतः, उदकनिमित्तं च सार्थपुरुषाः समागताः, जलमाकर्षतश्चावाभ्यां दृष्टाः, संभाषिताश्च, एभिः सार्थवाहाय निवेदितं, तेन कृतमंचिकाप्रयोगेणावां समुत्तारितावुपलक्षितौ च, वृत्तांतं पृष्टौ, मया च विस्तारेण वृत्तांतः प्रोक्तः, एष विस्मितः, ततो रत्नपुरं प्रस्थितौ, यावत्पंचसु प्रयाणेष्वतिक्रांतेषु सार्थे परिवहति सति राजमार्गान्नातिदूरदेशभागेऽस्थिमात्रशेषो वामपार्श्वपतितद्रव्यजातः केसरिणा मृत्युमुपनीतोऽनङ्गो दृष्टः, द्रव्यप्राप्त्या चावाभ्यामुपलक्षितः, ततस्तथाविधं विपाकं प्रेक्षमाणस्य मम विवेकः समुत्पन्नः, चारित्रमोहनीयं क्षयोपशमं प्राप्तं, सकलजीव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समरा- चरित्रं १०२

लोकदुर्लभश्चारित्रपरिणामः संजातः. ततोऽहं तथाविधप्रवर्धमानपरिणाम एव स्वनगरमागतः, विजयवर्धनाचार्यसमीपे यथाविधि प्रव्रज्यां प्रपन्नश्च, यथायुरनुपाल्य विधिना देहं त्यक्त्वा महाशुक्रकल्पे षोडशसागरोपमायुर्वैमानिकत्वेनोत्पन्नः, अनङ्गश्च सिंहव्यापादितशरीरो वालुकाप्रभायां सप्तसागरोपमस्थितिर्नारक इति. ततोऽहं स्वायुः परिपाल्य देवलोकाच्च्युतः सन्निहैव जंबूद्वीपे भारते क्षेत्रे रथवीरपुरे नगरे नंदिवर्धनस्य गृहपतेः सुरसुंदर्या भार्यायाः कुक्षौ पुत्रत्वेनोत्पन्नोऽस्मि, इतरोऽपि ततो नरकादुध्धृत्य विंध्यगिरिपर्वतेऽनेकजंतुविनाशनतत्परः सिंहत्वेनोत्पन्नः, ततो मृत्वा पुनरपि सप्तसागरोपमायुस्तत्रैवोत्पद्य ततश्चोध्धृतो नानातिर्यग्भवेषु भ्रांत्वा तत्रैव नगरे सोमसार्थवाहस्य नंदिमत्या भार्यायाः पुत्रत्वेनोत्पन्न, उचितसमये चावां जातौ, बालभावं प्राप्तौ च, नाम्नी च प्रतिष्ठापिते, ममानंगदेव इतरस्य धनदेव इति, आबालभावतश्च प्रीतिर्जाता, मम सद्भावत इतरस्य कपटेन, कुमारभावे च मया देवसेनगुरुसमीपे सर्वज्ञभाषितो धर्मः संप्राप्तः, यौवनं प्राप्तौ च, पूर्वपुरुषोपार्जिते द्रव्यजाते सत्यपि चाभिमानतो द्रव्योपार्जनार्थं द्वावप्यावां रत्नद्वीपं गतौ, तत्रानेकानि रत्नान्यर्जितानि, क्रमेण द्वावप्यावां स्वदेशमागंतुं प्रवृत्तौ च.

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

अत्रांतरे च पूर्वकृतकर्मदोषेण धनदेवेन चिंतितं, कथं पुनरेषोऽनंगदेवो वंचनीयः? तेनानेके मिथ्याविकल्पाश्चिंतिताश्च, परं कोऽपि चित्ते न स्थितः, तदा तेनेवं सिद्धांतः स्थापितः, अव्यापादित एष वंचयितुं न शक्यते, तस्मादेनं व्यापादयामि, उपायश्चिंतितोऽस्मै भोजने विषं ददामीति. अन्यदा च शक्तिमतीग्रामं समनुप्राप्तयोरावयोर्भोजननिमित्तं धनदेवो हट्टमार्गे गतः, तेन च भोजनं गृहीतं, तत्रैकस्मिन् मोदके विषं प्रक्षिप्तं, तेन चिंतितं चैतत्तस्मै दास्यामीति, आगच्छतोऽनेकविकल्पापहृतचित्तस्य तस्य विपर्ययः संजातः, भोजनवेलायां तेन विषमोदको गृहीतः, मह्यं चान्यो दत्त इति. आवां भुक्तौ च यावत्स्तोकवेलायामेव धनदेवो विषपरिणतो जातः, ततः किमेतदित्याकुलीभूतोऽहं यावत्किंकर्तव्यमुढः संस्तोककालं तिष्ठामि, तावद्विषस्यात्युग्रतया कर्मपरिणतेश्च विचित्रतया धनदेवो मृतः, मम चिंता जाता हा केन पुनरेतन्निष्पादितमिति. ततोऽज्ञातवृत्तांतो महाशोकाभिभूतमानसः स्वनगरमागतः, तस्य मानुषेभ्यो वृत्तांतः प्रोक्तश्च, तेभ्योऽभ्यधिकतरं रत्नजातं दत्तं च, शेषरत्नजातमपि च यथायोग्यं धर्मपक्षे नियोज्य तद्दिनादेव संप्राप्तवैराग्यः परित्यक्तविषयसंगो देवसेनाचार्यसमीपे दीक्षां प्रतिपन्न इति. ततोऽहं निजायुः परिपाल्य विधिना च दे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हं त्यक्त्वा प्राणते देवलोके एकोनविंशतिसागरोपमायुर्देव उत्पन्नः, इतरोऽपि विषमरणानंतरं पंकप्रभायां पृथिव्यां नवसागरोपमायुर्नारक इति.

ततोऽहं निजायुरनुपाल्य च्युतः सन्निहैव जंबूद्वीपे ऐरवतक्षेत्रे हस्तिनापुरे नगरे हरिनंदिगृहपतेर्लक्ष्मीमत्या भार्यायाः कुक्षौ पुत्रत्वेनोत्पन्नः, इतरोऽपि ततो नरकादुध्धृत्योरगत्वं प्राप्यानेकजंतुव्यापादनपरो दावानलदग्धदेहो मृत्वा तस्यामेव पंकप्रभायां किंचिदूनदशसागरोपमायुर्नारको भूत्वा तत उध्धृतस्तिर्यक्षु भ्रांत्वा तस्मिन्नेव हस्तिनापुरे इंद्रनाम्नो वृध्धश्रेष्ठिनो नंदिमत्या भार्यायाः कुक्षौ पुत्रत्वेनोत्पन्न इति. उचितसमये आवां जातौ च, नाम्नी प्रतिष्ठापिते. मम वीरदेवो द्वितीयस्य द्रोणक इति. कुमारभावं प्राप्तौ च लेखाचार्याय समर्पितौ, आवयोः पूर्ववर्णितैव प्रीतिश्च जाता. ततो गृहीतकलासमूहेन मया मानभंगगुरुपार्श्वे जिनभाषितो धर्मः प्रतिपन्नः, मम वंचनानिमित्तमेव द्रोणकेनापि द्रव्यतो धर्मोंगीकृतः, ततश्च मम धर्मानुरागेण तत्प्रभृति तंप्रति स्थिरतरा प्रीतिः समुत्पन्ना, मया तस्मै प्रचुरं द्रव्यजातं समर्पितं, एष भणितश्चानिंदितेन मार्गेण व्यवहरस्व? ततः स व्यवहर्तुमारब्धः, तेन च प्रभूतं द्रव्यजातमर्जितं, अत्रांतरे च पूर्वकृतकर्मवासनादोषेण तस्य ममोपर्य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धिको वंचनापरिणामो जातः, तेन च चिंतितं प्रभूतं द्रव्यजातमर्जितं, एतस्य भागग्राहकश्च वीरदेवोऽस्ति, तस्मात्केन पुनरुपायेनैष वंच्यते? आवयोर्यथास्थितं व्यवहारं न कोऽपि जानाति, तस्मात्किं सर्वं भाण्डमपलपामि? अथवैतस्मिन् शत्रौ सति ममालीकवचनं न निर्वहति, तस्मादेनं व्यापादयामि, ततो यदहं कथयिष्यामि तदेव मान्यं भविष्यतीति मनसा निश्चित्य तेनोपचारः प्रारब्धः, पूर्वमेको महान् प्रासादः कारितस्तस्योपरि भूमिभागे चातिरमणीयोऽनियमितकीलजालो निर्यूहको नाम स्थानविशेषः कारितः, तेन चिंतितं च वीरदेवं प्रासादप्रवेशनिमित्तं निमंत्र्य तस्मै निर्यूहकं दर्शयामि, ततोऽसौ रम्यदर्शनीयतया निर्यूहकं सहसारोहयिष्यति, ततश्च तन्निपतनेन निपतितः सन्मरिष्यतीति, एवं च कृतेऽतिलोकापवादोऽपि परिहृतो भवति. ततस्तेन यथाचिंतितं संपादितं च, भोजनोत्तरकाले च द्वावप्यावां सपरिवारौ प्रासादमारूढौ. अत्रांतरे च तस्य मतिः प्रणष्टा, मम दर्शनार्थं स एकाक्येव निर्यूहके आरूढः, यावच्चाहं नारोहामि तावन्निपतितः, तदाहं हाहारवं कुर्वंस्तत्र संप्राप्तो यावत्पंचत्वमुपगतो डोणको दृष्ट इति. मम निर्वेदः समुत्पन्नः, मया चिंतितं जीवलोकं धिगस्तु, संसारचेष्टितमेवमवसानं वर्तते, ततोऽहं तस्य मृतकृत्यं कृत्वा तन्निर्वेदेनैव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मानभंगगुरुसमीपे श्रमणलिंगमंगीकृतं, ततो निजायुः परिपाल्याधस्तनोपरितने ग्रैवेयके किंचिदून पंचविंशतिसागरोपमायुर्देव उत्पन्नः, इतरोऽपि द्रोणकस्तथाविधरौद्रध्यानोपगतो धूमप्रभायां पृथिव्यां द्वादशसागरोपमायुर्नारक इति.

ततोऽहं सुरायुरुपभुज्य च्युतः सन्निहैव जंबूद्वीपेऽत्रैव विजये चंपावासे नगरे माणिभद्रस्य श्रेष्ठिनो हारिण्या भार्यायाः कुक्षौ पुत्रत्वेनोत्पन्नः, उचितसमये जातश्च, मम पूर्णभद्र इति नाम च प्रतिष्ठापितं, मया किल प्रथमं शब्दमुच्चरता अमरेत्युक्तमतोऽमरगुप्त इति द्वितीयमपि मम नाम संजातं. श्रावकगृहोत्पत्त्या चाबालभावत एव मया जिनेंद्रभाषितो धर्मोंगीकृतः, अत्रांतरे चेतरोऽपि ततो नरकादुध्धृत्य स्वयंभूरमणसमुद्रे महामत्स्यो भूत्वात्यंतपापदृष्टिर्मृतः संस्तस्यामेव धूमप्रभायां द्वादशसागरोपमायुर्नारको भूत्वोध्धृतः सन्नानातिर्यक्षु भ्रांत्वा तस्मिन्नेव नगरे नंदावर्तश्रेष्ठिनः श्रीनंदाया भार्यायाः कुक्षौ पुत्रीत्वेनोत्पन्नः, उचितसमये जाता च, नंदयंतीति तस्या नाम प्रतिष्ठापितं, यौवनं प्राप्ता च मह्यं दत्ता, पाणिग्रहणं कारितं, मम तांप्रति स्नेहश्च समुत्पन्नः, तस्या अपि च तथैव. एवं च विषयसुखमनुभवतोरावयोः कोऽपि कालो गतः, पूर्वकृतकर्मदोषेण च तस्या ममोपरि वंचनाप-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिणामो नापगच्छति, येन समर्पितसर्वगृहसाराशपि कपटेन व्यवहरति, परिजनेन च मह्यं प्रोक्तं, न पुनरहं प्रत्येमीति. अन्यदा च तया मह्यं प्रोक्तं यथा प्रणष्टं सर्वसारं कुंडलयुगलं, तत्पुनः स्वयमेवापहृत्य समाकुलीभूता, ततो मया भणिता च, हे सुंदरि! स्तोकमात्रमिदमस्ति, एतावन्मात्रेण संकल्पेन किं? तवान्यत्कुंडलयुगलं कारयामि, ततो नव्यं कुंडलयुगलं कारितं. ततः कतिपयदिनेष्वतिक्रांतेषु सत्स्वंगमर्दनवेलायां मया तस्यै नाममुद्रारत्नं समर्पितं, तया च निजकाभरणकरंडके संगोपितं, स्नानभोजनसमये च वृत्ते सति विलेपनं कृत्वा तांबूलं गृहीत्वाऽसंजातशंकेनैव मया तस्मात्करंडकात्स्वयमेव मुद्रारत्नं गृहीतं, पूर्वनष्टं सर्वसारं कुंडलयुगलं च दृष्टं, मम च चिंता जाता किमेतत्पुनर्लब्धमिति. अत्रांतरे भीता सती नंदयंत्यागता, तया च मम हस्ते मुद्रारत्नं दृष्टं, एषा लज्जिता, मया तस्या भावो लक्षितः, ततोऽहं शीघ्रमेव गृहान्निर्गतः, तदा तया चिंतितमनेन कुंडलयुगलं दृष्टं, तस्मात्किमत्र कर्तव्यं? मम लघुत्वं जातमेष प्रणष्टोऽस्ति, तस्मात्स्वजनवर्गेऽपि यावन्मे लाघवं नोत्पद्यते तावदेनं व्यापादयामीति, एष चात्रोपायः, अस्य सद्यो घातकं कार्मणयोगं प्रकरोमि, तयैकाकिन्यैवानेकमरणप्रदद्रव्यसंयोगेन कार्मणयोगः कृतः, तमेकदेशे संस्थापयंती च,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सा भुजंगमेन दष्टा, रुद्रदेवपुरोहितेन च मह्यं प्रोक्तं, अहं संभ्रांतः सन् गृहं गतः, कृष्णमंभलव्या-
प्तशरीरा जीवितमात्रशेषा च नंदयंती दृष्टा, तां च तथाविधां पश्यतो मम चिंता समुत्पन्ना, मायेंद्र-
जालसदृशं जीवलोकं धिगस्तु, बाष्पजलभरितलोचनेन च मया सगद्गदाक्षरं भणिता हे सुंदरि!
तव किं बाधते? यावन्न जल्पति ततो विषण्णोऽहं, जीविताशा प्रणष्टा, तथापि गारुडिका अत्र प्रमा-
णं, मंत्रस्य शक्तिरचिंत्येति विचिंत्य गारुडिका आहूतास्तैर्दृष्टा च, ततस्तैर्विषण्णीभूतैर्भणितोऽहं हे
सार्थवाहपुत्रैषा खलु कालदष्टा, नात्र मंत्रस्य गोचरस्तस्मात्त्वया न कोपः कार्य इत्युक्त्वा गारुडिका
निर्गताः. तत आक्रंदनविलपनव्यापृतस्य मे परिजनेन तस्या और्ध्वदेहिकं कृतं. ततोऽहं तन्निर्वेदे-
नैव प्रवर्धमानसंवेगो जीवलोकं धिगस्त्विति परिचिंत्य चासारं क्लेशप्रयासकारणं संगं त्यक्त्वा प्रव्रज्यां
प्रतिपन्न इति. सा पुनस्तपस्विनी नंदयंती तथा मृत्वा तमःप्रभाभिधानायां नरकपृथिव्यां समुत्पन्ना,
तस्या आयुश्चैकविंशतिसागरोपमाणि, एतन्मे चरितमिति. एतच्च श्रुत्वा राजनागराणां निर्वेदः सं-
जातः, राज्ञा पृष्टं च भगवन्! कः पुनस्तस्या भवतश्च परिणामो भविष्यति? भगवतोक्तं तस्याश्चा-
नंतसंसारावसाने मुक्तिर्मम पुनरिहैव जन्मनीति. ततोऽहमेतदाकर्ण्य तस्यैव भगवतः समीपेऽनेक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नागरजनपरिवृतः प्रव्रज्यां प्रतिपन्नः, एतन्मे विशेषकारणमिति. तदा सिंहकुमारेणोक्तं तव शोभनं निर्वेदकारणं. अथ कतिगतिसमापन्नरूपः पुनरेष संसारः? किंविशिष्टानि चेह शारीरमानसानि सुखदुःखानि प्राणिनोऽनुभवंति? को वात्र संसारचारकविमोचनसमर्थो हे भगवन्! धर्मः? तदा धर्मघोषेण प्रोक्तं हे वत्स! यत्त्वया पृष्टं तत् शृणु?—

अत्र तावच्चतुर्गतिसमापन्नकरूपः संसारः, गतयः पुनरिमाः, तद्यथा—नरकगतिः १, तिर्यग्गतिः २, मनुष्यगतिः ३, देवगतिश्च ४. सुखदुःखचिंतायां पुनः संसारसमापन्नानां जातिजरामरणपीडितानां रागद्वेषरोगगृहीतानां विषयविषापहृतचेतनानां च सत्वानां कुतः सुखं? न किमपि सुखं, बहु च दुःखं, अत्र मत्सकाशाद् ज्ञातं शृणु?—यथा नाम कोऽपि पुरुषोऽत्यर्थं दारिद्र्यदुःखसंतप्तो निजं देशं मुक्त्वा परदेशं गंतुमारब्धः, ग्रामाकरनगरपत्तनसहितं देशं स्तोकदिवसैर्लंघयित्वा च कथंचिन्मार्गात्प्रभ्रष्टो महाटवीं प्राप्तश्च, कीदृशीं महाटवीमित्याह—शालसरलतमालतालबकुलतिलकनिचुलांकोल्लकदंबवंजुलपलाशसल्लकीतिनिशनिंबकुटजन्यग्रोधखदिरसर्जार्जुनाम्रजंबूनिकरगुपिलां दृप्तसिंहखरशिखरप्रपातदलितमत्तमातंगकुंभस्थलगलितसांद्ररुधिरारक्तमुक्ताफलकुसुमप्रकरार्चितविस्ती-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

र्णभूमिभागां, वनशूकरशरभवृषभसर्पव्याघ्रतरक्षभल्लुकजंबूकगजगवयसिंहगंडकादिरुष्टदुष्टश्वापदभी-
षणां, दृप्तघनमहिषयूथसमालोडिताशेषपल्वलजलोच्छलदतुच्छजलचरोन्मुक्तनादबधिरितदिशमिति.
एवंभूतायां च तस्यामटव्यां तृषाक्षुधाभिभूतेन दृप्तदुष्टवनश्वापदरवाकर्णनोत्त्रस्तलोचनेन दीर्घपथप-
रिश्रमोत्पन्नस्वेदजलक्लिन्नगात्रेण मूढदिक्चक्रविषमपथस्खलत्पदसंचारं परिभ्रमता तेन दुष्टवनहस्ती दृ-
ष्टः, कीदृश इत्याह—प्रलयमेघवृंदसदृशो विनाशितानेकपथिकजनप्रवृद्धोत्साहो निजगर्जितरवापू-
रितविकटारण्योद्देशः पृष्ठतस्त्वरितं त्वरितं धावन्नूर्ध्वीकृतोद्दंडशुंड इति. तथैव तीक्ष्णकरवालव्यापृता-
ग्रहस्ता विकरालवचनकया भीमाट्टट्टहाससंयुक्ता श्यामवस्त्राग्रतो महादुष्टराक्षसी दृष्टेति. ततश्च तद्-
द्वयं दृष्ट्वा मृत्युभयकंपांगोऽवलोकितसकलदिग्मंडलः सन् पूर्वस्यां दिश्युदयाचलशिखरसदृशं निरु-
द्धसिद्धगंधर्वयुगलगगनप्रचारमार्गं महांतं वटवृक्षं विलोक्य स परिचिंतितुं प्रवृत्तः, यदि कथमप्येतं
घनपत्रं वटवृक्षमारोहेयं तर्ह्यस्माद्गजेंद्रादेश्छुट्येयमिति विचिंत्य भीतः सन् दर्भाग्रभिन्नपादतलमार्गो
वेगेन धावित्वा विपुलं तं वटवृक्षं प्राप्तः, गगनगोचराणामपि दुर्लंघनीयमुत्तुंगस्कंधं तं वृक्षं प्रेक्ष्य
विषण्ण आरोढुमसमर्थः, तावद्वनदुष्टहस्तिनं वटवृक्षोद्देशं समागतं दृष्ट्वाऽत्यधिकभयकंपसर्वांग इतो

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

निवृत्तस्तत्रैव तृणाछादितं कूपं पश्यति.

अथ मरणभीतेन पुरुषेण क्षणजीवितलोभेन वटवृक्षसमीपवर्तिजीर्णकूपे निरवलंबमात्मा मुक्तः, तस्मिन् कूपे उत्तुंगभित्तौ शरस्तंभो जातोऽस्ति, तत्र च स विलग्नः, ततः पतनाभिघातेन कुपितान् दृप्तान् भीमान् विषलवातिव्याप्तनेत्राग्निज्वालानुद्धटफणाकरालान् दष्टुकामान् चतसृष्वपि तटीषु चतुरो भुजंगांश्च पश्यति, पुनर्विदारितमुखं दिग्गजशुंडादंडोरुकायं कृष्णं रक्ताक्षं बीभत्समेकमजगरं तल पश्यति, यावदेष शरस्तंभस्तावन्मम जीवितमिति चिंतयन्नूर्ध्वमुखः सन् सुतीक्ष्णदंष्ट्रायुक्तौ महाकायौ नित्यं व्यापृतवदनौ तस्य शरस्तंभस्य मूलानि छिंदंतौ धवलकृष्णौ द्वौ मूषकौ च तत्र पश्यति, तावद्वनगजेन तं नरमप्राप्नुवता कुपितेन झटिति स वटवृक्षः पुनः पुनर्धूनितः, तस्मिंश्च संचालिते सति कूपोपरि विस्तीर्णशाखोत्पन्नं मधुजालं स्फुटित्वा तस्मिन् जीर्णकूपे पतितं, ततः कुपितदुष्टभ्रमरीसमूहदश्यमानसर्वांगस्य तस्य नरस्य मस्तके कथमपि मधुबिंदुर्निपतितः, स कथमपि मस्तकादालोटंस्तस्य मुखे प्रविष्टः, स पुमांस्तं क्षणमास्वाद्याजगरसर्पहस्तिमूषकविलग्नभ्रमरीभयान्यवगणय्यान्यान्निपततो मधुबिंदून् पुनरप्यास्वादितुमिछति, मधुबिंदुरसास्वादनासक्तिवशात्कर्षः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

संजातः, भव्यजनमोहविनाशनसमर्थमत्यर्थमिदमुदाहरणं परिकल्पितमेतस्य चोपसंहारं निशामय? यः पुरुषः स जीवः, यत्तस्यारण्ये पर्यटनं तच्चतुर्गतिभ्रमणं, यो वनहस्ती स मृत्युः, या च राक्षसी सा जरा, वटवृक्षः पुनर्मोक्षो मरणगजेंद्रभयवर्जितः, नवरं विषयातुरनरैरारोढुं न च शक्यते, मनुष्यत्वं पुनः कूपः, सर्पास्तु कषाया यैर्भक्षितो मनुष्यः कार्याकार्याणि न जानाति, योऽपि च शरस्तंभः स जीवितं येन जीवो जीवति, उंदुरद्वयसदृशौ कृष्णशुक्लपक्षौ तमत्यर्थं खनतः, याश्च तं भ्रमर्यो दशंति ते विविधा व्याधयो यैः पीडितो नरः क्षणमपि सौख्यं न प्राप्नोति, यश्च घोरोऽजगरः स नरको यस्मिन् विषयमोहितमना जीवः पतितः सन् दुःखसहस्राणि प्राप्नोति. एवं संकटगतो विबुधो मधुबिंदुसमान् तुच्छान् परिणामदारुणान् भोगान् भोक्तुं कथमुत्सहते? तस्माद् हे श्रावक! तुभ्यं कथयामि, विषयसुखं भयानकं ज्ञात्वा चपलविद्युद्विलसितमिव क्षणभंगुरं मनुष्यत्वं, तथा स्वजनसमागमसौख्यं च चंचलं यौवनमपि चासारं ज्ञात्वा सर्वसौख्यनिधाने धर्मे सदा दृढां मतिं कुरुष्व? सिंहकुमारेणोक्तं भगवन्! कीदृशो धर्मः? भगवतोक्तं शृणु?—

क्षमादिको धर्मः, उक्तं च—खंतीमद्दवअज्जव—मुत्तीतवसंजमे य बोधव्वे ॥ सच्चं सोयं आ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किंचणं च बंभं च जइधम्मो ॥ १ ॥ तत्र क्षांतिर्नाम सम्यग्ज्ञानपूर्वकं वस्तुस्वभावालोचनेन क्रोधस्यानुदयः, उदयप्राप्तस्य वा विफलीकरणं १. एवं मार्दवमपि मानस्यानुदयः, उदयप्राप्तस्य वा विफलीकरणं २. एवमार्जवमपि मायाया अनुदयः, उदयप्राप्ताया वा विफलीकरणं ३. एवं मुक्तिरपि लोभस्यानुदयः, उदयप्राप्तस्य वा विफलीकरणं ४. तपः पुनर्द्विविधं बाह्यमभ्यंतरं च, तत्र बाह्यमनशनादिकं, आभ्यंतरं पुनः प्रायश्चित्तादिकं. उक्तं च—अणसण १ मूणोयरिया २ । वित्तीसंखेवणं ३ रसच्चाओ ४ ॥ कायकिलेसो ५ संली—णयाय ६ बज्झो तवो होइ ॥ १ ॥ पायच्छित्तं १ विणओ २ । वेयावच्चं ३ तहेव सज्झाओ ४ ॥ झाणं ५ उस्सग्गोवि य ६ । अब्भिंतरओ तवो होइ ॥ २ ॥ संयमश्च सप्तदशविधः, उक्तं च—पंचासववेरमणं । पंचेंदियनिग्गहो कसायजओ ॥ दंडत्तिगविरती सं—जमो उ इयसत्तरसभेओ ॥ १ ॥ सत्यं पुनर्निरवद्यभाषणं, शौचं च संयमंप्रति निरुपलेपता, आकिंचन्यं च धर्मोपकरणातिरेकेनापरिग्रहता, ब्रह्मचर्यं चाष्टादशविधं वर्ण्यते, एष एवंभूतो यतिधर्मः.

एतच्च श्रुत्वा प्रादुर्भूतसम्यक्त्वपरिणामेन भावतोंगीकृतश्रावकधर्मेण सिंहकुमारेण भणितं, हे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भगवन्! यतिधर्मः शोभनः, परमेतं कर्तुमसमर्थेन तावत्किं कर्तव्यं? धर्मघोषेणोक्तं श्रावकत्वमंगीकार्यं, कुमारेणोक्तं कीदृशं तत् श्रावकत्वं? गुरुणा सम्यक्त्वादिकं तत्कथितं, कुमारेण भावतो द्रव्यतोऽपि चांगीकृतं. तत आत्मानं कृतकृत्यं मन्यमानः कांचिद्वेलां धर्मघोषगुरुं सेवित्वा सविनयं वंदित्वा च नगरं प्रविष्टः, तेन कुसुमावल्यै स वृत्तांतः प्रोक्तः, एषापि कथंचित्कर्मक्षयोपशमतः श्रावकधर्ममंगीकृतवती, प्रतिदिवसं च धर्मघोषगुरुसेवनपरयोस्तयोर्मासोऽतिक्रांतः, द्वावपि जिनधर्मे भावितौ. अन्यदा च पुरुषदत्तो राजातितेजोगुरुसमीपे धर्मं श्रुत्वा सिंहकुमारं राज्येऽभिषिच्य संजातसंवेगः श्रीकांतया महादेव्या सह मुक्तिमार्गं प्रपन्नः, सिंहकुमारोऽपि सद्धर्मपालनरतः सकलजनमनआनंदकार्यनुरक्तसामंतमंडलो दीनानाथकृपणजनोपकारसंपादनरतिर्यथोचितगुणयुक्तो राजर्षिः समुपजात इति. एवं चात्यंतानुरक्तां स्वांगनामिव पृथिवीं भुंजानस्य कोऽपि कालोऽतिक्रांतः.

अत्रांतरे सोऽग्निशर्मतापसदेवस्ततो विद्युत्कुमारकायाच्च्युत्वा संसारं भ्रांत्वानंतरभवे च किमपि बालतपो विधाय तं देहं मुक्त्वा पूर्वकर्मवासनाविपाकदोषेण कुसुमावल्याः कुक्षौ समुत्पन्नः, तया स्वप्नो दृष्टो यथा ममोदरं भुजंगमः प्रविष्टः, तेन च निर्गत्य राजा दष्टः सन् सिंहासनान्निपतितः, तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च दृष्ट्वा लज्जयापि च कुसुमावली जागृता, अमंगलमिति ज्ञात्वा तया पत्यै स्वप्नवृत्तांतो न कथितः, ततः प्रवर्धमानगर्भा सा राज्ञी तद्गर्भदोषत एव नरपतिं न बहुमन्यते, राजा चाधिकं स्नेहपरवशस्तदा परिजनेन भणिता च स्वामिन्येतन्न युक्तं, तया प्रोक्तं किमहं करोमि? परिजनेनोक्तं यथा देवं न बहुमन्यसे इति, तया भणितं निश्चितमेष गर्भदोषो भविष्यति, अन्यथाहमार्यपुत्रं कथं न बहुमन्ये? अन्यदा तस्या दोहदः समुत्पन्नो यथास्यैव राज्ञ आंत्रभक्षणं कुर्यामिति, तया चिंतितं च ममैष गर्भः पापकारी, तस्मादनेनालं, स्त्रीस्वभावतो भर्तरि स्नेहयोगेन तस्या विचारः समुत्पन्नो यथा पातयाम्येनं गर्भमिति. ततः कार्यगुरुकतया प्रधानपरिजनेन सहालोच्य तेनानुज्ञाता सा गर्भपातनं कर्तुमारब्धा. परं स गर्भो निकाचितकर्मदोषेण नैव पतति. ततः सानेकौषधपानेन दोहदासंपत्त्या च परिदुर्बला जाता. राज्ञा पृष्टा च हे सुंदरि! किं ते न संपद्यते? केन वा तवाज्ञा खंडिता? किं वा मया प्रतिकूलमासेवितं? यन्निर्वेदेन त्वमल्पोदका कुमुदिनीवैवं क्षीणा भवसीति, ततः कुसुमावल्या राज्ञ्या नृपाय प्रोक्तं हे स्वामिन्! मदीयमनस्येवं वितर्कः समुत्पद्यते यद्यस्मिन्नवसरे मृत्युं प्राप्नुयां तर्हि सुखिनी भवेयं, नृपेण पृष्टं किं कारणं? तदा कुसुमावल्या प्रोक्तं हे आर्यपुत्र! मम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भागधेयानि पृच्छेति भणित्वा बाष्पजलभरितलोचना सगद्गदा संजाता. ततो राज्ञास्या महान्निर्वेद-
स्तस्मादनया कथयैवालं, एतामाक्षिपामीति विचिंत्य सा कथा आक्षिप्ता, अन्यः प्रसंगः कृतः; पुन-
श्च तस्या मदनलेखाप्रमुखः प्रधानपरिजनः समाहूतः, राज्ञा सबहुमानं भणितश्च, युष्माकं विज्ञात-
कारणानामप्येवं कृष्णपक्षचंद्रलेखामिव क्षीणीभवंतीं देवीमुपेक्षितुं युक्तमिति, न च साध्यवस्तुविष-
योऽप्येष निर्वेदोऽस्ति, यतो जीवलोकसारभूता मम देवी विद्यते, किं च तद्वस्त्वस्ति यन्मम प्राणे-
षु विद्यमानेष्वेव देव्या न संपद्यत इति? मदनलेखयोक्तं महाराज! एवमेवेदं, नवरं स्त्रीजने सु-
लभस्याविवेकस्यैवात्र केवलमपराधोऽस्ति, तस्मान्महाराजः शृणोतु, हे महाराज! इदमधुनापि क-
थयितुं न शक्यते, तथाप्यन्य उपायो नास्तीति कृत्वा कथ्यते, राज्ञोक्तमेतत्त्वराया योग्यं, यदुपाय-
साध्यं तत्स्वयमेव क्रियते, इतरं वा निवेद्यत इति, तस्माद्भवती कथयतु कोऽत्र परमार्थः? ततो म-
दनलेखया भयवत्यापि च सत्या गर्भोत्पत्तेरारभ्य दोहददोषेण गर्भपातनपर्यंतो व्यवहार आख्यातः,
राज्ञा चिंतितमहो तस्या देव्या ममोपर्यसाधारणः स्नेहोऽस्ति येनापत्यजन्मापि न बहुमन्यते, दोह-
दस्यासंपादनेन च मा तस्या गर्भविनाशो भवत्वित्युपायं चिंतयामि, ततो राज्ञा यदहं कालोचितं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भणिष्यामि तत्तथा कर्तव्यमित्युक्त्वा देव्याः परिजनो विसर्जितः, मतिसागरो नाम प्रधानमंत्री समाहूतः, अस्मै चैष वृत्तांतो राज्ञा प्रोक्तः, तेन च चिंतितं देव्या युक्तं व्यवसितं, अथवानेनोपायेन तस्या अपि देहपीडा न भविष्यति, तस्मादेष तावदत्रोपायः—

बुभुक्षितस्य राज्ञ उदरोपरि बहिस्तात्कृत्रिमे आंत्रे दत्वातिसूक्ष्मतरवस्त्रादिना सुश्लिष्टे कृत्वा देव्यां प्रेक्षमाणायामेव सत्यां कर्तयित्वा दीयेते, पश्चाच्च प्रसूताया एव गर्भमन्यतरेणोपायेन चिंतयिष्याम इति विचिंत्य तेन राज्ञे निवेदितः, राज्ञा च स बहुमतः. ततो मतिसागरेण देव्यै उक्तं, हे स्वामिनि! देवस्यांत्रे कर्तयामि? गर्भस्वभावक्रूरत्वेन तया तदंगीकृतं, स उपायः कृतः, दोहदः संपूर्णः, पश्चाद्विषादं प्राप्ता, ततस्तस्यै राजा दर्शितस्तदा हृष्टा, मंत्रिणैषा भणिता च हे स्वामिनि! प्रथमप्रसूतया तावन्महाराजाय गर्भजन्म न निवेदनीयं, किंतु मह्यं कथनीयं, पश्चाद्यथोचितं करिष्यामीति, तयांगीकृतं. अन्यदोचितसमयेऽतिक्रांते परिणतप्राये दिवसे देवी प्रसूता, तया मतिसागरः समाहूतस्तेन भणिता च हे स्वामिन्येष गर्भो देवस्याकुशलोऽपि च लक्ष्यते, तस्मादनेनालं, अन्यत्र संवर्ध्यतां, महाराजाय च मृतो निवेदनीयमिति. तयोक्तं युक्तमेतत्, ममापि च हृदयेनम-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नितं. ततो मंत्रिणा राज्ञे मृतो बालो जात इत्युक्त्वा माधविकाभिधानदास्यै स बालः प्रदत्तः, सा तं गृहीत्वा स्तोकं भूमिभागं गता, अत्रांतरेण राज्ञा सा दृष्टा, किमेतदिति पृष्टा, ततो भययुक्तया कंपमानया माधविकया प्रोक्तं हे देव! न किंचिदिति. अत्रांतरे बालकेन रुदितं, ततो बालकं दृष्ट्वा कुपितेनेव राज्ञा भणितमाः पापे! किमेतद्व्यवसितं? ततः स्त्रीस्वभावकातरतया माधविकया सर्वोऽपि वृत्तांतः प्रोक्तः. ततो राज्ञा दारको गृहीतः, अनेन चिंतितं चैष एतासां हस्ते पुनर्न भविष्यतीति, अन्यधात्रीभ्यः स समर्पितस्ताभ्यः श्रावितं च, भो भो यदि कथमपि बालस्य प्रमादो भविष्यति तर्हि मम हस्ताद्यूयं विनष्टाः, देवीमतिसागरौ निर्भर्त्सितौ, देवी मंत्रिचित्तानुरोधितेषत्प्रब्रभूतं तथाविधं वर्धापनकं च कारितं. एवं च कोऽपि कालोऽतिक्रांतः, बालस्यानंद इति नाम प्रतिष्ठापितं, एष वर्धितः, कलाकलापं ग्राहितः, पूर्वकर्मदोषेण स नरपतिंप्रति विषमचित्तोऽभूत, क्रमेण तस्मै यौवराज्यं दत्तं.

अन्यदा देशपर्यंतवास्याटविको दुर्मतिर्नाम सामंतराजो दुर्गभूमिबलगर्वितः सिंहनृपमवगणयतिस्म, सेवकै राज्ञे निवेदितं, राज्ञा तस्योपरि सैन्यं मुक्तं, तत्स्वभूमिबलगुणेन तेन पराजयं प्रापि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं, ततः कुपितो राजामर्षेण स्वयमेव तदुपरि गंतुं प्रवृत्तः, प्रयाणत्रयं च गतः. अत्रांतरे सिंधुनदीतीरे सैन्ये परिवहति सति करिवरोपरि स्थितेन जलान्नातिदूर एवाहो कष्टमहो कष्टमिति जल्पन्मनुष्यवृंदं दृष्टं, राजा तमेव भूमिभागं गतो यावत्तावत्तेन महाकायोऽतिकृष्णदेहच्छविर्विनिर्गच्छन्नेत्रविषः पुरोगृहीतपूत्कुर्वन्महामंडूकग्रासो भयानकः दुःप्रेक्ष्मुखोऽतिकंपमानांगो महता कुररेण ग्रस्यमानो जीर्णभुजंगमो दृष्टः, कुररोऽपि दिग्गजशुंडाविपुलकायेन रक्ताक्षबीभत्सकेनाजगरेण ग्रस्यमानो दृष्टः, यथा यथा चाजगरः कुररं ग्रसते, तथा तथा स कुररोऽपि जीर्णभुजंगमं ग्रसते, जीर्णभुजंगमोऽपि च पूत्कुर्वंतं मंडूकमिति. तं चैवंविधं जीवलोकस्वभावविभ्रमं मूढलोकहृदयानंदकारकं सत्पुरुषनिर्वेदहेतुं चात्रावलोक्य राजा विषण्णः, अनेन चिंतितं च हंत! एवं व्यवस्थिते कः पुनरिहोपायः? अजगरेण कुररो ग्रस्तप्रायः, कुररेणापि भुजंगमः, भुजंगमेनापि च मंडूक इति. कंठगतप्राणा अप्येतेऽन्योन्यं न विरमंति, किंत्वधिकतरं प्रवर्तंते, अन्यतरविनाशेन मोचिता अप्येते सांप्रतं न जीवंति, तस्मात्किमनेनाप्रतीकारविषयेण वस्तुना विलोकितेनेति प्रेरितो महाराज आवासनिकाभूमिं गतः, कटकेन सह तत्र राजा आवासितः, उचितकरणीयं कृतं. ततोऽर्धक्षीणायां रात्रौ राजा सु-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

प्रजागृतोऽजगरादिव्यतिकरं स्मृत्वा चिंतितुं प्रवृत्तः, कथमित्याह—

आपातमात्रमधुरा । विपाकविरसा विषोपमा विषयाः ॥ अबुधजनबहुमताः स्यु-र्विबुधजनविवर्जिताः पापाः ॥ १ ॥ एषां कृते जनोऽसौ । मुक्त्वा सेव्यं हि शाश्वतं धर्मं ॥ सेवितपापं विषमिव जीवितमिछन् सुखाभिरतः ॥ २ ॥ दुःखं पापस्य फलं । जानन्नाश्रयतु दुःखितः पापं ॥ धर्मस्य फलं सौख्यं । सुखितोऽपि करोतु सद्धर्मं ॥ ३ ॥ तुछो लोको दर्दुर । इवेतरेणेह पन्नगेनेव ॥ ग्रस्येत सोऽपि कुररो—पमेन चान्येन लोकेन ॥ ४ ॥ सोऽपि न चात्र स्ववशो । यस्मादजगरकृतांतवशवर्ती ॥ एवंविधेऽपि लोके । विषयप्रसंगो महामोहः ॥ ५ ॥ तस्मान्ममानेकदुःखतरुबीजभूतेनाहोपुरुषिकाविस्तारप्रायेण राज्येनालमिति. राज्यं हि नाम पातालमिव दुःपूरं. जीर्णगृहमिव सुलभविवरं, खलसंगतमिव विरसावसानं, वेश्यास्त्रीहृदयमिवार्थवल्लभं, वल्मीकमिव बहुभुजंगं, जीवलोक इवापरिपूर्णकार्यं, सर्पकरंडकमिव यत्नपरिपालनीयं, वेश्यायौवनमिव बहुजनाभिलषणीयं, सर्वेषामविश्वासस्थानं, शुद्धपरलोकमार्गस्यासाधनं चेति, तस्मादेतत्परित्यज्य धीरपुरुषसेवितमुभयलोकसुखावहं श्रमणत्वं प्रव्रजाम इति. अथ प्रस्तुतकार्यविषये लाघवं कथं पुनर्न भविष्यति? अ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

थवा किमेतल्लाघवमेकजन्मप्रतिबद्धमिति. एवं च चिंतयतस्तस्य रात्रिरतिक्रांता, प्रातःकृत्यं कृतं, मंत्रिमंडलं सनायां प्रविष्टं, अत्रांतरे विजयवतीनाम्न्या प्रतिहारिकया तस्मै निवेदितं. हे महाराज! एष खलु दुर्मतिर्देवं स्वयमेव प्रस्थितं विज्ञाय चंद्रं च देवशासनं ज्ञात्वा श्रीवाबद्धकुठारो देवाज्ञातिक्रमेण जातपश्चात्तापः कतिपयपुरुषपरिवृत इहैवागतो देवदर्शनसुखाभिलाषी प्रतीहारभूमौ तिष्ठति, अत्र देवः प्रमाणमिति.

ततो राज्ञा मतिसागरः प्रलोकितस्तेन चेंगिताकारकुशलेन नणितं प्रविशतु, कोऽत्र दोषः? राजानः शरणागतवत्सला एव नवंति. ततो राज्ञानुज्ञातो दुर्मतिः प्रविष्टः, हे देवैषा ग्रीवा, एष च कुठार इत्युक्त्वा चरणयोः पतितः, ततोऽनयं दत्वा बहुमानितः. राज्ञा तस्याधिकतरः सत्कारः कृतः, ततो निवृत्त्य च जयपुरं निजनगरं गत्वा राज्ञा मंत्रिमंडलाय निजानिप्रायो निवेदितस्तेनापि चैतद्वंशोत्पन्नानामशेषराजानामपि कृत्यमेवेदं, किं पुनर्जिनवचननावितमतीनां युष्माकमिति, ननयलोकसाधारणं च देवस्य जीवितं सफलं, वनदवसदृशाश्च कामनोगा इंधनादेव ज्वलंति, किंपाकफलसमानश्चैषां विपाकः, अप्रस्तावमनोरथनंगकारी च विनिर्जितसुरासुरो मृत्युः प्रनवतीत्युक्त्वा स

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

बहुमतः. तत आहूताः सांवत्सरिकाः, भणिताश्च तेनानंदकुमारस्य राज्याभिषेकदिवसं निरूपयत? तैर्भणितं यद्देव आज्ञापयति, तैः शास्त्रं विलोक्य पंचमो दिवसः प्रोक्तः. तत उपनीतान्यभिषेक- मंगलानि, तद्यथा—मत्स्ययुगलं, पूर्णकलशः, श्वेतकुसुमानि, महापद्मानि, श्वेतसर्षपाः, पृथ्वीपिंडः, दधिपूर्णं च भांडकं, महारत्नानि, गोरोचना, सिंहचर्म, श्वेतछत्रं, भद्रासनं, चामरे, दूर्वा, अछसुरा, महाध्वजः, गजमदः, धान्यानि, दुकूलानि, एवमादिकान्यन्यानि च प्रशस्तद्रव्याणीति. अत्रांतरे राज्ञा चिंतितमानंदकुमारस्य राज्याभिषेकं कृत्वा पश्चाद्धर्मघोषगुरुसमीपं गमिष्यामीति चिंतयन्नभिषेकदिनं प्रतीक्षमाणस्तिष्ठति.

इतश्च पूर्वकृतकर्मदोषतोऽज्ञातनरेंद्राभिप्राय आनंदकुमारो दुर्मतिना सह मिलितः, ताभ्यां मंत्रितं च कथंचिद्वंचनाप्रयोगेण महाराजं व्यापादयाव इति. ततोऽभिषेकवृत्तांतः श्रुतः, स मिथ्याभिनिवेशेन स्वचित्तदुष्टतया चानंदस्य विपरीतः परिणतस्तेन च चिंतितं, निश्चितमहमनेनैतद्व्यवसायेन मारयितुं चिंतितः, अहं कथमेवं छल्ये? अथवैतस्मिन् वृत्तांते सत्येऽपि सति मम राज्येनालं यद्राज्यमेतेन दत्तं संपद्यते, तत्पुनः श्लाघनीयं यदेनं व्यापाद्य बलाद् गृह्यत इति. अत्रांतरे रा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञानंद आहूतः, यावत्स आगंतुं नेच्छति ततो राजा प्रतीहारसहितः कुमारभवनं गतः, तेनापि च नेतः सुंदरतरः प्रस्ताव इति विचार्य पूर्वजन्मेर्ष्यादोषेणाकस्माद् हणहणेत्युक्त्वा नग्नं खड्गं गृहीत्वा प्रतीहारं व्यापाद्याकृतपरिरक्षणोपायोऽतिविश्वस्तचित्तो राजा गाढप्रहारीकृतः. अत्रांतरे कोलाहलः समुच्छलितः, नगरसैन्यक्षोभः संजातः, राजपरिकरेणानंदः समंतात्परिवेष्टितः, संग्रामः प्रारब्धः. ततो राज्ञा निजशरीरद्रोहशपथेन संग्रामो वारितोऽनेन प्रोक्तं च, इदानीं भवतामत्यंतयुद्धेन किं? अहं तावद्व्यापादित एव द्रष्टव्यः, मैतमपि व्यापादयत? तस्मादेतस्य राज्याभिषेकं कुरुत? भवतामेष राजेति. अत्रांतरे दुर्मतिः समाज्ञप्त एतं निबिडबंधैर्बंधय? ततो यत्कुमार आज्ञापयतीत्युक्त्वा दुर्मतिस्तस्य राज्ञ आसन्नीभूतः, पार्श्वस्थाः कुलपुत्राः पातिताः, नागरजनो निर्भर्त्सितः, ततो बंधयित्वा प्रत्ययितपुरुषसुकृतपरिरक्षणोपायो राजा कृतः, कुमारेण स्वयं राज्यमधिष्ठितं, व्यवस्थाः स्थापिताः, सामंतमंडलं वशीकृतं. ततस्तेनेर्ष्यावशेन राजा नगरचारकं प्रापितः, तद्वर्णनं यथा—मथ्यमानपुरीषवद्दुर्गंधि, स्फुटितभित्तिप्रसुप्तसर्पं, भिणभिणायमानमशकमक्षिकाजालं, दरविवरमुखविनिर्गतमूषकोत्कीर्णरजःप्रकरं, उपरि लंबमानोरगनिर्मोकं, लूतातंतुविरचितवितानकं, विषमकालस्य वासगृहमिव,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अधर्मस्य लीलाभूमिमिव, सीमंतनरकावासस्य सहोदरमिव, सर्वदुःखसमुदायानां सखायमिव, सर्वपीडानां कुलगृहमिव, मृत्योर्विश्वासभूमिमिव, ईदृशं चारकं प्रापितः.

ततो महाचारकं नीतो देव इति श्रुत्वा सहसाविमुक्तभयानकाक्रंदं निरंतरं निपतद्भिर्महामुक्ताफलसदृशैरकज्जलबाष्पबिंदुभिः संपादितहारशोभं देवशोकेनैव परिम्लानदेहं नियुक्तपुरुषैर्निरुध्यमानमपि मंगलमणिवलयरुणरुणशब्दोद्दामं स्वभुजैर्बलात्तान् प्रेर्यानुचितभूमौ वक्षःस्थलोदरकुट्टनक्रियां कुर्वाणं, हा हता इत्यादिदुःखितवचो ब्रुवाणं श्वाससमापूरितमुखं परित्यक्तकुटिलत्वेनाप्यदर्शनीया देवावस्थेति सूचकैरिव शिरःकेशैर्निरुद्धनेत्रप्रसरं कुसुमावलीप्रमुखमंतःपुरं चारकमेव प्राप्तं. तेनांतःपुरेण काललोहमयनिगडसमापूरितो नरपतिर्दृष्टश्च. ततोऽशोकपल्लवाकारैर्हस्तैरनुचितासेवनबहुल एव संसार इति दर्शयदिव हारलतावहनजनितखेदमपि वक्षःस्थलं ताडयदधिकतरमाक्रंदितुं तत्प्रवृत्तमिति. ततो राज्ञारक्षकैश्च कथं कथमपि निवारितं, राज्ञा भणितं चानेन प्रयासमात्रफलेनाधर्मानुबंधिना च शोकेन किं? अतिबहुविचित्ररूपः खल्वेष संसारः, सर्वे शरीरिणोऽस्य क्रीडनकभूताः, पूर्वकृतकर्मणः प्रसरो दुर्निवारश्च, जलधरांतर्विनिर्गतविद्युद्वलयचंचला लक्ष्मीः, स्वप्नसदृशः सं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गमः, अत्र संसार एवमवसानानि रागविलसितानि, तस्मात्किमेतेनाविवेकजनसदृशेन प्रलपिते-
न? युष्माभिर्जीवलोकसारभूतं जिनवचनं प्राप्तमेवास्ति, तस्मात्तदेव सेवत? तन्मुक्त्वान्यो दुःखक्ष-
योपायो नास्तीति. ततस्तदेतदाकर्ण्यैवमेवेदं, नान्यथेति विचार्य राजानमनुज्ञाप्य जीवितनिरपेक्षतया
बलात्कारेणैवानंदस्याज्ञां गृहीत्वा गंधर्वदत्तानाम्न्या विद्याधरश्रमण्याः समीपे प्रव्रज्यां जग्राहेति. इ-
तश्च प्रतिदिनकदर्थनयापि क्रोधवशमगच्छता राज्ञैतावन्मात्रं मे जीवितं, सांप्रतमनशनं कालोचित-
मिति निश्चित्यानशनं प्रतिपन्नं, सेवकैरानंदाय निवेदितं, तत् श्रुत्वा कुपितेन तेन देवशर्मानाम
निजको महान् पुरुषः प्रेषितस्त्वं गच्छ? तं भोजयेति, पुनरेष वक्तव्योऽभुंजानं नियमाद्व्यापादयामी-
ति. देवशर्मा गतस्तेन राजा दृष्टो भणितश्च, हे देव! दैववशगानां प्राणिनां विषमा कार्यगतिरि-
ति, एष च दैवो नाम विनयेनाऽनाराधनीयः, गुणिनामगुणग्राही, वांछितस्याकालज्ञः, केवलं जना-
नामनर्थः, मत्तहस्तीव स्वछंदाचारी, गंगाप्रवाह इवाऋजुः, कुटिलश्च महासंग्राम इव, जननिपातद-
क्षो विषग्रंथिरिव, रसानां नानुकूलः, वांछितानां प्रतिकूलः, अवांछितस्यानुकूलः, तस्माद्यद्यप्येष एवं-
भूतोऽस्ति, तथापि पुरुषेण क्षणमपि पुरुषकारो न मोक्तव्यः, येन महाराज! पूर्वोपार्जितानां कर्म-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णामेव दैवमेतन्नाम. तच्च दैवं पुरुषकारजेयमेव वर्तते, अतो देवः पुरुषकारमवलंबयतु, आहारग्रहणं करोतु, यतो जीवन् पुरुष आपदमुल्लंघ्यावश्यं संपदं प्राप्नोतीति. राज्ञोक्तं जो देवशर्मन्! मया यथाकालानुरूपः पुरुषकारो न मुक्त एव, अधुना जावतः प्रव्रज्यांगीकृता च, अतो मच्चित्ते संपदभिलाषो नास्ति, उचितकालं ज्ञात्वानशनं प्रतिप..मत आहारग्रहणं न करोमि. तेनोक्तमाहारग्रहणेऽक्रियमाणे ते सुतः कोपं प्राप्स्यति, राज्ञोक्तं तस्य निःकारणः कोपोऽस्ति, सत्यप्रतिज्ञाः खलु तपस्विनो जवंति, तेनोक्तं हे देव! त्वं कुमारचरितस्य ज्ञातवृत्तांत एवासि, तस्मान्न युक्तं प्रमादं कर्तुं. अत्रांतरे नृपपुत्रश्चिंतयत्यद्यापि देवशर्मा कथं नागतः? ततोऽमर्षभृतः खङ्गं गृहीत्वानंदस्तत्रागतः, तेन जणितं च यद्याहारग्रहणं न करोषि तर्ह्यनेन कालजिह्वासदृशेन करवालेन ते मस्तकं छिनझि, राज्ञोक्तं हे नरवर! देहावासं मरणांतमशाश्वतमसारं जानन् कः पुमान् मरणादुद्विग्नो भवेत्? यतो देहिनामेकस्मिन् दिने देहं त्यक्त्वावश्यं गंतव्यं, गर्जसमयादारभ्यानुसमयं म्रियमाणं जीवं जीवतीति जनः कथं वदति? एकसार्थेन परलोकं प्रस्थितानां सार्थिकानां मध्ये यदि कोऽप्यग्रतो व्रजति तदेह जयकारणं किं? जीवितमनित्यमस्ति, मरणं त्ववश्यमिति यस्य मनसि निश्चयो वर्तते

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्य शून्यगृहपशोरिव जीवितैकाशा.

तथा निश्चितं जराधनुर्हस्तो विमुक्तव्याधिशतबाणः प्रजातव्याधो मनुष्यमृगयूथवधंकुर्वाण आगछति. तथा मृत्युर्जीवानां प्रत्यपायं न गणयति, न च प्रतीकारं गणयति, न वा चिरानुवृत्तिं गणयति, मृगकुलेषु सिंह इव स्वछंदसुखं मृत्युर्विचरति, तथापि जरामरणरोगोपशामकममृतसारं परिणामसुखं जिनवचनरसायनं पीत्वाहं मरणान्न बिभेमि. तथा क्षपितपापमलानां परित्यक्तबंधुस्नेहनिगडानां मनुष्याणां कृतप्रतीकारं कालमरणं किं करोति? तथार्जिततपोधनानां कलेवरगृहेऽपि निष्पिपासानां संलिखितशरीराणां सुविहितानां मरणमपि वरं. पुनर्धीराः पुमांसः सुगृहीततपःपाथेयाः संत आत्मानं नियमेन निर्विश्य मरणं सहायं मन्वाना मनोरथैर्मरणं मार्गयंति. तथा हे नरवर यस्य मृतस्य स्वर्गो मोक्षो वैकतरो नियमेन भवति तस्य मनुष्यस्य मरणमप्युत्सवभूतं विद्यते. तथा निरंतररोगव्यसनविषव्याप्तदीर्घदंष्ट्रात्कृतांतकृष्णसर्पाज्जीवः कुत्र गतो मुच्यते? यथा वा कर्षुकः कालेन परिपाकमुपगतानि धान्यानि लुनाति, तथा कृतांतो जातानि भूतानि लुनाति. तथा यत्र जरारोगादीनामत्यंतमनवतारस्तेषु सुरेष्वपि यदि तावन्मृत्युः स्वछंदसुखं विचरति, तर्हि किं पु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नर्जरारोगशोकादिभिर्नित्यमुपद्रुते मानुष्ये? यन्नरो निमेषमपि जीवति, स मृत्योः प्रमाद एव ज्ञेयः, तस्मात्कातरजनसेवितायायशसेऽवकाशं मा देहि? यतो मृत्युदंष्ट्राप्रविष्टं जनं निवर्तयितुमिंद्रोऽपि न समर्थः, अतो मृतमारणमात्रेण हे वत्स! निजकुलं मा कलंकय? हंत! स्वयं त्यक्तमाहारं कथं गृह्णामि?

इदं वचनं श्रुत्वा कोपानलप्रज्वलितरक्तनेत्रेण कुमारेणाद्यापि कथं जल्पतीति विचिंत्य मस्तके खड्गेन प्रहतः, तदा तेन राज्ञा ज्ञाततत्त्वेन सतैषोऽपि पूर्वकृतकर्मदोष इति शुभभावेन नमो जिनेभ्य इति परिचिंतितं. ततः—सव्वो पुव्वकयाणं । कम्माणं पावए फलविवागं ॥ अवराहेसु गुणेसु य । निमित्तमेत्तं परो होइ ॥ १ ॥ एवं चिंतयन् सोऽकलुषचित्तो महात्मा कलुषचित्तेन तेन पापिना पुनः प्रहृत्य विनाशितो मृत्वा च सनत्कुमारकल्पे लीलारामे विमाने पंचसागरोपमायुर्दीप्तिमान् सुरवर उत्पन्नः. इतरोऽपि राज्यं कृत्वा मृत्वा रत्नप्रभायां पृथिव्यामुत्कृष्टायुर्नैरयिक उत्पन्नः.

इति श्रीमद्बृहत्खरतरगणाधीश्वरश्रीजिनभक्तिसूरिशिष्यश्रीजिनलाभसूरितत्सत्तीर्थ्यश्रीप्रीतिसागरगणिशिष्यवाचनाचार्यसंविग्नपक्षीयश्रीमदमृतधर्मगणिशिष्यपाठकश्रीक्षमाकल्याणगणिविनिर्मिते संस्कृ-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

तमयसमरादित्यचरित्रे सिंहानंदपितापुत्रप्रबंधरूपो द्वितीयो भवः समाप्तः. ॥ श्रीरस्तु ॥

॥ अथ तृतीयभववर्णनं प्रारभ्यते ॥

ध्यात्वा नवपदीं भक्त्या । चित्तेऽभीष्टार्थदायिकां ॥ नृपतापसयोरेव । तृतीयं जन्म वर्ण्यते ॥ ॥१॥ नृपजीवः सुरस्तत्र । भुक्त्वा दिव्यं महासुखं ॥ यत्रोत्पन्नस्ततश्च्युत्वा । सांप्रतं तन्निशम्यतां ॥२॥ अत्र मूलचरित्रगाथा यथा—वक्खायं जं भणियं । सीहाणंदो य तह पियापुत्ता ॥ सिहिजालिणि माइसुआ । एत्तो एयं पवक्खामि ॥ १ ॥ तृतीये मनुष्यभवे शिखिजालिनीनामानौ पुत्रमातरावभूतां, तथाहि—इहैव जंबूद्वीपे द्वीपे पश्चिममहाविदेहे क्षेत्रेऽपरिमितजननिवासमननुभूतव्याधिवेदनमदृष्टपरचक्रविभ्रमं सुंदरनगरनायकभूतं कोसनाम नगरमस्ति, यत्र सरलस्वभावः स्थिरस्नेहानुबंधोऽनंगराजधानी धर्मफलसदृशः स्त्रीजनो विद्यते, पुनर्यत्र प्रियंवदः सत्यवचन उदारचरितो धर्मनिरतो मनुष्यवर्गोऽस्ति, तत्र चानेकसंग्रामसंघट्टनिर्जितदृप्तनरेंद्रावनतविकटमुकुटकोटिरत्नप्रभारंजितचरणयुगलोऽजितसेननाम राजास्ति, तस्य च सकलराज्यचिंतकः स्वस्मान्निर्विशेष इंद्रशर्मानाम

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ब्राह्मणोऽमात्योऽस्ति, तस्य शुभंकरा नाम भार्या, इतश्च स आनंदनैरयिकस्तस्मिन्नरके एकं सागरोपमं क्षपयित्वा, अन्यान्यपि किंचिदूनानि चत्वारि सागरोपमाणि संसारे परिभ्रम्येंद्रशर्मब्राह्मणस्य शुभंकराया भार्यायाः कुक्षौ स्त्रीगर्भतयोत्पन्नः, उचितसमये जाता च, जालिनीति तस्या नाम कृतं, क्रमेण यौवनं प्राप्ता, तस्यैव राज्ञो बुद्धिसागराभिधानसचिवपुत्राय ब्रह्मदत्ताय दत्ता च, कृतं पाणिग्रहणं, भोगान् भुंजतोस्तयोः कोऽपि कालो गतः.

इतश्च स सिंहजीवदेवस्ततो देवलोकाच्च्युत्वा कर्मणामचिंत्यमाहात्म्यतया तस्या एव जालिन्याः कुक्षौ पुत्रत्वेनोत्पन्नः, तया च तस्यामेव रात्रौ स्वप्नो दृष्टो यथा सुवर्णमयः पूर्णकलशो ममोदरं प्रविष्टः, स चासंजातपरितोषाया ममोदराद्विनिर्गतः सन् कथं कथमपि भग्नः, तं च दृष्ट्वैषा भयाकुला सती जागृता, तस्याः संकीर्णः सुखरसो जातः, शुभाशुभरूपत्वात्तया स स्वप्नो भर्त्रे न प्रोक्तः, ततस्तस्या गर्भः प्रवर्धितुं प्रवृत्तः, तस्या देहे मनसि च पीडा जाता, तया चिंतितं च तावदेतं पापगर्भं व्यापादयामीति, गर्भपातनानि प्रयुक्तानि, परं कर्मविपाकतो गर्भो न विनष्टः, ब्रह्मदत्तेन स वृत्तांतो ज्ञातश्च, तेन परिजनो नियुक्तो यथा प्रसूतिसमये गर्भविनाशो न भवति तथा युष्माभिर्यतितव्यं,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अपि च भार्यापरितोषनिमित्तं कथंचित्तच्चित्तं वंचयित्वा मह्यं निवेदनीय इति. ततस्तस्या दोहदो
जातः, सर्वजंतूनामानंदं करोमि, देवगृहेषु महापूजाः संपादयामि, धर्मनिरतान् महातपस्विनो भ-
गवतः पूजयामि, किंचित्परलोकमार्गं शृणोमीति. भर्त्रा तस्या दोहदः संपादितः, गर्भप्रभावेण सा
लोकस्य मनोरमा जाता, प्रसूतिसमयः प्राप्तः, एषा प्रसूता, अनया चिंतितं चैष एतावत्परिजनसम-
क्षं कथं व्यापादनीय इति. अत्रांतरे ज्ञाततदभिप्रायया बंधुजीवाभिधानया तद्बालसख्या ब्रह्मदत्तव-
चनं स्मृत्वा प्रोक्तं, हे स्वामिनि! एष गर्भो निश्चितं पापोऽस्ति, तस्मात्क्लेशप्रयासकारकेणानेन ग-
र्भेणालमेष परिष्ठापित एव वरमिति. ततः कषायपरवशया जालिन्या व्यापादने सखीजनलज्जालुतया
प्रोक्तं यूयं जानीतेति. ततः सख्या गृहीतो बालकः, ब्रह्मदत्ताय निवेदितं, तेन तस्य सर्वं समाधा-
नं कृतं, भार्या मृतगर्भेति लोके वादश्च प्रकटीकृतः, एवं च कोऽपि कालोऽतिक्रांतः, बालकस्य शी-
खीति नाम प्रतिष्ठापितं, स कलासमूहेन देहोपचयेन च वृद्धिमुपगतः, ब्रह्मदत्तेन पित्रा तस्य का-
लोचितं सर्वं संपादितं, पश्चाल्लोकसमक्षं पुत्रत्वेन गृहीतः, अनेन स्वप्नदर्शनरूपो गर्भपातनादिकश्च
वृत्तांतो विज्ञातः, एष वैराग्यवान् जातः, अत्रांतरे पुत्रस्य जननी जालिनी ज्ञातवृत्तांता सती तदु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परि कषायिता, तदा तेन शिखिकुमारेण चिंतितं. कथमित्याह—एवंविधाः कषायाः । पापा भववृ-क्षमूलमेघौघाः ॥ मोक्षार्थमुद्यतैर्जैः—र्वर्जयितव्याः प्रयत्नेन ॥ १ ॥ एभ्यः कर्मविवृद्धि—स्ततो भ-वस्तत्र दुःखसमुदायः ॥ तस्मादुद्विजमानः । परित्यजेत्तान् महापापान् ॥ २ ॥ तत्कषायोदयेन च सा जालिनी ब्रह्मदत्तोपरि कुपिता, गृहकरणीयं सकलं परित्यक्तं, ब्रह्मदत्तो भणितश्चैतं वा प्रियं कु-रु मां वेति? एतस्मिन्नपरित्यक्ते प्राणाधारभूतं जलमप्यहं न गृह्णामीति. एष वृत्तांतः शिखिकुमारेण श्रुतः, ततोऽप्युद्विग्नः स गृहान्निर्गतः, चिंतितं चाहो कीदृशी मे पापपरिणतिर्जाता? येन जनन्य-प्येवं वर्तते, एतद्व्यतिकरेण च मे पितापि दुःखितोऽस्ति, तस्मान्ममेह स्थातुं न युक्तं, एवं विचिं-त्य तातमनापृच्छ्य स नगरान्निर्गतः, अशोकवनोद्यानं गतः, तत्र चाशोकवृक्षतलगतः शिष्यपरिवा-रसहितो विजयसिंहनामाचार्यो दृष्टः, कीदृश इत्याह—

एकविधसंयमरतः, द्विविधदुर्ध्यानविरहितः, त्रिदंडरहितः, चतुष्कषायमथनः, पंचेंद्रियनिग्रहप-रः, षड्जीवनिकायवत्सलः, सप्तभयविमुक्तः, अष्टमदस्थानरहितः, नवविधब्रह्मचर्यगुप्तः, दशविधधर्म-सुस्थितमनाः, एकादशांगज्ञानी, द्वादशतपश्चरणकर्मणि रतश्चेति. ततस्तमेवंविधमाचार्यं दृष्ट्वा तस्य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रीतिः समुत्पन्ना, तेन चिंतितं चैष खलु धन्यो योऽनवस्थितस्नेहविभ्रमे संसारे एवं धर्मे निरतः, तस्मादेनं तावत्पृच्छामि, किं पुनरेतस्य निर्वेदकारणं? येनैष एवं धर्मे निरत इति. ततस्तस्य समीपं स गतः, सविनयं भगवंतं प्रणमतिस्म, गुरुणापि तस्मै धर्मलाभो दत्तः, स तस्य पादमूले उपविष्टो भगवंतं पृच्छतिस्म, हे स्वामिंस्तव निर्वेदकारणं किं? येन त्वमेवं सर्वांगसुंदरः सुंदरतयैव च सूचितनिजविभवविस्तारः, विभवविस्तारानुमितस्वजनवर्गोऽपि सन् स्वजनवर्गनिरपेक्षामिमामीदृशीं निःसंगतां प्रपन्नोऽसि? गुरुणोक्तं शृणु?—

अस्थिमांसरुधिरसंमिलितेऽस्मिन् शरीरेऽपि किं सुंदरत्वं? प्रयासमात्रफले विभवविस्तारे को वा प्रतिबंधः? को वा स्वप्नसमागमचंचले स्वजनवर्गे इति. अन्यच्च रोगपीडितः पुमान् स्वजनानां मध्यगतोऽपीह संसारे एकः सन् क्लिश्यते, स्वजनोऽपि च तस्य रोगं न विभज्य गृह्णाति, नव च नाशयति, तथा करुणस्वरेण रोदनं कुर्वतां बांधवानां मध्ये एकाक्येव जीवो म्रियते, न च बंधुजनस्तं मरणाद्वारयति, एवं दारा अपि म्रियमाणं नैव धारयंति, किंच जीव एकः कर्माणि करोति, तत्फलमप्येकाक्येव समनुभवति, एको जायते म्रियते च, परलोकमप्येकको याति, प्रत्येकं प्रत्येकं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजकर्मफलमनुभवतां जीवानां जगति कः कस्य स्वजनो भवति? को वा कस्यान्यजनो भवति? तथा वैरिकोऽपि मृत्वा जननी जायते, सुतोऽपि रिपुरिति, तस्मादनवस्थितभावे स्वजने संग इति मोहफलं. अन्यच्चास्माकमेव यद् वृत्तं तत् शृणु?—

इहैव विजये लक्ष्मीनिलयं नाम नगरमस्ति, तत्र सागरदत्तो नाम सार्थवाहः, तस्य श्रीमती भार्या, तयोश्चाहं पुत्रः, कुमारभावे वर्तमानोऽहं तन्नगरासन्नमेव लक्ष्मीपर्वतं गतः. तत्र चैकस्मिन् विभागे स्निग्धपत्रसंचयोपेतो धराप्रविष्टदीर्घपादो नालिकेरीपादपो दृष्टः, तं च पश्यतो मम कौतुकं समुत्पन्नं, मया चिंतितमहो आश्चर्यं! एतावन्मात्रस्य वृक्षस्य पाद एतावन्मात्राद्विभागादवतीर्य धरणीं प्रविष्ट इति, तस्मान्निश्चितमत्र कारणेन भवितव्यं. अत्रांतरे चाप्रस्ताव एव मम प्रमोदः संजातः, सुरभिवायुर्विजृंभितः, पशुगणैः सहजोऽपि वैरानुबंधो विमुक्तः, लक्ष्मीपर्वतोऽपि वनश्रिया समाध्यासितः, काननोद्यानानि सार्वर्तुककुसुमैः पुष्पितानि, पक्षिसमूहाः प्रमुदिताः, षट्पदावलीभिर्मनोहरोत्तालरम्यं च गुंजितं, सूर्यो विशुद्धप्रकाशं तापरहितं च तं प्रदेशमुद्योतयितुं प्रवृत्तः. ततो मया चिंतितमथ पुनः किमिदं भुवनाश्चर्यमिति? अत्रांतरे तरुणरविमंडलतुल्यं सुविशुद्धजात्यकांचनानेकर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्नमंडितं जयजयरवापूरितनभोंगणं देवगीयमानमंगलं निपतत्कुसुमवृष्ट्यनेकदेवपरिकरितं जिवि-तसंसारचक्रसूचकं पश्चिमदिग्भागादागच्छद्भगवतः श्रीअजितदेवतीर्थंकरस्य धर्मचक्रं मया दृष्टमिति. तदनंतरं चानुपमगुणरत्नभूमयः श्वेतांबरधारिणोऽनेके साधवो दृष्टाः, ततः सुरधृतकुंदधवलछत्रो दुंदुभिध्वनिबधिरितनभोंगणो विराजमानदिव्यभामंडलः, सुरपतिसमुत्क्षिप्तचारुचामरः सुरासुरमनुजवृंदसंस्तुतः कालागुरुप्रवरतुरुष्कधूपमघमघायमानगंधोऽत्यंतरम्यकांचनमयदिव्यकमलावल्यां संचरन् भगवांस्त्रैलोक्यनाथो निस्तीर्णभवसमुद्रोऽजितदेवतीर्थंकरो दृष्ट इति. तं च पश्यतो मम प्रमोदः समुत्पन्नः, मिथ्यात्वतिमिरेण प्रणष्टं, धर्मव्यवसायेन विजृंभितं, मया चिंतितं च धन्योऽहं येन मया त्रैलोक्यचिंतामणिर्भगवानुपलब्ध इति.

अत्रांतरे च देवैर्भगवतः समवसरणं विरचितं, कीदृशमित्याह—मणिकनकरूप्यमयत्रिप्राकारं, सुविभक्तदिव्यतोरणं, रत्नमयविचित्रकपिशीर्षकं, उच्छ्रितध्वजसमूहं, गुंजन्मधुकरसेविताशोकशोभितं, उच्छ्रितद्वादशश्वेतातपत्रमनोहरं, वैडूर्यरत्नमयदिव्यसिंहासनमिति. ईदृशे समवसरणे भगवान् प्रविश्य सिंहासने उपविष्टः, धर्मकथा प्रारब्धा, भगवताऽशाश्वतो जीवलोकः कथितः, मयापि

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

सम्यग्ज्ञातः, ततस्तं पूर्वकौतुकमनुस्मरता मया त्रैलोक्यनाथो भगवान् पृष्टः, हे भगवन्! अथ तस्य नालिकेरीपादपस्य पादः कथं पुनरवतीर्णः? तत्र किं द्रव्यजातमस्ति किं वा नैवेति? किंपरिमाणं वा केन वा तत्स्थापितं? कीदृशो वा तस्य विपाक इति. भगवतोक्तं शृणु?—लोभदोषेण पादोऽवतीर्णः, तत्र द्रव्यजातं चास्ति, तच्च दीनारसप्तलक्षपरिमाणं, त्वया तेन नालिकेरीजीवेन च स्थापितं, एतस्य विपाकश्च धर्मसाधकोऽस्ति. मयोक्तं भगवन्! कथं पुनर्मयानेन च स्थापितं? कथं च ममेदृशो विपाकोऽस्यापीदृश इति. भगवतोक्तं शृणु?—

इहैव विजयेऽमरपुरं नाम नगरमस्ति. तत्र चामरदेवो नाम गृहपतिरभवत, तस्य सुंदरीभार्या, तयोश्च युवां द्वावप्युपर्युपरि जातौ गुणचंद्रबालचंद्राभिधानौ पुत्रावुभावेति, संप्राप्तयौवनौ च भवंतौ महद्वस्त्रादिभांडं गृहीत्वा वाणिज्यार्थमिमं देशमागतौ. भांडं विक्रीतं, इष्टलाभः संप्राप्तः. अत्रांतरे विजयवर्मनरपतिना लक्ष्मीनिलयस्वामी सूरतेजानाम नरपतिर्युद्धकरणायाभाषितः, स च नगरेऽसारं त्यक्त्वा गृहीतसारनगरलोक इमं पर्वतमारूढः, भवंतावपि तेनैव नरपतिना सह द्रव्यजातं गृहीत्वा परबलभयेन लक्ष्मीपर्वतमारूढौ, एतस्मिन् प्रदेशे स्थितौ, परस्परमालोच्येदं द्रव्यजातं युवाभ्यामत्र

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निधानीकृतं, कोऽपि कालोऽतिक्रांतः. ततो लोजदोषेण जागग्राहीति कृत्वा विषप्रयोगकरणेन गुणचंडेण त्वं व्यापादितः, शुद्धस्वजावत्वेन च व्यंतरसुरेषूत्पन्नः, गुणचंद्रोऽपि तद्द्रव्यमपरिज्ञुज्यात्रैव पर्वते महाज्ञुजंगेन दष्टः सन् मृत्वा रत्नप्रजायां नरकपृथिव्यां नारक उत्पन्नः. ततस्त्वं देशोनपल्योपमं निजायुः प्रपाल्य ततश्च्युतः सन्नत्रैव विजये ढंकणापुरे नगरे हरिनंदिसार्थवाहस्य वसुमत्या जार्यायाः कुक्षौ पुत्रत्वेनोत्पन्नोऽसि, कालक्रमेण जातः, देवदत्त इति तव नाम च प्रतिष्ठापितं, कुमारजावं प्राप्तः. अत्रांतरे गुणचंद्रोऽपि नरकादुध्धृत्य लोजदोषेणात्रैव लक्ष्मीपर्वते एतस्यैव च निधानस्य समीपप्रदेशे सर्प उत्पन्न इति, अनेन च तद्द्रव्यं परिगृहीतं. अत्रांतरे लक्ष्मीपर्वतनिवासिन्या देवताया उत्सवे त्वं लक्ष्मीपर्वतं समागतः, देवतायाः पूजा कृता, दीनानाथेज्यो द्रव्यजातं दत्तं, जोजनोपचारः संपादितः. ततस्त्वं पूर्वजवस्नेहेन पर्वतस्य रम्यतया परिभ्रमन्निममुद्देशमागतः, भुजंगमेन दृष्टः, ततो लोजदोषेणैष एतद्द्रव्यजातं गृहीष्यतीति चरणप्रदेशे दष्टो विषस्यात्युग्रतया तत्क्षणादेव धरणीपृष्ठे निपतितः, पार्श्ववर्तिना तव परिजनेन ज्ञुजंगो व्यापादितोऽत्रैव पर्वते सिंहतयोत्पन्नश्चेति. त्वमपि मृत्वात्रैव विजये कयंगलायां नगर्यां शिवदेवस्य कुलपुत्रकस्य यशोधराया जार्यायाः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कुक्षौ पुत्रत्वेन जातः, कालक्रमेणेंद्रदेव इति ते नाम च प्रतिष्ठापितं, यौवनं प्राप्तः. इतश्च तेन सिंहजीवेन पूर्वभवाभ्यस्तभावनात भयसंज्ञया तद्द्रव्यं परिगृहीतं, एवं च कोऽपि कालो गतः. अन्यदा च वीरदेवनरपतिना निजस्वामिना लक्ष्मीनिलयस्वामिनो मानभंगस्य राज्ञः समीपं त्वं प्रेषितः, आगछंश्च कतिपयपुरुषपरिवारितः कालक्रमेणेममुद्देशं प्राप्तः, पादपस्याध उपविष्टश्च. अत्रांतरे गिरिगुहामुखगतेन सिंहेन त्वं दृष्टः, ततो लोभसंज्ञाविपर्यासितचित्तनानेन सिंहेन त्वं व्यापादितोऽसि, अयमपि च त्वया मारित इति.

ततो युवामत्रैव विजये श्रीस्थलके पत्तने यक्षदासनाम्नश्चंमालस्य माइजक्षाया भार्यायाः कुक्षौ युगलभ्रातृतयोत्पन्नौ च, कालक्रमेण जातौ, नाम्नी प्रतिष्ठापिते, तव नाम कालसेन इतरस्य चंमसेन इति, यौवनं प्राप्तौ. अन्यदाखेटकनिमित्तं लक्ष्मीपर्वतं गतौ, युवाभ्यां शूकरो व्यापादितः, स चैतस्मिन्नेव निधानप्रदेशे हतः, अग्निः प्रज्वालितः, अग्निपक्वं च तन्मांसं खादितुं प्रवृत्तौ. अत्रांतरे कट्टारकशस्त्रं तिक्ष्णीकृत्य कथंचिदनर्थदंडत एव धरित्रीं खनता चंमसेनेन निधानकलशस्यैकदेश उपलब्धः, गोपयितुं प्रवृत्तः, त्वया लक्षितश्च. ततो द्रव्यलोभेन तेन सुविश्वस्तस्त्वं व्यापादि-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

तो वालुकाप्रभायां नरकपृथिव्यां पंचसागरोपमायुर्नारक उत्पन्नः. अयमपि तद्द्रव्यलोभेन तमेव देशममुंचन् कतिपयवर्षेष्वतिक्रांतेषु तद्द्रव्यमनुक्त्वान्यवैरिचिंडालेन व्यापादितः सन् षष्ठ्यां नरकपृथिव्यामष्टादशसागरोपमायुर्नारक उत्पन्न इति. ततस्त्वं निजायुषि प्रतिपूर्णे नरकादुध्धृत्यात्रैव विजये श्रीमतीग्रामे शालिभद्रस्य गृहपतेर्नंदिन्या भार्यायाः कुक्षौ पुत्रतयोत्पन्नः, कालक्रमेण जातः, बालसुंदर इति ते नाम च प्रतिष्ठापितं, यौवनं प्राप्तः. अत्रांतरे त्वया शीलदेवानगारसमीपेऽप्राप्तपूर्वो जिनवरप्रणीतो धर्मः प्राप्तः, श्रावकत्वं प्रतिपालितं, यथाविधीह त्यागश्च कृतो लांतकाख्ये देवलोके किंचिदूनत्रयोदशसागरोपमायुर्वैमानिकदेव उत्पन्नः, तत्र दिव्यान् भोगान् परिभुज्य निजायुःपरिक्षयेण च्युतः सन्नत्रैव विजये हस्तिनापुरे नगरे सुहस्तिनाम्नो नगरश्रेष्ठिनः कांतिमत्या भार्यायाः कुक्षौ पुत्रतयोत्पन्नोऽसि, इतरोऽपि ततो नरकादुध्धृत्य तत्रैव नगरे तवैव पितुः सोमिलिकाभिधानाया गृहदास्याः कुक्षौ पुत्रतयोत्पन्नः, कालक्रमेण द्वावपि जातौ, नाम्नी प्रतिष्ठापिते, तव नाम समुद्रदत्त इतरस्य मंगलक इति. भवंतौ यथाक्रमेणैव कुमारभावं प्राप्तौ च, अत्रांतरे त्वयानंगदेवगणिगुरुसमीपे जिनभाषितो धर्मोंगीकृतः, देशविरतिः कृता, लक्ष्मीनिलयनिवासिनः श्रावकस्याचलसार्थ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वाहस्य पुत्री जिनमतीनाम्नी कन्या परिणीता च.

अन्यदा च मंगलदाससहितो जिनमतीनिमित्तमेव लक्ष्मीनिलयं गंतुं प्रवृत्तः, कतिपयप्रयाणैस्तमुद्देशं प्राप्तौ यत्र निधानमिति. ततस्तत्र बहुलपत्रलतायुक्तप्रदेशे मुहूर्तं यावद्विश्रामं गृहीतवान्. अस्मिंश्च प्रदेशे त्वया पोमाडवृक्षस्य पादो विनिर्गतो दृष्टः, त्वया कौतुकेन प्रोक्तं भो मंगलकात्र प्रदेशे केनचिद्द्रव्यजातेन भवितव्यं, तेनोक्तं विलोकयामि. त्वयोक्तमनेन विलोकनेनालं, कौतुकमात्रमेव मम कथनकारणं. न पुनर्द्रव्यलोभः, तदा तेनोक्तं ममाधिकतरं कौतुकमस्ति, तस्माद्विलोकयामि कोऽत्र परमार्थ इति? ततो भवतोऽनिष्टमपि तं तथाविधेन तीक्ष्णसारकाष्टेन खनितुं प्रवृत्त इति. तत्र च स्तोकभूमिभागे तेन कलशकंठो दृष्टः, ततः पूर्वकृतकर्मलोभदोषेण मंगलकेन चिंतितमहो एष निधिर्महार्थो यदि कथंचित्स्वामिपुत्रं वंचयित्वा गृहीतुं शक्यत इति. अत्रांतरे त्वयापि कलशकंठको दृष्टः, एष भणितश्च हे भद्र मंगलक! अनेन द्रव्येणालं, त्वमेहि नगरं गच्छाव इति. ततस्तमुद्देशं पूरयित्वा मंगलको हृष्ट इव गंतुं प्रवृत्तः, त्वयोक्तं च कस्यापि पुरत एष व्यतिकरोऽधिकरणहेतुभूतो न जल्पनीयस्तेनोक्तं हे स्वामिपुत्र! न जल्पामि, अनेन च चिंतितं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मया विनाप्येष एतं गृहीष्यति, अतस्तस्यैष प्रयासस्तस्मादनेन कथमहं वंच्ये इति, ततो यावदेष एतद्द्रव्यं न गृह्णाति तावदेवाहं केनचिदुपायेनैनं व्यापादयिष्यामीति, अत्रांतरे नगरं प्राप्तौ, आरामसमीपस्थितेन च त्वया मंगलको भणितो हे भद्र मंगलक! त्वं गच्छ? श्वशुरगृहप्रवृत्तिं कुतोऽप्युपलभ्य मह्यं निवेदय येन नगरं प्रविशावः, मंगलकः प्रवृत्तोऽनेन चिंतितं चैष खलु नगरं प्रविष्टः सन् शीघ्रमेवैतद्द्रव्यं गृहीष्यति, तस्मात्तथा करोमि यथैषोऽत्र न प्रविशति, गच्छन्नयं मम सुखेन व्यापादनीयो भविष्यति, तस्मादेनमिद्बं निवेदयामि यथा स्त्रीस्वभावतः कुलविरुद्धमाचर्य तव गृहिणी कस्यचिदन्यपुरुषस्य गृहे प्रविष्टा, अतस्ते श्वशुरकुलमत्यंतमुद्विग्नमस्ति, पुनरेतैरावयोरागमनं श्रुतं, अतोऽधिकतरं लज्जितास्तस्मादत्र प्रवेष्टुं न युक्तमिति विचिंत्य ततो नगरं प्रविश्य कालक्षेपं कृत्वा मायाचरित्रेण विच्छायमुखः संस्त्वत्समीपमागतः, यथाचिंतितं निवेदितं च. ततो विषण्णेन सता त्वया चिंतितं स्त्रीभावं धिगस्तु यदेवंविधापि श्रावककुलोत्पन्ना सुविज्ञातजिनवचनसारोभयलोकविरुद्धमाचरति, अथवा मोहभावस्य दुष्करं किमपि नास्ति, तस्मादिदानीमपि मम गृहवासेनालं, तीर्थंकरभाषितं साधुधर्ममंगीकुर्वे, एतत्पर्यवसानः खल्वेष स्नेहबंधस्तस्मान्मम स्वगृहगमनेनाप्यलमि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त एव गच्छामि यत्र भगवाननंगदेवोऽस्ति, एष मंगलकोऽपीत एव गृहं व्रजतु, अस्य क्लेशोत्पादनेन किमिति स्वमनसि निश्चित्य यथाचिंतितमेव मंगलको भणितः, तदानेन चिंतितमहो एष मायाचरितेन मां वंचयितुमुद्यतस्तस्मादहमनेन कथं वंच्ये? तस्मात्तावदेतं ब्रवीमि यावत्त्वं चिंतितदेशं न प्राप्तोऽसि तावदहं भवंतं कथं परित्यजामि? एवं कियंति दिनान्यनेन सार्धं गत्वैनं व्यापादयिष्यामीति विचिंत्यानेन त्वं यथाचिंतितं भणितस्त्वया च प्रतिभणितो हे भद्र मंगलक! यदि ते एवमाग्रहस्तर्ह्येवं भवत्विति. ततः कंचित्साधुं पृष्ट्वा भगवाननंगदेवः क्वास्तीत्यालोच्य युवां प्रतिमार्गेण प्रस्थितौ, कियंत्यपि दिनान्यतिक्रांतानि.

अन्यदातिविषमारण्यमध्ये दिनकरे आकाशमध्यमभिगते सत्यत्यंतदुष्टहृदयेन मंगलकेन महासाहसं धृत्वा लोभदोषतोऽनिवर्तमानेन सुविश्वस्तहृदय एव त्वं छुरिकया पृष्टदेशे प्रहत इति. अत्रांतरे मार्गं प्रतिपन्नोऽनेकसाधुपरिवृतोऽनंगदेवो भगवानकस्मात्तत्रैव प्रदेशे समागतः, अग्रगामिभिः साधुभिस्त्वं दृष्टः, अत्रांतरे भयेन छुरिकामपहाय मंगलको नष्टः, त्वया च चिंतितं हा किमेतदिति! किं तस्कराः समागता भवेयुः? पृष्टतो विलोकितं यावत्ससंभ्रमाकुलं पलायमानो मंगल-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

को दृष्टः, त्वया च चिंतितमन्ये तु चौरा अत्र न दृश्यंते, एष मंगलकः पलायते च, ततः किमे-तदिति, अत्रांतरे रुधिरानुरक्ता क्षुरिका दृष्टा, सा च त्वया गृहीतोपलक्षिता च, ततस्तव विकल्पः समुत्पन्नः किमेतन्मंगलकेन कृतं भवेत्? अथवैतस्यैवं व्यवसायकारणं न किमप्युत्प्रेक्षे, तस्मादेतं मंगलकं तावत्शब्दयामि, एष एवात्र मह्यं परमार्थं कथयिष्यति, मंगलकः शब्दितो यावदधिकतरं पलायितुमारब्धस्ततस्तव विकल्पोऽपगतः, हं तैते नैवैतद्व्यवसितमिति, किं पुनस्तावत्तस्यैतस्य व्यवसा-यस्य कारणं? तदा निधानवृत्तांतः स्मृमागतः, त्वया च चिंतितं लोभवशवर्तिनां जंतूनां किमप्यकर-णीयं नास्ति, अत एव कारणाज्जिनमतीवृत्तांतोऽप्यनेन कल्पितो भवेदन्यथा तादृशी महाकुलोत्प-न्ना सुविज्ञातजिनवचनसारा च तादृशमुभयलोकविरुद्धं कथं करिष्यति? अत्रांतरे ते साधवस्तमु-द्देशं प्राप्ताः, तैस्त्वमुपलक्षितश्च, त्वया वंदिताश्च, साधुभिर्धर्मलाभो दत्तः, तैः पृष्टश्च हे श्रावक! किमेतदिति, त्वया तेभ्यो यथावृत्तो वृत्तांतः कथितः, साधुभिः समाश्वासितः. अत्रांतरेऽनंगदेवेन त्वं दृष्टः, त्वया स वंदितः, अनेन त्वं धर्मलाभेनाभिनंदितः, प्रवृत्तिं पृष्टः, त्वया सा कथिता, गुरु-णा समाश्वासितस्त्वं साधुगच्छेन सह निवृत्तः थाणेसरं नाम सन्निवेशं प्राप्तः, तत्र गुरुर्मासकल्पं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थितः, तत्र क्षुरिकाप्रहारोऽपि प्रगुणो जातः, जिनमतीप्रवृत्तिर्यथास्थितोपलब्धा, त्वया चिंतितं चाहो मंगलकस्य वंचनाप्रकारः! अहो मोहस्य विचित्रता! अहो संसारस्यानुपादेयता! तस्माद्यद्यपि जिनमत्यखंडितशीला, तथापि गृहाश्रमेणालं, उभयलोकसुखावहं समीहितं संपादयामि च, सा च सुविज्ञातजिनवचनसारा प्रायेण मम तुल्यचित्ता च वर्तते, तस्मादिमं व्यतिकरं श्रुत्वा सापि प्रव्रजिष्यति, एवं च कृते सापि खलु तपस्विन्यस्माद्दुःखबहुलाद्भवसमुद्रात्समुत्तारिता भवति, अप्रव्रजितस्य मे तस्या दर्शनेन चालं, यतश्चारित्रप्रतिपत्तिर्बहुविघ्ना वर्तते, एकांतसुखावहा चैषैवेति विचिंत्यानंगदेवगुरुसमीपे त्वं प्रव्रजितः, कोऽपि कालो व्यतिक्रांतः, जिनमत्या कुतोऽप्येष व्यतिकरः श्रुतः. एषा संविग्ना, तया चिंतितं च भर्त्रा शोभनमनुष्ठितं, एष संसारः क्लेशप्रयासबहुलः, संयोगश्च वियोगावसानः, विषयपरिभोगस्य विपाकश्च दारुणः, मनुष्यत्वे जिनमतं च दुर्लभं, उभयलोकसुखावहं चैतदेवेति विचिंत्य जननीजनकयोराज्ञां गृहीत्वा ताभ्यामनुज्ञाता सती त्वामन्वेषयंती सा यत्र त्वं तत्रागता, अनया त्वं दृष्टश्च, निवृत्तिपुरप्रस्थितं त्वां दृष्ट्वानया भणितं च हे आर्यपुत्र! त्वया शोभनमनुष्ठितं, मोहवल्ली छिन्ना, सत्पुरुषचरितमवलंबितं, अस्माद्भवसमुद्रादहं समुत्तारिता, आत्मा च स-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मुत्तारितः, इत्यभिनंद्य सानंगदेवगुरुपार्श्वे प्रव्रज्यामंगीचक्रे, कोऽपि कालोऽतिक्रांतः, ततस्त्वं निरती-चारं चारित्रमनुपाल्य कालक्रमेण मृतः सन् पंचविंशतिसागरोपमायुर्ग्रैवेयकसुरः समुत्पन्नः, इतरोऽपि मंगलकस्तमर्थं परिगृह्य महाशिलासंचयाच्छादितं च कृत्वा तन्ममत्वेन तत्रैव स्थितो मांसाहारेण क्लेशसंपादितवृत्तिर्निजायुः पालयित्वा मृतः संस्तमःप्रभाभिधानायां नरकपृथिव्यां द्वाविंशतिसागरोपमामायुर्नारकः समुत्पन्न इति.

ततश्च महता परिक्लेशेन तदायुः परिपाल्योध्धृतः सन्नत्रैव विजये राष्ट्रवर्धनके ग्रामे वेल्लिकचंडालस्य गृहे छगलत्वेनोत्पन्नः, यौवनं प्राप्तश्च. अन्यदा बहुछगलकमध्यगतस्ततो राष्ट्रवर्धनग्रामाज्जयस्थलं पुरं नीयमान इमं निधानोद्देशं प्राप्तः, तमुद्देशं निरीक्षमाणस्य तस्य पूर्वभवाभ्यासतो जातिस्मरणमुत्पन्नं. ततो लोभदोषेण वेल्लिकाकृष्टोऽपि तस्मादुद्देशादन्यत्र गंतुं नेच्छति, प्रेर्यमाणोऽपि पुनः पुनर्निवर्तते. ततः क्रोधाभिभूतेन वेल्लिकेन व्यापादितस्तत्रैव निधानोद्देशे मूषक उत्पन्नः, अनेन चौयसंज्ञया तद् द्रव्यं परिगृहीतं, कंचित्कालमनुपालितं. अन्यदा सोमचंडो नाम द्यूतकारकः कथंचित्परिभ्रमंस्तमुद्देशमागतः, तत्र शालवृक्षसमीपे उपविष्टः, ततोऽज्ञानलोभदोषेण तस्याग्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तः सामर्षमिव परिभ्रमितुं लग्नः, तदा तेन व्यापादितः संस्तस्यैव दुर्गिलिकाभिधानायाः प्रणष्टकर्ण-नासिकाया भार्यायाः कुक्षौ पुत्रतयोत्पन्नः, क्रमेण जातः, तस्य च रुद्रचंद्र इति नाम प्रतिष्ठापितं, अनेकजीवापकारार्थं विषवृक्ष इव यौवनं प्राप्तः, अयुक्तं च व्यवहर्तुमारब्धवान्. अन्यदा क्षात्रमुखे गृहीतः स समरभासुरस्य राज्ञः समीपं नीतः, राज्ञा च वध्यः समाज्ञप्तः, आरक्षकनरैः शूलिकाया-मारोपितः, मृतश्च सन् शर्कराभिधानायां नरकपृथिव्यां किंचिदूनत्रिसागरोपमायुर्नारकः समुत्पन्नः, ततो निजायुः परिपाल्योध्धृतः सन्नत्रैव लक्ष्मीनिलये नगरेऽशोकदत्तस्य श्रेष्ठिनः शुभंकराया भार्या-याः कुक्षौ पुत्रीत्वेनोत्पन्नः, उचितकाले जाता, तस्याः सिरियादेवती नाम च प्रतिष्ठापितं, यौवनं प्राप्ता, सागरदत्तसार्थवाहपुत्राय समुद्रदत्ताय दत्ता, विवाहः संजातः, भोगान् भुंक्ते, अत्रांतरे त्वं ग्रै-वेयकेभ्यश्च्युत्वास्या एव कुक्षौ पुत्रतया समुत्पन्नः, कालक्रमेण जातः, तत्र सागरदत्त इति नाम च प्रतिष्ठापितं, यौवनं प्राप्तः, देवशर्माचार्यसमीपे च प्रतिबुद्धः, ईश्वरस्कंदश्रावकस्य नंदिनीनाम्नी पुत्री परिणीता, भोगसुखमनुभवतोर्युवयोः कालक्रमेण पुत्रो जातः.

अन्यदा च पुत्रजन्माभ्युदयनिमित्तेनैव सपरिवार उद्यानिकायामिममेव भिन्नोद्देशमा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गतः, तत्र च त्वया पुत्रध्वजनिवेशननिमित्तं गर्तं खनता निधानकलशैककंठो दृष्टः. ततस्तमन्यत्र निवेश्य तं च प्रदेशं पुनरपि तथैव कृत्वा भोजनोत्तरकाले नगरं प्रविष्टः, ततस्त्वया चिंतितं किमत्र युक्तमिति, जननीं तावत्पृच्छामि, अस्यै एष व्यतिकरः कथितः, किमत्र युक्तमित्येषा पृष्टा, तया प्रोक्तं तावत्तं प्रदेशं मह्यं दर्शय? ततो यद् युक्तं तद्भणिष्यामीति. तदा तस्यै स प्रदेशो दर्शितः, तया चाज्ञानलोभदोषेण चिंतितमेतं पुत्रं व्यापादयामि, तत एकाकिन्येतद्द्रव्यं गृहीष्यामि, एतद्विचिंत्य त्वं भणितो हे पुत्र! प्रचुरमेतद्द्रव्यमेतस्मिन् गृह्यमाणे कदाचिन्नरपतिर्जानीयात्ततश्च सशेषद्रव्यापहारमपि स करिष्यति, तस्मात्तावदेतेनालमवसरे गृहीष्याम इति. त्वया प्रोक्तं हे अंब! यत्त्वमाज्ञापयसि, ततः सर्वेऽपि स्वस्थानं प्राप्ताः, कतिचिद्दिवसा अतिक्रांतास्तव सुखेन, अस्याः पुनः पूर्वभवाभ्यस्तलोभदोषेण तव मारणोपायचित्तव्याकुलाया दुःखेनेति, उपायः परिचिंतितः, पौषधोपवासपारणकभोजनेऽस्य विषं ददामीति, तत उपवासलघुशरीरो विषप्रयोगेण शीघ्रमेव न भविष्यतीति विचिंत्य च विषं प्रयुक्तं, तेन त्वं व्याकुलीभूतः, अत्रांतरे नंदिन्या त्वत्पत्न्या दृष्टः, अनया कोलाहलः कृतः, ततस्ते जनन्यधिकतरं पूत्कर्तुं प्रवृत्ता, लोकसमूहः संमिलितः, तत एकेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सिद्धपुत्रेण विषापहारिमंत्रसामर्थ्यतः साधर्मिक इति ज्ञात्वा त्वं जीवितः, तदा च ते चिंता समुत्पन्ना, एवमनेकोपद्रवभाजनं मनुष्याणां जीवितं, ततो गृहाश्रमेणालं, प्रमत्तस्य मम पुनरप्येवमेव प्राणापगमो भविष्यति, अतः प्रव्रज्यामंगीकुर्वे, इति विचिंत्य यथोचितेन विधिना देवशर्मगुरुसमीपे प्रव्रज्यां प्रपन्नवान्. निरतीचारं चारित्रं परिपाल्य कालमासे कालं कृत्वा त्रिंशत्सागरोपमायुर्ग्रैवेयकसुरः समुत्पन्न इति, एषा च तव जननी तद्द्रव्यलोभेन तत्रैव स्वहस्तशिल्पनिर्मितं महापीठं कृत्वा पुत्रवधपरिणामजनितनरकायुष्का तद्द्रव्यमभुक्त्वा मृता सती धूमप्रभायां नरकपृथिव्यां पंचदशसागरोपमायुर्नारकत्वेनोत्पन्नेति, तत उध्धृता सत्यनेकतिर्यग्भवेषु भ्रांत्वा पूर्वभवान्यस्तलोभदोषतोऽत्र नालिकेरवृक्षतयोत्पन्नेति. त्वमपि ततश्च्युत्वा सागरदत्तश्रेष्ठिगृहे श्रीमत्याः कुक्षावुत्पन्नोऽसि, द्वयोरपि युवयोः सांप्रतमियमवस्था, एषोऽत्र व्यतिकर इति.

तत एतत् शृण्वतो मम संवेगः समुत्पन्नः, भवचारकान्मनो विरक्तीभूतं, भगवत्समीपे तद्द्रव्यव्यतिकरं विज्ञाय राज्ञानुज्ञातेन मया तद्द्रव्यमानाय्य सकलदुःखितजंतुभ्यो दत्वा विजयधर्मगणधरस्य समीपे प्रव्रज्या प्रतिपन्ना. शिखिकुमारेणोक्तं हे भगवन्नेवमेतत, एष संसार ईदृश एव,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धन्यस्त्वं य एवमभिप्रव्रजित इति. अथ दानादिभेदानाश्रित्य भगवता कतिविधः पुनर्धर्मः प्रज्ञप्तः? गुरुणा भणितं शृणु?—

हे श्रावक! सुरेंद्रनरेंद्रनतैर्जिनेंद्रैर्दानशीलतपोविविधभावनामयश्चतुर्विधो धर्मः प्रोक्तस्तत्र दानं च त्रिविधं भवति, ज्ञानदानमभयदानं धर्मोपग्रहदानं चेति. तत्र यद् ज्ञानदानं तदहं संक्षेपेण व-क्ष्ये—येन दत्तेन जीवो बंधमोक्षयोर्ज्ञायको भवति, तच्च ज्ञानदानं शिवसुखसंपद्बीजं बोध्यं, तथा येन दत्तेन जीवो बहुविधमशेषं पुण्यं पापं च सम्यग्जानन् प्रवृत्तिं निवृत्तिं च करोति, तदा पुण्ये प्रवर्तमानः शीघ्रं नरामरसुखानि प्राप्नोति, पापात्सुनिवृत्तः सन्नरकतिर्यग्दुःखेभ्यो विमुच्यते, तस्यैव निर्मलज्ञानस्य प्रभावेण सुखपरंपरयैव सुविशालं मोक्षसुखं च प्राप्नोति. एवमिहलोके परलोके च जीवो येन कारणेन ज्ञानेन सुखानि प्राप्नोति, तस्मात्तत्सर्वदानेषु प्रधानं ज्ञेयं. यः पुमान् जिने-भ्यः स्फुटं सर्वज्ञभाषितं ज्ञानं ददाति तेन सर्वाणि ऐहलौकिकपारलौकिकसुखानि दत्तानि, ज्ञान-दानेन जीवो गतरागद्वेषमोहः सन् सुरासुरनरपूजितः सर्वज्ञो भवति, क्रमेण सिद्धिं च प्राप्नोति. एतत्खलु ज्ञानदानं संक्षेपतः समाख्यातं, ददतो ग्राहकस्य चैकांतेन हितं विज्ञेयं. तथा पृथिवीज-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लाग्निवायुवनस्पतिकायिकानां द्वींद्रियत्रींद्रियचतुरिंद्रियपंचेंद्रियाणां च जीवानां सम्यग्मनोवचनकाय-योगैरहिंसनं तत्सुसाधुजनसेवितं प्रवरमभयदानं भवति, यस्मात्सर्वे जीवा अतिदुःखिता अपि जी-वितुमिच्छंति, तस्मात्तेषां तदेव प्रियं चतुरेण विज्ञेयं. यस्मान्नरवरेंद्रो मरणे वर्तमाने स्वजीवितार्थं राज्यमपि ददाति, तस्मात्तदेवेष्टतरं, तथा ग्राहकाणां यदिष्टं भवति तदेव दानं परलोके सुविशालं सुखमिच्छता धीमता दातव्यं, पुनरभयदानेन जीवो जन्मांतरेऽपि दीर्घतरमायुः प्राप्नोति, तथा सुरू-पो नीरोगः सकललोकश्लाघनीयश्च भवति, एतत्त्वभयदानं सुरेंद्रनरेंद्रनतचरणैरष्टकर्ममथनैर्जिनेंद्रै-र्भणितं.

तथा यदविरुद्धं नवकोटीपरिशुद्धं द्रव्यं धार्मिकजनाय दीयते तद्धर्मोपग्रहदानं भण्यते, तत्पु-नरशनं खादिमं स्वादिमं वस्त्रं पात्रमौषधं भेषजं च योग्यं बुद्धिमता दातव्यं, तथैव प्रधानं शयना-सनं स्वाध्यायध्यानरक्ताय मुनिवराय दातव्यं, यः सदा संयमतपोभारं वहति स तेन शुद्धाशनादि-दानेनोपगृहीतः कर्मलघुत्वेन चात्मानं परं च तारयति, यस्तु कर्मगुरुर्जीवः स स्वयमतरन् कथमन्यं तारयेत? तत्पुनर्जिनेंद्रोक्तैर्दायकग्राहककालभावैश्चतुर्भिः कारणैः परिशुद्धं दातव्यं, तत्र दायकशुद्धं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तद्भण्यते यो दाता ज्ञानवानष्टमदस्थानरहितः श्रद्धारोमांचितशरीर इहपरलोकाशंसां मुक्त्वा निर्जरार्थी सन्न्यायप्राप्तं प्रासुकं लोकेऽविरुद्धं द्रव्यं ददाति, सुक्षेत्रे विक्षिप्तस्य बीजस्येव तस्य बहुफलं भवति, तद्दानं सुरनरशिवसुखसंपत्तिजनकं ज्ञातव्यं. यः पुनः श्रद्धारहितो यशःकीर्त्यर्थमभिमानेन वा ददाति, यद्येष ददाति तर्हि किमहं न ददामीत्यभिमान इति, तद्दानं श्रद्धाजलरहितं बीजमिव तस्य बहुफलं न भवति. पुनर्यः प्राणी प्राणिवधं कृत्वा धर्मश्रद्धया दानं ददाति स चंदनं दग्ध्वांगारवाणिज्यं करोति, तथा यो मूढो लोकविरुद्धं धर्मविरुद्धं च दानं ददाति स आत्मानं ग्राहकं च संसारे पातयति.

अथ ग्राहकशुद्धं जानीत?—यः पंचमहाव्रतधरो गुरुशुश्रूषानिरतो योगे समाहितात्मा क्षांतिमार्दवार्जवात्यर्थनिर्लोभतायुक्तो मनोवाक्कायगुप्तः पंचेंद्रियनिग्रहपरः स्वाध्यायध्यानरक्तः शुद्धात्मा शुद्धसाधुचरित्र इहपरलोके च सर्वत्र दृढमप्रतिबद्धः, पुनर्यो मेरुरिवोपसर्गवायुभिश्चालयितुं न शक्यते, एतादृशे पात्रे यद्दानं तद् ग्राहकशुद्धं विज्ञेयं. यत्पुनः शीलव्रतरहितेभ्यः कुपात्रेभ्यो धनं दीयते तत्खलु रुधिरालिप्तं वस्त्रं रुधिरेणैव शुद्धीक्रियते, कुपात्राय दत्तं शुभमपि दानमशुभफलमेव भव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ति, यथा सर्पाय दत्तं क्षीरमपि विषत्वं प्राप्नोति, सुपात्रे स्वल्पमपि दानं नियमाच्छुभफलं भवति, यथा गवे दत्तं तृणमपि क्षीरत्वमुपैति, एवं पात्रविशेषेणैकमपि दानं शुभाशुभफलदं भवति. यथा गवा सर्पेण च पीतमुदकं क्षीरविषं भवति. अथ कालशुद्धं दानं च तद्भण्यते यत्कालोपपन्नं सुविशुद्धं तपस्विदेहोपकारकाले दीयते, यथा काले क्रियमाणं कृषिकर्म बहुफलं भवति, एवं काले दत्तं दानमपि बहुफलं ज्ञेयं, अकाले विक्षिप्तं बीजं यथा विनश्यति, एवं ददतो ग्राहकस्य च दानमपि विज्ञेयं. अथ भावशुद्धं च जानीत?—यः श्रद्धासंवेगप्रकटपुलकितांग आत्मानं कृतकृत्यं मन्यमानो नवकोटीपरिशुद्धं दशदोषवर्जितं च दातव्यं वस्तु ददाति, एतद्दानं वीतरागैर्भावशुद्धं प्रज्ञप्तं, यस्त्वार्तध्यानवशमुपगतः कलुषितमानसश्च सन्नपरिशुद्धं सनिदानं च ददाति, एतद्दानं भावविशुद्धं न भवति. मोक्षार्थं यद्दानं तत्रत्येष विधिर्ज्ञातव्यः, अनुकंपादानं पुनर्जिनैः क्वापि न प्रतिषिद्धमस्ति, एष तु दानमयो धर्मः संक्षेपतः समाख्यातः. इतः परं शीलमयं धर्मं कथ्यमानं निशामयत?—

सर्वथा प्राणिवधालीकादत्तादानमैथुनपरिग्रहेभ्यो विरतिः, तथा क्रोधमानमायालोभानां दृढं निग्रहः, क्षमामार्दवार्जवसंतोषेषु सर्वदा प्रवृत्तिः, तथा निःस्पृहचित्तेन श्रद्धासंवेगस्पर्शिना, सर्वसत्त्वेषु

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मैत्री च, एतच्च सुशीलमयं जिनोक्तं धर्मं संसेव्य नराः सुगतिं प्राप्नुवंति, दुर्गतिद्वारं च स्थगयंति, हे श्रावक! सर्वैर्जिनैरेष तु शीलमयो धर्मो भणितः. तपोमयो धर्मश्च स भण्यते योऽशेषकर्मक्षयनिमित्तं बाह्याभ्यंतरतपसो यदनुष्ठानं क्रियते, उक्तं च—अणसणमूणोयरिया । वित्तीसंखेव रसपरिच्चाओ ॥ कायकिलेसो संलीणया य बज्झो तवो होइ ॥ १ ॥ पायच्छित्तं विणओ । वेयावच्चं तहेव सज्झाओ ॥ झाणं उस्सग्गोवि य । अब्भिंतरओ तवो होइ ॥ २ ॥ एतद् द्वादशविधं तपः संक्षेपतः समाख्यातं. इतः परं सुंदरं पुनर्भावनामयं धर्मं शृणुत?—

याः सम्यग्दर्शनज्ञानचारित्राणां भावनाः, वैराग्यभावनापि च परमा, तीर्थंकरभक्तिश्च, संसारजुगुप्सा, कामविरागः, सुसाधुजनसेवा, तीर्थंकरभाषितस्य च धर्मस्य प्रभावना, मोक्षसुखे च रागः, अनायतनवर्जना च, क्वापि स्खलितस्यात्मनो निंदा गर्हा च, अनंतज्ञानिभिर्जिनैरेष भावनामयो धर्मः प्रोक्तः. हे सुंदर! एतं जिनैः प्रज्ञप्तं चतुर्विधं धर्मं स्पृष्ट्वानंता जीवाः सदासौख्यं मोक्षं प्राप्ताः. तत एतत् श्रुत्वा शिखिकुमारस्य श्रीजिनधर्मबोधः प्रादुर्भूतः, तदा चानेन कुमारेण भगवान् विजयसिंहो भणितो हे भगवन्नेवमेतत्, एष धर्म ईदृश एव, अत्र संदेहो नास्ति,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किंतु दानमयं त्यक्त्वास्य धर्मस्य शेषभेदाः संपूर्णा गृहस्थेन कर्तुं न शक्यंते, तस्माद् हे भगव-
न्नाचक्ष्व कीदृशः पुनरस्य महापुरुषसेवितस्य सकलदुःखाग्निजलस्य सिद्धिवधूसंगमैकहेतोः श्रमण-
त्वस्य योग्यः? भगवतोक्तं शृणु? श्रमणत्वार्हो ह्यार्यदेशोत्पन्नो विशिष्टजातिकुलसमन्वितः क्षीण-
प्रायकर्ममलोऽत एव निर्मलबुद्धिस्तथा वक्ष्यमाणप्रकारेण विज्ञातसंसारस्वरूपः, कथमित्याह—सं-
सारे मनुष्यत्वं दुर्लभं, जन्म च मरणनिमित्तं, संपदश्चलाः, विषया दुःखहेतवः, संयोगे वियोगः,
अनुसमयमेव मरणं, दारुणो विपाक इति, तत एव तद्विरक्तः प्रतनुकषायः स्तोकहासोऽकौतुकः कृ-
तज्ञो विनीतः पूर्वमपि राजामात्यपौरजनबहुमतोऽदोषकारी कल्याणयुक्तांगः श्रद्धावान् स्थिरश्च उ-
पस्थितः समुपसंपन्नश्च, ईदृशः पुमान् श्रमणत्वयोग्यो ज्ञेयः. तदा शिखिकुमारेणोक्तं हे भगवन्!
शोभनः श्रमणत्वार्हो भगवता प्रवेदितः, अहं पुनः समुपसंपन्नस्तस्मादेवं निवेदिते भगवान् प्रमा-
णमिति. ततो भगवता परिचिंतितं यथा खल्वेष महाभाग्यवान् सूक्ष्मप्रश्नेषु विचक्षणोऽत्यंतप्रशांत-
रूपोऽतिनिपुणजल्पनकुशलश्च लक्ष्यते, तथानेन महाकुलप्रसूतेन भवविरक्तचित्तेन च भवितव्यं,
तस्मादिदं तावदत्र प्राप्तकालं, यदेष उपसंगृह्यत इति विचिंत्य गुरुणा प्रोक्तं हे महाश्रावक! शेष-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गुणविहीनोऽत्र नोपसंपद्यते, स्वभावान्निर्गुणे संसारवास इदं श्रमणत्वं युक्तं च, किंतु दुष्करमिदं, इह खलु सर्वकालमेव समशत्रुमित्रभावेन प्राणातिपातविरतिः, अप्रमत्ततया सत्यभाषणं, दंतशोधनमात्रस्याप्यदत्तस्याग्रहणं, मनोवाक्कायैरब्रह्मचर्यनिरोधः, वस्त्रपात्रोपकरणेष्वपि निर्ममत्वता, चतुर्विधरात्रिभक्तविरतिः, उद्गमोत्पादनैषणाविशुद्धपिंडग्रहणं, संयोजनादिपंचदोषरहितं परिमितकाले भोजनं, पंचसमितत्वं, त्रिगुप्तता, ईर्यासमित्यादिभावनाः, अनशनप्रायश्चित्तादिबाह्याभ्यंतरतपःकरणं, मासिक्यादिकाः प्रतिमा वहनीयाः, विचित्रा द्रव्याद्यभिग्रहाश्च धार्याः, अस्नानं भूमिशयनीयं केशलोचो निःप्रतिकर्मशरीरता, सर्वकालमेव गुर्वाज्ञापालनं, क्षुधापिपासादिपरिषहाध्यासनं, दिव्याद्युपसर्गजयः, लब्धापलब्धयोः समचित्तवृत्तिता, किंबहुना ? अत्यंतदुर्वहमहापुरुषव्यूढाष्टादशशीलांगसहस्रभारवहनमविश्राममिति.

तस्मात्खल्वयं महासमुद्रो बाहुभ्यां तरणीयः, निरास्वादवालुकायाः कवलो भक्षणीयः, तीक्ष्णकरवालधारायां परिचंक्रमणीयं, सुहुतहुतज्वालावली पातव्या, सूक्ष्मपवनकोत्थलको भरणीयः, गंगाप्रवाहप्रतिश्रोतसा गंतव्यं, तुलायां मेरुगिरिस्तोलनीयः, एकाकिना चतुरंगबलं जेतव्यं, राधावेधः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साधनीयः, अगृहीतपूर्वा त्रिभुवनजयपताका गृहीतव्या, एतदुपमं श्रमणत्वमिति. तत एतदाकर्ण्य प्रहृष्टवदनकमलेन शिखिकुमारेण प्रोक्तं हे भगवन्नेवमेतद्यथा यूयमाज्ञापयत, किंतु विज्ञातसंसारस्वरूपस्य प्राणिनस्तद्वियोगोद्यतस्य तदुच्छेदकारणं न किंचिद्दुष्करमिति. भगवता भणितमेवमेतत्, किंतु तदेव संसारस्वरूपं प्रत्यक्षोपलभ्यमानासुंदरमप्यनेकभवभावनातः प्राणिनां मोहयति, स मूढश्च संस्तत्स्वरूपं न चिंतयति, उत्तरकालं न गणयति, उपदेशं न मन्यते, गुरुं नाभिनंदति, कुलं न प्रेक्षते, धर्मं न सेवते, अयशसो न बिभेति, वचनीयं न रक्षति, सर्वथा तत्तदाचरति येन येन स इहलोके परलोके च क्लेशभाजनं भवति, तस्मादेष मोहः खलु हंतव्य इति. शिखिकुमारेणोक्तं हे भगवन्! मोहस्यापि च हनने एष एवोपायः, न चानादृतकार्यः पुरुषः फलं साधयति, आदृते च संशयोऽथवोपायप्रवृत्तोऽसंशयमेव फलं साधयति. उपायश्चैष भगवतः समीपे श्रमणत्वांगीकार, कातरा अपि नराः खलु पोतनिर्यामकगुणेन महार्णवं निस्तरंति, अल्पपुण्यानां पुनः कुशलबुद्धिर्न भवति, अस्यां समुत्पन्नायामप्येवंविधसकलगुणसंपदुपेतगुरुलाभो न भवति, तस्माद् हे भगवन्! मय्यनुग्रहं कुरु? भगवता भणितं हे वत्स! मया तवोपर्यनुग्रहः कृत एव, किंत्वेषास्माकं

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

समयस्थितिर्यदागमार्थमुक्तैवावश्यकं शिक्षयित्वा कतिपयदिनेष्वतिक्रांतेषु ततो दीक्ष्यते, शिखिकुमारेणोक्तं हे भगवन्ननुगृहीतोऽस्मि, अन्यच्च निष्क्रांतेनापि मया समयस्थितिरेव पालनीया, तस्मादेवं भवत्विति.

एवं च मन्यमाना यावत्तिष्ठंति तावत्कथंचित्तद्वार्तां श्रुत्वानेकलोकपरिवृतो हस्तिन्यारूढोऽस्यैव कुमारस्य जनको ब्रह्मदत्त आगतः, तेन भगवान् विजयसिंहाचार्यः प्रणतः, भगवता धर्मलाभेनाभिनंदितो गुरुपादमूले उपविष्टः, शिखिकुमारेण प्रणम्य भणितो हे तात! त्वमभ्यसस्नेहप्रार्थनोऽसि, अतः ममैकां प्रार्थनां संपादय? ब्रह्मदत्तेनोक्तं हे वत्स! त्वं कथय? मम जीवितं त्वदधीनमेव, कुमारेणोक्तं हे तात! त्वं संसारस्वभावस्य ज्ञातवृत्तांत एवासि, इह खलु मनुष्यत्वं दुर्लभं, प्रियजनसमागमा अनित्याः, ऋद्धयश्चंचलाः, यौवनमस्थिरं, कामः परलोकशत्रुः, विषयविपाको दारुणः, मृत्युरनिवारितप्रसरः सन् सदा प्रभवति, तस्मान्ममोपरि प्रसादं कुरु? एवमवसाने इह जीवलोके त्वयानुज्ञातोऽहं वीतरागप्रणीतयतिधर्मसेवनेन मनुष्यत्वं सफलं करोमि. ततः सुतस्नेहेन बाष्पजलभरितलोचनेन ब्रह्मदत्तेन सगद्गदं प्रोक्तं हे पुत्रैष यतिधर्मस्याकालः, शिखिकुमारेणोक्तं हे तात!

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मृत्योरप्यकालो नास्ति, एवं यतिधर्मस्यापीति. अत्रांतरे ब्रह्मदत्तसेवकेन नास्तिकवादिना पिंगकेनो-
क्तं भो कुमार! त्वं केन प्रतारितः? इह खलु पंचभूतव्यतिरिक्तः परलोकगामी जीवो न समस्ति,
अपि चैतान्येव भूतानि स्वभावत एवैतत्प्रकारपरिणामपरिणतानि जीव इति भण्यते. यदा चैतानि
समुदयं त्यक्त्वा पंचत्वमुपगच्छंति, तदा मृतः पुरुष इत्यभिधानं प्रवर्तते, न पुनस्तत्र कोऽपि देहं
त्यक्त्वा घटक इव परभवं गच्छति, तस्मात्त्वमसत्यपि परलोके मिथ्याभिनिवेशभावितमतिः सन् स्व-
भावसुंदरं विषयसुखं मा परित्यज? देहव्यतिरिक्तं देहिनं मह्यं दर्शय? यातो यत्त्वया भणितं यथे-
ह खलु मनुष्यत्वं दुर्लभं, तदसंबद्धमेव, यतस्तत्सुकृतानुभावेन न लभ्यते, अपि च भूतपरिणतेः,
अतः किमिदमाकुलत्वं? तथा यत्त्वयोक्तं प्रियजनसमागमा अनित्या इत्येतदप्यकारणं, यतस्ते
निष्क्रांतानामप्यन्यथा न भवंति, तथा यच्चोक्तं ऋद्धयश्चंचला इत्येतस्यापि निष्क्रमणमेव न, प्रति-
पक्षोऽपि चोपायेन परिरक्षणमिति. तथा यच्च भणितं यौवनमस्थिरमिति तत्रापि रसायनमेव स्थिर-
त्वकारणं, न पुनर्निष्क्रमणमिति. तथा यच्च प्रोक्तं कामः परलोकशत्रुरित्येतदपि न शोभनं, यतः
परलोक एव नास्ति, न च कोऽप्यागत्यात्मानं दर्शयति, एवमपि च परिकल्पे नातिप्रसंग इति. त-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

था यच्च भणितं विषयविपाको दारुण इत्येतदपि न युक्तिसंगतं, यत आहारस्यापि विपाको दारुण एव, एवं च भोजनमपि परित्याज्यं, न च कोऽपि तद्वर्जयतीति, जगत्स्थितिश्चैषेति, न चोपायज्ञस्य पुरुषस्य दारुणत्वमपि संभवति, तथा यच्चोक्तं मृत्युरनिवारितप्रसरः सदा प्रभवतीत्येतदपि बालवचनमात्रं, येन निष्क्रांतस्याप्येषोऽनिवारितप्रसर एव, तेनापि श्रमणेन पर्यंते मर्तव्यमिति तस्मात् श्मशान एवावस्थानं न युक्तं, सत्यपि परलोके दुःखसेवनात्सुखं न भवति, अपि च सुखसेवनादेव सुखं, यतो यदेवाभ्यस्यते तस्यैव प्रकर्षो लोके दृष्टः, न पुनर्विपर्यय इति, तस्मादेतद्व्यवसायात्त्वं विरमेति. शिखिकुमारेणोक्तमिदं सर्वमसंगतं जानीहि? अथवा भगवतः समक्षं मम जल्पितुं न युक्तं, तस्माद्भगवानेवात्र भणिष्यति, ततो भगवता प्रोक्तं भो महाब्राह्मण! शृणु?—

यत्त्वयोक्तं केन त्वं प्रतारित इत्येष जन्मांतराभ्यस्तकुशलभावनाभावितमतिरल्पावरणसंयुतो वीतरागवचनाविर्भूतक्षयोपशमभावेन समुत्पन्नतत्त्वज्ञानो यथास्थितं भवस्वभावमवबुध्य ततो विरक्तः, न पुनः केनचित्प्रतारित इति, तथा यच्च भणितमिह खलु पंचभूतव्यतिरिक्तः परलोकगामी जीवो न समस्ति, अपि चैतान्येव भूतानि स्वभावत एवैतत्प्रकारपरिणामपरिणतानि जीव इति भण्यते,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एतदपि न युक्तिसंगतं, यतो भूतानि सर्वथाऽचेतनानि, तस्मादेषामेतत्प्रकारपरिणतानामप्येषा प्रत्यक्षप्रमाणानुभूयमाना गमनादिचेष्टानिबंधना चेतना कथं युज्यत इति? यद्येषु प्रत्येकं न विद्यते, तत्तेषां समुदयेऽपि न भवति, यथा वालुकाकणेषु प्रत्येकमविद्यमानं तैलं तत्समुदयेऽपि नास्ति, अथ प्रत्येकमपीमानि चेतनानीति, ततः सिद्धमनेकचैतन्यसमुदयः पुरुषः, एकेंद्रियाश्च जीवाः, घटादीनां चेतनत्वमिति, घटादीनां चेतना नोपलभामहे, अतः खलु पंचभूतव्यतिरिक्त एव नानारूपः परलोकगामी जीवोऽस्तीति. ततश्च यद्भणितं यदैतानि समुदयं त्यक्त्वा पंचत्वमुपगच्छंति तदा मृतः पुरुष इत्यभिधानं वर्तते, एतदपि च वचनमात्रमेव, चैतन्यस्य तदतिरिक्तभावप्रवृत्तेरनुभूयमानस्वरूपा च चेतना न निषेद्धुं शक्यते, तथा यच्च प्रोक्तं न पुनरत्र कोऽपि देहं त्यक्त्वा घटक इव परभवं गच्छतीत्येतदप्यत एव प्रतिषिद्धं ज्ञातव्यं, चेतनस्याचेतनभिन्नत्वादिति. तथा यच्चोक्तं तस्मात्त्वमसत्यपि परलोके मिथ्याभिनिवेशभावितमतिः स्वभावसुंदरं विषयसुखं मा परित्यज? देहव्यतिरिक्तदेहिनं मह्यं दर्शय वा? अत्रापि च शृणु?—चैतन्यभेदसिद्धौ कथं परलोको नास्ति, विद्यमाने च तस्मिन् कथमेतस्य मिथ्याभिनिवेशः? अथवा पशुगणसाधारणा विडंबनामात्ररूपाश्रितापयासबहु-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

त्ता मनोनिर्वाणवैरिणोऽविज्ञातविश्रंजसुखस्वरूपा विषयाः कथं स्वजावसुंदराः? किं च तेऽयः सुखं? यत्पुनः स जीवो देहजिन्नो न दृश्यते तत्र कारणं शृणु?—सूक्ष्मोऽनिंडियश्च स वर्ततेऽतो न दृश्यत इति, सर्वज्ञाः पुनः पश्यंति, जक्तं च वीतरागैः—अणिंदियगुणं जीवं। अदिस्सं मंसचक्खुणो ॥ सिद्धा पस्संति सवन्नू। नाणसिद्धा य साहुणो ॥ १ ॥

एवं च विजयसिंहाचार्ये प्रजल्पति सति पिंगकेनेषद्विहस्य जणितं हे जगवन्! सर्वमसंबद्धमेव प्रोक्तं, शृणु?—यत्तावदुक्तं सर्वथाचेतनानि जूतानि, तस्मादेषामेतत्प्रकारपरिणामपरिणतानामप्येषा प्रत्यक्षप्रमाणानुजूयमाना गमनादिचेष्टानिबंधना चेतना कथं युज्यत इति, यद्येषु प्रत्येकं न विद्यते तत्तेषां समुदयेऽपि न जवति, यथा वालुकाकणेषु प्रत्येकमविद्यमानं तैलं तत्समुदयेऽपि नास्ति, एतत्कथं युज्यते? यतः कारणानुरूपमेव कार्यं न जवति, शृंगात्किं शरो न जवति? अथवादृश्यपरमाणुनिष्पन्नं घटादि किं न दृश्यमिति? एवं चेतनापि तत्कार्यरूपा जविष्यति, जूतविलक्षणा चेति को विरोधः? यच्च प्रोक्तमथ प्रत्येकमिमानि चेतनानीति, ततः सिद्धमनेकचैतन्यसमुदायः पुरुष एकेंद्रियाश्च जीवा घटादीनां च चैतन्यमित्यादि तदपि न शोजनं, तेषामेव तथाविधपरिणामजा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वात्, तद्भावादेव न घटादीनां चैतन्यमिति, भगवता प्रोक्तं शृणु यद्भणितं शृंगात्किं शरो न भव-
तीति स भवति, न पुनः कारणाननुरूपः, इतरशरविलक्षणो मसृणघनश्लक्ष्णादितद्धर्मसंक्रमादिति,
अत्र पुनरप्युक्तिप्रत्युक्ती विद्येते, ते च दुरवगमत्वान्न लिखिते स्तः, यदपि प्रोक्तमदृश्यपरमाणुनि-
ष्पन्नं घटादि दृश्यमिति, एतदपि न युक्तिक्षमं, यतो नैकांतेन परमाणवोऽदृश्याः, योगिदर्शनतः का-
र्यदर्शनाच्च, ततो यन्मया भणितं तत्संगतमेवेति.

तदनंतरं पिंगकेन सलज्जमिव भणितं हे भगवन्! यद्येवमनिंद्रियगुणो जीवस्तावच्छरीराद्वि-
भिन्नोऽस्ति, एवं च मम पितामहो मधुपिंगो नामाभूत्, सोऽनेकसत्वघातनरत आसीत्, भवन्मतेन
नियमान्नरके स समुत्पन्नः, ममोपर्यतिस्नेहसंगतश्च स आसीत्, इहलोकाकरणीयनिवारणशीलश्च
तस्मात्स ततो नरकादागत्य दृष्टविपाकोऽपि मां कथं न निवारयति? भगवता भणितं शृणु? यथा
महापराधकारी कोऽपि पुमांस्तीक्ष्णनरपतिसमादेशाद्रौद्रैश्चारकपुरुषैर्गृहीतो लोहशृंखलानिबद्धदेहो
घोरांधकारचारकनिवासी परवशः सुप्रियमपि स्वजनं दृष्टुमपि न लभते, किमंग पुनरनुशासितुं?
एवमेव ते नारकाः प्रमादापराधकारिणस्तीव्रतरकर्मपरिणामगृहीताश्चंडैः परमाधार्मिकैर्वज्रशृंखलानि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बहुदेहास्तीव्रांधकारदुरुत्तरनरकनिवासिनः कर्मपरवशाः कथं निष्क्रमितुं लभंते? येन देवानुप्रिय-मनुशास्तीति? उक्तं च—निरयाउए अक्खीणे । निक्कमिउं णो लहंति निरयाउ ॥ कम्मेण पाव-यारी । नेरइया ते निहन्नंति ॥ १ ॥ पिंगकेन प्रोक्त हे भगवन्! यद्येवं तर्हि ममैव पिता सोमपिंगो नाम, सोऽत्यंतपरलोकभीरुः, प्राणवधादिविरतोऽकषायशीलोऽनेकजीवोपकारी पश्चाच्च श्रमणव्रतं गृहीत्वा कंचित्कालं परिपाल्य मृतः स च भवन्मतेन नियमाद्देवेषूत्पन्नः, अहं च तस्यात्यंतवल्लभ आसं, मह्यं च धर्मं दत्वा भणितमासीत्, तस्मात्सोऽपि स्ववशः सन्निहागत्य कथं मां न प्रतिबोधयति? भगवता भणितं शृणु?—यथा नाम कोऽपि दरिद्रः पुरुषो हीनजातिकुलरूपो व्यवसायं कृत्वा गृहीतकलाकलापो देशांतरं गत्वा तत्प्रसादतः कथमपि प्राप्तराज्यः कृतविविधसुंदरोपरिग्रहो महानरेंद्रपूजितः संजातानेकसुंदरापत्यो महासौख्यसागरावगाढो लज्जया दूरीकृतं पुत्रादिकं न स्मरति, एवमेव ते देवा मनुष्यत्वमसारं मन्यमाना धर्मव्यवसायं कृत्वा गृहीतपरलोककलाकलापाः देवलोकं प्राप्य पूर्वसुकृतप्रसादतो देवर्द्धिं लब्ध्वा देवांगनापरिवृता महानेकदेवगणपूजिताः समुत्पन्नानेकरतिहेतवोऽत्यंतरतिसागरावगाढा मनुष्यभावं न स्मरंत्यपि, किमंग पुनरागच्छंति? तस्मात्कथ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मनुशासतीति? उक्तं च—संकंतदिव्वपेमा । विसयपसत्ता समत्तकत्तव्वा ॥ अणहीणमणुयकज्जा । नरज्जवमसुहं न एंति सुरा ॥ १ ॥ पिंगकेनोक्तं हे जगवन्! यद्येतेन हेतुना देवा नागच्छंति, देहभिन्नश्च जीवस्तर्हीदमिहनगरवृत्तमेव सर्वलोकप्रत्यक्षं विरुध्यति, जगवतोक्तं कथय किं तन्नगरवृत्तं? पिंगकेनोक्तं शृणु?—

अत्र नगरे एकेन तस्करेण नरपतिर्जांमागारं मुषितमासीत्, स च कथमपि निर्गच्छन्नियुक्तपुरुषैर्गृहीतः, गृहीत्वा च स लोप्त्रक एव नरपतेरुपनीतः, राज्ञा जणितमेतं व्यापादयत? ततश्च स वधनियुक्तेन लोहकुंज्यां प्रक्षिप्तः, प्रक्षिप्य लोहकुंजी जादिता, तच्छिद्राणि सम्यक्त्रपसीसकेन जादितानि, ततो रक्षपालका दत्ताः, तत्र च स पंचत्वमुपगतः, तस्य निर्गमनमार्गश्च सूक्ष्मोऽपि न दृष्टः, अतोऽवगच्छामो नान्यो जीव इति. जगवतोक्तं हे जड! यत्किंचिदेतदिति निशामय?— इहैकस्मिन्नगरे एकः शंखवादको विज्ञानप्रकर्षसंयुक्तः सिंहद्वारेऽपि शंखं धमन् सर्वनगरजनस्य कर्णयोरपि च धमति, स च राज्ञा पृष्टः कियद्दूरे धमसि? तेनोक्तं हे देव सिंहद्वारे, राज्ञोक्तं स्थगितद्वारेऽपि मम वासगृहे कथं प्रविशति? तेनोक्तं तस्य प्रतिघातो नास्ति, ततो राज्ञाऽश्रद्दधानेन स पुरुषः स-

P.P. Ac. Gunratnasuri M.S.　Jun Gun Aaradhak Trust

शंख एवोष्ट्रिकानाम्नि भाजनविशेषे प्रक्षिप्तः, शंखं वादयेत्युक्तश्च, उष्ट्रिका स्थगिता जतुना दृढीकृता, तेन शंखः प्रवादितस्तस्य शब्दो विनिर्गतः, राज्ञा नागरिकैश्चोपलब्धः, तस्य निर्गमनछिद्रं च नोपलब्धमिति. एवमिहापि को विरोधो भवेत्? पिंगकेनोक्तं हे भगवन्नेतदेवमिति शृणु?—इहैवैकस्तस्करयुवा मम मित्रेण कालदंडपाशिकेन मम वचनात्तुलायां तोलयित्वा ग्रीवामोटनेन व्यापादितः, स च पुनरपि तोलितो यावान् सजीवस्तावानेवाजीवोऽपि, अतोऽवगच्छामो नान्यो जीवः, अन्यथानेकरूपोऽप्यभविष्यदिति. भगवतोक्तं हे भद्र! यत्किंचिदेतच्छृणु?—इहैकेन गोपालेन वातभरितो बस्तिपुटकस्तुलायां तोलितः, रिक्तः पुनरपि तोलितो यावान् भरितस्तावान् रिक्तोऽपि, अथवान्यस्ततो वात इति, अथ त्वं मन्यसे स मनागूनक इति, एवं च भवतीतरस्मिन्नपि समः प्रसंगः. पिंगकेनोक्तं हे भगवन्नेतदेवमिति शृणु?—इहैव नगरे मम मित्रेण कालदंडपाशिकेन मद्वचनादेकस्य तस्करस्य शरीरकं संवृत्तोद्वर्तकं कुर्वता जीवोऽन्वेषितो न च दृष्ट इति, तस्मात्स किं नास्तीति? भगवतोक्तमथ मन्यसे नास्त्येवं ततोऽनुत्पादप्रसंगः, एवं च भणिते उत्तरप्रदानाभावेन लज्जितमिव पिंगकं प्रेक्ष्य भगवता प्रोक्तं, तस्मादेवं वृक्षशाखाप्रचलननिमित्तं पवन इव चक्षुषाऽदृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्यमानोऽपि शरीरचेष्टानिमित्तभूतो जीवोऽस्तीति श्रद्धेयं, अथ मन्यसे पवनः स्पर्शनेंद्रियेण गृह्यते, हंत जीवोऽपि विचित्रवेदनादिधर्मानुभवेन गृह्यत इति. उक्तं च—चित्तं वेयण सन्ना—विन्नाणं धारणा य बुद्धी य ॥ ईहा मईवि तक्का । जीवस्स उ लक्खणा एए ॥ १ ॥ तस्मादस्ति जीव इति, एवं च भवति सति यत्त्वया भणितमासीद्यथा दुर्लभं खल्वेतन्मनुष्यत्वमिति, एतदसंबद्धमेव, यतो न तत्सुकृतदुःकृतानुभावेन लभ्यते, अपि च भूतपरिणतेरिति, अतः किमिदमाकुलत्वमित्येतदयुक्तं, परलोकगामुके जीवे विद्यमाने एवैतत्समस्तधर्मारंभसाधकं मनुष्यत्वं, न हि भूतपरिणतिमात्रलभ्यमिति.

तथा यत्त्वया प्रोक्तमनित्याः प्रियजनसमागमा इत्येतदप्यकारणं, यत एते निष्क्रांतानामपि नान्यथा भवंतीत्येतदपि न शोभनं, यतो निष्क्रांतानामिह मुनीनां प्रियाप्रियविकल्प एव नास्ति, तथा यच्च प्रोक्तं चंचला ऋद्धय इत्येतस्यापि निष्क्रमणमेव न प्रतिपक्षोऽपि चोपायेन परिरक्षणमित्येतदपि बालवचनसदृशमेव, यतो धर्ममेव मुक्त्वा नान्यः परिरक्षणोपायः, इमा ऋद्धयश्चासाराः, अनेकसत्वापकारिण्यश्च, तथा यच्च भणितमस्थिरं यौवनमित्यत्रापि च रसायनं युक्तं, न पुनर्निष्क्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मणमित्येतदपि न संगतं, यतो निष्क्रमणधर्मसाधनरसायनादन्यत्परमार्थचिंतायां न रसायनमिति. तथा यच्चोक्तं परलोकप्रत्यर्थिकोऽनंत इत्येतदपि न शोभनं, यतः परलोक एव नास्ति, तत आगत्य च न कोऽप्यात्मानं दर्शयति, एवमपि च परिकल्पनेऽतिप्रसंग इत्येतदपि ह्यसारं, विचित्रक्रियानुभवजातिस्मरणोपलंभतत्कथितप्रत्ययाद्विद्यमानोत्पादादिः सिद्धः, परलोक एव नास्तीति कथमात्मनोऽदर्शने च कारणं प्रागेव भणितं, तथा यच्चोक्तं दारुणो विषयविपाक इत्येतदपि न युक्तिसंगतं, यत आहारस्यापि विपाको दारुण एव, एवं च भोजनमपि परित्याज्यं, न च तत्कोऽपि वर्जयतीति, न चोपायज्ञस्य पुरुषस्य दारुणत्वमपि संभवतीत्येतदप्यनालोचितवचनं, यतः सर्वमेव सांसारिकं वस्तु विपाकदारुणमिति, तच्च क्रमेण वर्ज्यते, प्रव्रज्याया अभिप्रेतफलं तु संसारक्षय एवेति, न च बंधुपरिवर्जनेन विषयापरिभोगः कर्तुं शक्यत इति, अत एव तेषु दारुणत्वमपि न संभवतीति. तथा यच्च भणितं मृत्युः सदाऽनिवारितप्रसरः प्रभवतीत्येतदपि बालवचनमात्रं, येन निष्क्रांतस्याप्येषोऽनिवारितप्रसर एव, न च पर्यंते मर्तव्यमिति श्मशान एवावस्थानमुपपन्नं, सत्यपि परलोके दुःखसेवनात्सुखं न भवति, अपि च सुखसेवनादेव सुखं, यतो यदेवाभ्यस्यते तस्यैव प्रक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षां लोके दृष्टो न पुनर्विपर्यय इति, एतन्मुग्धजनमोहनं, यतो निष्क्रमणसाध्यफलस्यैष मृत्युर्न
निवारितप्रसर इति, निष्क्रमणस्य हि फलं यस्माज्जन्माभावजं निर्वाणं, निर्वाणप्राप्तस्य चास्य जी-
वस्य न जन्म न जरा न व्याधिर्न मरणं नेष्टवियोगो नानिष्टसंयोगो न बुभुक्षा न पिपासा न रा-
गो न द्वेषो न क्रोधो न मानो न माया न लोभो न भयं न चान्यः कोऽप्युपद्रव इति, किंतु सर्व-
ज्ञः सर्वदर्शी निरूपमसुखसंपन्नस्त्रैलोक्यचूडामणीभूतो मोक्षपदे तिष्ठति, अतः कथं तत्र मृत्योः प्र-
सरः? न चाप्रवृत्तकार्यारंभः पुरुषः फलं साधयति, पुनः प्रतिसमयमेव मरणाभिभूतानां कापुरुषाणां
तस्य प्रतीकारमचिंतयतामवस्थानं कथं प्रशस्यते? अतो न च पर्यंते मर्तव्यमिति श्मशान एवाव-
स्थानमुपपन्नमिति प्रहसनप्रायं, पुनः सकलसंगत्यागिनां वीतरागवचनेन कर्मक्षयोद्यतानां परिणत-
चारित्रभावनानां श्रमणानां यत्सुखं तच्चक्रवर्तिनोऽपि न युज्यत इति. उक्तं च भगवता श्रीमहा-
वीरेण—

इह खलु संसारे न सर्वथा सुखमस्ति, अत्र प्राणिनश्चानभिज्ञातसुखस्वरूपा विद्यंते, कर्मसं-
योगे दुःखं, तन्निवृत्तिः सुखं, आजातिर्दुःखं, तन्निवृत्तिः सुखं, जरा दुःखं, तन्निवृत्तिः सुखं, इच्छा दुः-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ह्वा दुःखं, तन्निवृत्तिः सुखं, प्रियं दुःखं, तन्निवृत्तिः सुखं, संक्केशो दुःखं, तन्निवृत्तिः सुखं, मरणं दुःखं, तन्निवृत्तिः सुखं, अनादिकर्मसंयोगेनेमे प्राणिनः सुखस्वरूपस्यानभिज्ञा इति ब्रवीमि, एवमाजातिजरेह्वाप्रियसंक्केशमरणेष्वपि विज्ञाव्याः.

अथ यथा नाम केचित्पुरुषा आजातिरोगक्षेत्रोत्पन्ना आजातिरोगगृहीता अदृष्टारोग्यपुरुषा आमरणं तद्भावा आरोग्यसुखस्वरूपस्यानभिज्ञाः, हे श्रमणायुष्मन्नेवमेवानाद्यनंतावर्तक्षेत्रवासिन इमे प्राणिन इति, ये दृष्ट्वापि चारोगिपुरुषं तेषु तेषु रोगिपुरुषानुकूलेषु समाचारेष्ववर्तमानं सर्वरोगविघातिनीं क्रियामनुशासयंतं केचित्पुरुषाः प्रद्विषंति, केचिदुपहसंति, केचिदवधीरयंति, केचिन्न शृण्वंति, केचिन्न परिणमयंति, केचित्परिणमयंति, केचिन्नानुतिष्ठंति. केचिदनुतिष्ठंति, केचित्साध्यं विराधयंति, केचित्कष्टसाध्यं विराधयंति, केचिन्न विराधयंति, अविराधनया च केचित्सर्वदुःखविमोक्षं कुर्वंति, कृत्वा तं भावं निवर्तयंति, ततोऽतिक्रांततद्भावः खल्वयं पुरुषो निश्चलमभिज्ञातारोग्यसुखस्वरूपो भवति, श्रमणपरिणामका अपि च निश्चलमभिज्ञातारोग्यसुखस्वरूपा भवंति, न पुनरन्यथेति. अतः साधुक्रिया न दुःखसेवनं, अपि च सुखमेव भणितं. उक्तं च—तणसंथारनिवण्णोवि । मु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णिवरो गठरायमयमोहो ॥ जं पावइ मुत्तिसुहं । कत्तो तं चक्कवट्टीवि ॥ १ ॥ अतः सुखसेवनादेव सुखप्रकर्ष इति सर्वमेवोपपन्नमिति.

अत्रांतरे आनंदबाष्पजलभरितलोचनेन प्रवर्धमानसम्यक्त्वपरिणामेन ब्रह्मदत्तेन भणितं हे भगवन्नेवमेतत, नान्यथेति. तेन जिनदेशितो धर्मो भावितः, सम्यक्त्वमंगीकृतं, विगत मोहं चिंतितं चाहो मे सुतस्य शोभनो व्यवसाय इति. पिंगकेनापि च संप्राप्तशुभपरिणामेनैव प्रोक्तं, भगवन्नेवमेतदिति. अथ कथं पुनः पुण्यपापयोर्विशेषो लक्ष्यते. भगवतोक्तं शृणु?—प्रत्यक्षमेव निरंतरदह्यमानागुरुविशृंखलोच्छलितधूमपरिपूर्णे निबद्धमणिनिर्मलोपरिभागे भवने एके वसंति, अन्ये विरचितकारीषाग्निविनिर्गच्छधूमावलिपूरितमध्यदेशे जीर्णभित्तिविवरांतरालपरिसंस्थितभुजंगे भवने वसंति, एके चंद्रकिरणदंतुरधवलगृहोपरिभूमौ प्रियाभिः सह लीलया निशां गमयंति, अन्ये च शिशिरमारुतशीतकंपरोमोद्गमयुक्तदेहाः प्रियारहिता दंतवीणा वादयंतः कथमपि निशां गमयंति, एके कांचनप्रतिबद्धस्थूलमुक्ताफलोद्भटाभरणा बहलकुंकुमविलिप्तवक्षःस्थला विलसंति, अन्ये च सदा महीतलनिषदनोत्पन्नक्षतयुक्तशरीरा मलीनजरद्वस्त्राच्छादितदेहाः कथमपि भ्रमंति, एके याचकानां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मनोरथान् पूरयंति, अन्ये पुनः परगृहभ्रमणेन स्वकुक्षिमपि भर्तुं न शक्नुवंति. इत्थं पुण्यपापफलं लोके प्रत्यक्षमेव दृश्यते. तथापि रागांधो लोको धर्मेऽनादरं करोति. इतश्च तद्विशेषो लक्ष्यते आगमबलेन, अन्यच्च—पुण्णेण महासोक्खं । चक्की देवा य सिद्धिगामी य ॥ पावेण कुमाणुस—तिरियणारया होंति जीवाउ ॥१॥ पिंगकेनोक्तं भगवन्नेवमेतदस्ति किं पुनरनुष्ठानं पुण्यकारणं पापकारणं वेति? भगवतोक्त शृणु?—पुण्यकारणं तावत्सकलप्राणिवधमृषावादादत्तादानमैथुनपरिग्रहाणां निवृत्तिः, निशि भोजनवर्जनं रागद्वेषादिनिग्रहश्च. पापकारणं पुनरिदमेव विपरीतमिति. तत एतत् श्रुत्वा पिंगको ब्रह्मदत्तेन सह श्रावकधर्ममंगीकृतवान्, ब्रह्मदत्तेनोक्तं च भगवन्नेष शिखिकुमारो मे पुत्रो भवति, एष महापुरुषोचितेऽनुष्ठाने व्यवसितश्च, मया सांप्रतमेतस्येदं व्यवसितमनुमतं च, तस्मादेतस्यानुष्ठानस्य किमेष उचितो न वेति? भगवता भणितं रत्नाकरोत्पन्नं न रत्नं रत्नप्रतिबंधस्यानुचितं. ततो हर्षवशोत्पुलकितांगेन ब्रह्मदत्तेन प्रोक्तं हे वत्स! मया त्वमनुज्ञातस्त्वं तपःसंयमोद्यमं कुरुष्वेति. ततः शिखिकुमारेण सहर्षं प्रणम्य प्रोक्तं हे तातानुगृहीतोऽस्मि.

ततो गुरुं वंदित्वा स नगरं प्रविष्टः, ब्रह्मदत्तेनापि चाघोषणापूर्वकं महादानं दापितं, जिनाय-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तनादिष्वष्टाह्निकामहिमा कारितः, ततः प्रशस्ते तिथिकरणमुहूर्तयोगे महता हर्षेण दिव्यया विभूत्या राजनागरिकैः परिकरितो दिव्यशिबिकामारूढो मंगलवाद्यसमूहेषु वाद्यमानेषु विबुधलोकेन प्रशस्यमानः पुरसुंदरीभिः सदुःखमालोक्यमानो यथेप्सितं दानं याचकजनेभ्यो ददानः शिखिकुमारो नगरान्निर्गतो यत्र भगवान् विजयसिंहाचार्यस्तत्र गतः, शिबिकात उत्तीर्णो गुरुं वंदितवान्, गुरुणापि कृते आवश्यके तं वामपार्श्वे स्थापयित्वा परमगुरवो वंदिताः, ततो विधिवंदनकं दत्त्वा शिखिकुमारेणोक्तमिच्छाकारेण भगवन् प्रव्राजयत? ततो गुरुणा इच्छाम इत्युक्त्वा नमस्कारपाठेन विधिपूर्वकं तस्मै रजोहरणमर्पितं, साधुलिंगमिति बहुमानतः शिखिकुमारेण गृहीतं, गुरुं वंदित्वा पुनरनेन भणितमिच्छाकारेण मुंडापयत? तत इच्छाम इत्युक्त्वा नमस्कारपूर्वकमत्रुटितास्तिस्रोऽद्धा गुरुणा गृहीताः, ततो गुरुं वंदित्वा शिखिकुमारेणोक्तमिच्छाकारेण मे सामायिकमारोपयत? इच्छाम इत्युक्त्वा तदारोपणनिमित्तं गुरुणा शिखिकुमारेण सह कायोत्सर्गः कृतः, स्तवश्चिंतितः, नमस्कारेण पारितः, ततो नमस्कारपूर्वकं त्रीन् वारान् सामायिकमुच्चारितं, शिखिकुमारेण सह महासंवेगसारमनूच्चरितं, ततो गुरुणा वासा गृहीताः, परमगुरुपादयोर्दत्ताः, तथा समीपवर्तिभ्यः साध्वादिभ्यश्च द-

त्ताः, अत्रांतरे गुरुं वंदित्वा शिखिकुमारेणोक्तं संदिशत किं भणामि? गुरुणोक्तं वंदित्वा प्रवेदय? ततो वंदित्वानेन प्रवेदितं, भवद्भिर्मे सामायिकमारोपितं, इच्छाम्यनुशिष्टमिति. ततो वासप्रदानपूर्वं गुरुणा प्रोक्तं निस्तारकपारगो भव? गुरुगुणैर्वर्धस्वेति. ततः शिखिकुमारेण वंदित्वा भणितं युष्मभ्यं प्रवेदितं, संदिशत साधुभ्यः प्रवेदयामि, गुरुणोक्तं प्रवेदय? ततो वंदित्वा नमस्कारपाठेनानेन प्रदक्षिणा कृता, निस्तारकपारगो गुरुगुणैर्वर्धस्वेति पठद्भिर्गुर्वादिभिर्वासा दत्ताः, ईषत्पृष्ठतः स्थितः. एवं त्रीन् वारान् कृत्वा परमगुरुपादयोः पतितः, आसने निषण्णस्याचार्यस्य च पादयोः पतितः, ततः पुरःस्थितो गुरुणानुशासितः, एवमस्य गुरोः पादमूले विशुध्यमानेन परिणामेन जिनोपदिष्टेन विधिना सकलदुःखपरमौषधिं महाप्रव्रज्यां प्रपन्न इति. आनंदबाष्पजलभरितलोचनेन राज्ञा ब्रह्मदत्तेन नगरजनपदलोकेन चाभिनंदितः. ततश्च कतिपयदिवसांस्तत्रोषित्वा मासकल्पे समाप्ते सति भगवता सह क्षेत्रांतरं गतः, एवं च निरतीचारश्रमणत्वमनुपालयतोऽनेकानि वर्षलक्षाण्यतिक्रांतानि.

इतश्च जालिन्या मातुः पश्चात्तापः समुत्पन्नो हा मया दुष्टु कृतं, येनैषोऽव्यापादित एव निर्गत इति, तस्मान्मधुरवचनसारसंदेशपूर्वकं किंचित्प्राभृतं प्रेषयामि, येनैष पुनरपि कथंचिदिहागच्छ-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

ति, ततो व्यापादयिष्यामीति, ततस्तया यथा चिंतितं तथैव कृतं, बहुविधसंदेशगर्भितं कंबलरत्नं समर्प्य सोमदेवः प्रेषितः, स च देशविख्याताचार्यप्रवृत्तिपृछनेन तामालिग्रामसंस्थितस्य शिखिकुमारस्य समीपे गतः, तत्र तेन च साधुभ्यः सूत्रार्थमनुभाषमाणः कुमारो दृष्टः, उपलक्षितश्च, प्रहृष्टवदनकमलेन वंदितः, तेन च धर्मलाभितः, पश्चादुपलक्षितः, कुतो भवानिति पृष्टश्च, तेन प्रोक्तं हे देव! कोशनगरादत्यंतपश्चात्तापाग्निदह्यमानदेहया जनन्या तवैव प्रवृत्तिनिमित्तमहं प्रेषितोऽस्मि, शिखिकुमारेणोक्तं मातुः कः पश्चात्तापः? सोमदेवेनोक्तं यत्त्वं प्रव्रजित इति. ततः शिखिकुमारेण चिंतितमहो खलु स्नेहकातराण्यपरमार्थप्रेक्षीणि जननीहृदयानि भवंति, अप्रत्युपकारौ च मातापितराविति विचिंत्य शिखिकुमारेणोक्तं भो सोमदेव! अहं मातुरौदासीन्येन खलु न प्रव्रजितः, अपि च भवौदासीन्येनेति, तस्मादकारणमेव माता पश्चात्तापं करोति. सोमदेवेनोक्तं हे देव! तव जनन्या भणितं यथा हे पुत्र! स्त्रीलोकस्तुच्छहृदयोऽविवेकभाजनमविमृश्यकारी चपलस्वभावो मत्सर्यसद्ग्राहनिरतः पश्चात्तापकारी च भवति, पुरुषः पुनर्गंभीरहृदयो विनयभाजनं सुविमृश्यकार्यचपलस्वभावः कृतज्ञो दृढानुरागश्च भवतीति, तस्मान्ममाभिप्रायमज्ञात्वा त्वया किमिदं व्यवसितमिति?

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्यच्चांगीकृतपरलोकमार्गेणापि भवतावश्यमहं प्रेक्षणीयेति, तुभ्यं कंबलरत्नं चोपनीतमस्ति, एतच्च भवतावश्यं गृहीतव्यमिति, शिखिकुमारेणोक्तं भो सोमदेव! यत्त्वयोक्तं तस्योत्तरं तु मया भणितमेव, अकारणं माता पश्चात्तापं करोति, यच्चोक्तमवश्यमहं प्रेक्षणीयेत्यत्र गुरुः प्रमाणं, आत्मवशगत्वस्य ममाधिकारो नास्ति, मम तु यावज्जीवं गुर्वाज्ञायां स्थातव्यं, एतत्कंबलरत्नमपि साधूनामनुचितमेव, तथापि भगवते निवेदयेति. तत एकेन साधुना गुरुर्दर्शितस्तदा तेन सोमदेवेनैष वृत्तांतो भगवते निवेदितः, कंबलरत्नं चोपनीतं, तच्च कुमारबहुमानतो गुरुणा गृहीतं भणितं चांतरायं मुक्त्वाधिकृतसूत्रसमाप्तौ सत्यां कुमारं प्रेषयिष्यामि. सोमदेवेनोक्तं हे भगवन्नस्य जनन्यनुगृहीता. एवं च कतिचिद्दिवसान् स्थित्वा सोमदेवो गतः, तपःसंयमं कुर्वतः कुमारस्य कोऽपि कालोऽतिक्रांतः. अन्यदा च कोशनगरासन्नदेशविहारेण कुतश्चित्पुरुषाद्ब्रह्मदत्तः परलोकं गत इति विज्ञातप्रवृत्तिना भगवता विजयसिंहाचार्येण स्वजनालोकननिमित्तमेवैतस्मै वृत्तांतं कथयित्वा कतिपयसुसाधुपरिवारितः शिखिकुमारः कोशनगरं प्रेषितः, स च तन्नगरं प्राप्तः, मेघवनाभिधाने उद्याने स्थितः, अहो भगवान् शिखिकुमार आगत इति जनवादश्च जातः, राजनागरिकैः पूजितः, तेन चाक्षेपणी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धर्मकथा कृता, नागरिकाश्चावर्जिताः, द्वितीयदिवसे जननीसमीपं गतः, तेन च पापोदयेनेव ब्रह्मदत्तमरणेनात्यंतक्षीणविभवाऽसंज्ञाव्यमानवस्त्रा स्वजननी दृष्टा, न चोपलक्षिता, तया चैष उपलक्षितः, ततः सहजमायास्वभावेन बाष्पजलभरितलोचनं सदुःखमिव भैरवस्वरमेषा रोदनं कृतवती शिखिकुमारेण समाश्वासिता, तस्यै धर्मदेशना च दत्तां, तथाहि—हे अंब! एष संसारवास ईदृश एव, तस्मात्किमत्र क्रियतामिति, अपि च द्रव्येण पराक्रमेण वा स्वजनेन चतुरंगबलेन वा देवासुरैरपि मृत्युर्धर्तुं न शक्यते, व्याधिजराखरदंष्ट्रो। व्यसनशतनिपाततीक्ष्णनखजालः॥ जीवमृगघातनिरतो। मरणमृगेंद्रो जगति भ्रमति॥ १॥ येन कारणेनैष मृत्युरस्खलितः सन् जगति भ्रमति, तेनैव कारणेन सत्पुरुषाः परलोकमार्गे लग्नाः, तथा निर्दयहृदय एष मृत्युः कियता कालेन परस्परं प्रादुर्भूतस्नेहान् जंतुसमूहानकस्माद्वियुक्तान् करोति, तस्मादेतेन पीडितानां जीवानां सर्वस्मिन्नपि त्रैलोक्ये सर्वोत्कृष्टं जिनमतं मुक्त्वा किमपि शरणं नास्ति, एवं च हे अंब! तवापि मोहविषं त्यक्त्वात्यंतसुखमिदं धर्मामृतमेव युक्तं, एवं च भणिते सति समकालमेव जालिन्या प्रोक्तं हे पुत्र! मह्यमवस्थोचितानि व्रतानि देहि? ततः संपूर्णचारित्रासमर्थ्यं तस्याः परिणामं विचिंत्य सविस्तरं गृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिधर्मं कथयित्वा तस्यै अणुव्रतानि दत्तानि, तद्व्यापादनविश्वाससमुत्पादनानिमित्तं च सद्भावेनेव तया गृहीतानि, ततः कांचिद्वेलां गमयित्वा कुमारो गंतुं प्रवृत्तो जालिन्या भणितो हे पुत्राद्य त्वयेहैव भोक्तव्यमिति. शिखिकुमारेणोक्तं हे अंब! एष खलु साधूनामनाचारो यन्मधुकरवृत्तिं मुक्त्वैकपिंडभोजनमिति. जालिन्या भणितं हे पुत्र! त्वं जानासीति, एवं च स साधुः प्रतिदिनं तत्पुरो धर्मदेशनां करोति, जालिनी चैतस्य मारणोपायांश्चिंतयति, यावत्कोऽपि सूक्ष्मोपायो न लब्ध इति. अन्यदा चतुर्दश्यागता, साधवः सर्वे उपवासं कृत्वा स्थिताः, भिक्षार्थमगमनेन च तया ज्ञाताः. ततः सा चिंतितुं प्रवृत्ता यदि कथमपि कल्ये एष न व्यापाद्यते ततः पक्षसंधौ गमिष्यति, अत्रान्यः कोऽप्युपायो नास्ति. तस्मात्कंसारं कृत्वा तालपुटसंयुतं विषमोदकं प्रातरुपनयामि, एतानाग्रहतश्च भोजयिष्यामि, ततः स्वहस्तपरिवेषणेन तन्मोदकप्रदानेनेमं व्यापादयिष्यामीति.

ततोऽनया यथा चिंतितं तथैव कृतं, प्रातःकाल एव भोजनं गृहीत्वा जालिनी तमुद्यानं गता, शिखिकुमारेण दृष्टा भणिता च, हे अंब! किमेकाकिनी? किमप्यनुचितं गृहीत्वागतासि? जालिन्योक्तं हे पुत्रात्मन एव पुण्याभिलाषिण्यहं युष्माकं भोजनं गृहीत्वागतास्मीति. शिखिकुमा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रेणोक्तं हे अंब! एषोऽपि खलु साधूनामनाचार एव यत्साधूनामर्थाय कृतमाहृतं च भुज्यत इति, तस्यै सकलोऽपि साधूनां विधिः कथितः, ततस्तया प्रोक्तं हे पुत्रान्यथा मम हृदये सुखं न भवति, अस्मिन् कार्येऽकृते सति पुत्रस्यागमनं निष्फलं जानामि, तस्मादवश्यं त्वयेदं कर्तव्यमिति भणित्वा चरणयोर्निपतिता. ततश्च सरलस्वभावतो मुनिना चिंतितं प्रेक्ष्यतामस्या धर्मश्रद्धा पुत्रस्नेहश्च, त-स्मान्मास्या विपरिणामो भवत्विति, ततो गुरुलाघवमालोच्य शिखिकुमारेण भणितं हे अंब! यत्त्वं ब्रूषे इति, किंतु त्वया पुनरपि साधुनिमित्तमारंभो न कर्तव्यः, जालिन्या प्रोक्तं, हे पुत्रैवं यत्त्वं भ-णसीति, शिखिकुमारेणोक्तं यद्येवं तर्हितस्मै साधवे भोजनजातं समर्पय? ततो भोक्ष्ये, जालिन्या प्रोक्तं हे पुत्र! त्वया मातृवात्सल्यं दर्शितमेव, तस्मात्किमनेन? मम हस्ताद्भोक्तव्यमिति. शिखिकु-मारेणोक्तं हे अंबैवमागच्छतु पारणकवेलेति.

ततः पारणकवेलागता, कुमारवचनबहुमानतः साधव उपविष्टाः, तया यथोचितानि भोजना-नि विधिना दत्तानि, सुसंस्कृतः कंसारश्च परिवेषितः, साधवश्च प्रभुक्ताः, भुक्तशेषकंसारसंमिलित एव तालपुटमोदकश्च कुमाराय दत्तः, तेन च भुक्तः, साधव आचांताश्च, भाजनानि दूरे मुक्तानि. अ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रांतरे शिखिकुमारो विषव्याकुलो जवितुमारब्धः, तदा तेन चिंतितं किमेतदिति, साधवश्च प्रलोकिताः, यावत्सुस्थास्तिष्ठंति, ततोऽनेनाकारगोपनं कृतं, एवं च यावत्स्तोका वेलातिक्रमति तावत्तस्य वाक्प्रणष्टा, अनेन च चिंतितं निश्चितं न जविष्यामीति, धरणीपीठे निपतितः, साधव आकुलीभूताः, तैश्चिंतितं च किमेतदकार्यं तस्य जनन्या कृतं जविष्यति? ततो विषेण व्याप्तः स शिखिमुनिर्विधिनानशनं कृत्वा परिचिंतितुं प्रवृत्तो हंतापूर्वं किमेतत? संसारस्वरूपं धिगस्तु, मातरं किल धर्माचरणयोगेन संसारक्लेशाच्छीघ्रं मोचयिष्यामि, इदं वांछितमपुण्यस्य मम संपूर्णं न संपन्नं, तथैषा माता च प्रमादतोऽयशःपंके पातिता, पुनर्मातुः पूर्ववृत्तांतभावितोऽनार्यो लोकोऽत्राशंकनीयेऽपि कार्ये मोहदोषेण शंकिष्यते, मातुः संक्लेशजनकमिदं जन्म धिगस्तु, अथवैष संसार एवंविध एव पाप इति, अत्र संसारे दोषेऽकृतेऽपि केऽपि जीवा अयशःपंकं प्राप्नुवंति, केऽपि पुनः पूर्वकृतकर्मत एव कृतेऽपि दोषेऽयशःपंकं न प्राप्नुवंति, यतः कर्मगतिर्विचित्रा, तस्मादस्या एतदपि च प्रायश्चित्तं पूर्वकृतदुःकर्मणामेवाशुजफलं, अथवा सांप्रतमेषापि न शोचनीया, येन कारणेन जीवलोके शिवसुखफलकल्पतरुं जिनधर्मं प्रापिता, तस्मात्संप्रति शेषचिंतया किं? परमपदसाधकं जिनोक्तं पंचनमस्कारं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्मरामि. ततः शुभपरिणामः पंचनमस्कारभावनायुक्तः स साधुर्मृत्वा ब्रह्मलोके रतिलक्ष्मीसमागमे विमाने नवसागरोपमायुर्महात्मा दिव्यद्युतिर्ब्रह्मेंद्रसामानिकः सुरवरः समुत्पन्नः, जालिन्यपि शेषमायुर्गमयित्वा मृत्वा शर्कराप्रभायां त्रिसागरोपमायुर्महाघोरो नैरयिक उत्पन्न इति. ॥ इति श्रीसंविग्नपक्षीयवाचनाचार्यश्रीमदमृतधर्मगणिशिष्यपाठकश्रीक्षमाकल्याणगणिविनिर्मिते संस्कृतमयसमरादित्यचरित्रे जालिनीशिखिकुमारमातापुत्रप्रबंधरूपस्तृतीयो भवः समाप्तः. ॥ श्रीरस्तु ॥

---

॥ अथ चतुर्थभववर्णनं प्रारभ्यते ॥

मारुदेवं जिनं नत्वा । प्रत्यूहव्यूहनाशकं ॥ नृपतापसयोरेव । चतुर्थं जन्म वर्ण्यते ॥ १ ॥
शिखिजीवः सुरस्तत्र । भुक्त्वा दिव्यं महासुखं ॥ यत्रोत्पन्नस्ततश्च्युत्वा । सांप्रतं तन्निशम्यतां ॥ २ ॥
अथ मूलचरित्रगाथा यथा—सिहिजालिणि माइसुया । जं भणियमिहासि तं गयमियाणिं ॥ वोछामि समासेणं । धणधणसिरिमो य पइभज्जा ॥ १ ॥ चतुर्थे मनुष्यभवे तौ द्वावपि धनधनश्रीनामानौ पतिभार्यारूपावभूतां, तथाहि—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इहैव जंबूद्वीपे द्वीपे भरतक्षेत्रे सौधर्मदेवलोकप्रतिबिंबभूतं नित्योत्सवानंदप्रमुदितमहाजनं नि-
रंतरप्रवृत्तप्रेक्षणकशोभितं सुरसरित्सलिलनिर्धौतपर्यंतं सुशर्मनगरं नाम पुरवरमस्ति. पुनः कीदृशं?
—देवांगनाजनतुल्यसौंदर्यरूपवेषविभवाभिः कंदर्पजयपताकाभिः पौरांगनाभिर्युक्तमिति. पुनरत्र
पुरेऽन्यत्सर्वं त्यक्त्वा परार्थनिष्पादनैकलिप्सः पुरुषाणां वर्गो यथार्थं निजं नाम वहति, तत्र विरो-
धिभूपतिगजकेसरी सुधनुर्नामा राजास्ति, तस्य बहुमतः सर्वनगरैकश्रेष्ठी दीनानाथकृपणजनवत्सलो
बांधवकुमुदाकरचंद्रो लघुकृतवैश्रमणविभवस्त्रिवर्गसंपादनरतिर्वैश्रमणो नाम सार्थवाहोऽस्ति. तस्य
सदृशकुलरूपविभवशीला सिरियादेवी नाम भार्या, तयोश्च परस्परं स्नेहसारं विषयसुखमनुभवतोः
कोऽपि कालोऽतिक्रांतः, अन्यदापत्यचिंता समुत्पन्ना, ततश्च तन्नगरसमीपवर्तिनो धनदेवनामयक्षस्य
महापूजां कृत्वाभ्यामौपयाचितकं कृतं, तदित्थं—हे भगवन्! यद्यस्माकं तव प्रभावतः पुत्रोत्पत्तिर्भ-
विष्यति, तर्हि भवतः सर्वनगरजनाधिष्ठितमहोत्सवं करिष्यामः, पुत्रस्य च भगवत एव नाम स्थाप-
यिष्याम इति. ततस्तयोर्मध्यमे वयसि वर्तमानयोः स ब्रह्मलोककल्पवासी देवो यथायुरनुपाल्य त-
तश्च्युतः सन् सिरियादेव्या गर्भे उत्पन्नः, तया च तस्यामेव रात्रौ स्वप्ने प्रभातसमये मत्तहस्ती मु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वेनोदरं प्रविशन् दृष्टः, स च कीदृशः?—उत्तुंगधवलकायोऽत्यंतलीलागामी निरंतरप्रसृतमदजलो गंडस्थलापतितभ्रमरश्रेणिश्चतुर्दंत आरक्तताबुर्लीलाचलत्करः स्वर्णशृंखलाबद्धघंटायुगलः श्वेतदंतविभूषितवदनोंऽकुशोपेतकुंभस्थलो घूर्णच्चारुलोचनः सर्वांगसुंदर इति. तं गजं दृष्ट्वैषा सुखं जागृता, स स्वप्नो यथाविधि भर्त्रे प्रोक्तः, तेन च हर्षवशोत्पुलकितेन भणिता हे सुंदरि! सकलस्वजनगणनायकस्ते पुत्रो भविष्यति, ततः सैवमिति भर्तुर्वचनमभिनंद्य प्रहृष्टमुखकमला जाता. ततो विशेषतस्त्रिवर्गसंपादनरतायाः संपादितसकलमनोरथाया अभज्यमानप्रसरं पुण्यफलमनुभवंत्याः प्रसूतिसमयः प्राप्तः.

ततः प्रशस्ते तिथिकरणमुहूर्तयोगे एषा सुखेन प्रसूता, तस्याः पुत्रो जातः, परितोषकारिण्या गृहदास्या वैश्रमणाय निवेदितः, श्रेष्ठी परितुष्टः, तस्यै पारितोषिकं दत्तं, तदा तेन महादानं दापितं, वर्धापनकं च कारितं, ततो मासेऽतिक्रांते महाविभूत्या सकलनगरजनपरिवृतः श्रेष्ठी दारकं गृहीत्वा धनदेवयक्षालयं गतः, तस्य महिमा संपादितः, चरणयोर्दारकः पातितः, तस्य धन इति नाम कृतं, ततः कालक्रमेण कुमारभावं प्राप्तः, अत्रांतरे स जालिनीजीवनारकस्ततो नरकादुध्धृत्य पु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नः संसारे भ्रांत्वानंतरभवे तथाऽकामनिर्जरया मृत्वा तस्मिन्नेव नगरे पूर्णभद्रसार्थवाहस्य गोमत्या भार्यायाः कुक्षौ पुत्रीत्वेनोत्पन्नः, उचितसमये जाता, धनश्रीरिति तस्या नाम कृतं, यौवनं प्राप्ता. अन्यदा साष्टमीचंद्रमहोत्सवे मदनलीलाकरोद्यानात्स्वभवनमुपागच्छंती रतिरूपधारिणी सखीजनसमेता च तेन धनेन दृष्टा, ततः पूर्वभवाभ्यस्तमैत्रीगुणाढ्येन साभिलाषं विलोकिता, तयापि तथाभ्यस्तमत्सरात्सुचिरमवलोकित इति, पार्श्ववर्तिना सोमदेवाभिधानेन पुरोहितसुतेन तस्य भावो लक्षितः, श्रवणपरंपरयैष वृत्तांतो वैश्रमणगोचरं समागतः, ततस्तेन धननिमित्तं धनश्रीर्मार्गिता, पूर्णभद्रेण सबहुमानं दत्ता, आभ्यां परस्परमेष वृत्तांतो ज्ञातः, धनो निजहृदयेन परितुष्टः, धनश्रीर्विमनस्का जाता, वैश्रमणपूर्णभद्राभ्यां वर्धापनिकानि कृतानि, महाविभूत्या सकलनगराश्चर्यभूतो विवाहो वृत्तः, ततः कोऽपि कालोऽतिक्रांतः, तस्यैव गृहप्रसूतेन नंदकाभिधानेन दासेनैषा लब्धा, स च दासः किल तापसपर्याये वर्तमानस्याग्निशर्मण आर्जवकौंडिन्यपरिचारकः संगमको नाम तापसः परममित्रमासीदिति. ततस्तया सार्धं विशेषतो विडंबनाप्रायं विषयसुखमनुभवतो धनस्य कोऽपि कालोऽतिक्रांतः, कालक्रमेण च तस्य शरत्समयः संप्राप्तः, स च कीदृशः?—

नवजलभरितसरोवरेषु ये कमलाकरास्तेषु प्रसक्ता उन्मत्ता मधुरं गुंजंतो भ्रमणशीला ये भ्रमरास्तैः पूर्णः, पुनर्भ्रमरकुलैरुत्साहिताः सहर्षमव्यक्तमधुरस्वरालापिनो ये हंसास्तेषां कुलैर्मुखरः, पुनर्मुखरगोपालयुगलप्रारब्धसरसगेयरवव्याप्तक्षेत्रमार्ग इति. अपि च—यत्र शरत्कालेऽरण्यानि निर्भरकुसुमभारावनतैः प्रियकबाणैर्वृंदविशेषैः कासकुटजैश्च वनस्पतिभेदैरिदं हसंतीव, पुनर्यत्र मेघाः समस्तं लवणसमुद्रजलं मुक्त्वा पीतसरसक्षीरसमुद्रजला इव धवलाः शोभंते, पुनर्यत्र वनानि गंधाकृष्टकपोलस्थभ्रमरजालरुष्टैरिव हस्तिभिर्भग्नानि दृश्यंते. एवं गुणाभिरामे शरत्समये धनेन तन्नगरवास्तव्य एव समृद्धदत्तो नाम सार्थवाहपुत्रो देशांतराद्बहुद्रव्यजातमुपार्ज्य महाकार्तिक्यां दीनानाथेभ्योऽनिवारितं महादानं ददानो दृष्टः, ततस्तं दृष्ट्वा धनेन चिंतितमेष खलु धन्यो य एवं निजभुजार्जितेन द्रव्यजातेन परोपकारं करोति, तदा स विमनस्को जातः, पार्श्ववर्तिना नंदकेन च भणितो हे सार्थवाहपुत्र! त्वमुद्विग्नः कथं जातः? तेन स्वकीयाभिप्रायः कथितः, नंदकेनोक्तं हे सार्थवाहपुत्र! स्तोकमिदं, भवतोऽपि महापुण्योपार्जितं द्रव्यजातमस्ति, तस्माद्भवानप्यस्मादपि विशेषिततरं ददातु, धनेनोक्तं किमनेन पूर्वपुरुषोपार्जितेन? यतः—स पुनर्लोके श्लाघ्यो । ददाति यो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजभुजार्जितं द्रव्यं ॥ दीनप्रणयिजनेभ्यः । सुतरामप्रार्थितो मनुजः ॥ १ ॥ मम निजभुजार्जितं न किंचिदस्ति, तस्मात्त्वं तातं विज्ञपय? अहं पूर्वपुरुषसेवितं वाणिज्यं करोमि, दिग्यात्रया गच्छामि, कालोचितमकुर्वन् पुरुषो जीवितं विफलीकरोति, त्रिवर्गसाधनमूलमर्थमुपार्जयितुं च मम कालोऽस्ति, तस्मान्मम वांछितनिष्पादनेन प्रसादं कुरुष्वेति. तेन नंदकेन श्रेष्ठी विज्ञप्तोऽनेन च जणितं हे नंदकैवं मे पुत्रं ब्रूहि? यथा हे वत्स! सकलनगरश्रेष्ठिभ्योऽप्यभ्यधिकं त्रिवर्गसाधनमूलमर्थजातं तवास्त्येव, तस्मादनेनैव यथासमीहितं कुरुष्व? नंदकेनोक्तं हे तातैतदस्ति, तथापि पुनरेतस्यान्यथा धृतिर्न जवति, श्रेष्ठिनोक्तं यथैतस्य धृतिर्जवति तथा करोत्विति.

नंदकेनेदं धनाय निवेदितं, एष खलु परितुष्टः, सामग्री कृता, नानाप्रकारं जांडजातं गृहीतं, आघोषणा कारिता, यथा धनः सार्थवाहपुत्रोऽस्मान्नगरात्तामलिप्तीं गमिष्यति, तस्मात्तेन सार्धं यः कोऽपि तन्नगरगामी स प्रचलतु, यस्य यत्पाथेयमुपकरणं वा न संपद्यते, तस्य तदेष संपादयतीति. जनः प्रवृत्तः. अत्रांतरे धनश्रिया चिंतितमेतस्य विदेशगमनेन मे शोजनं जविष्यति, प्रत्यासन्ने च गमनदिवसे यथा नंदकोऽप्यनेन सह गमिष्यतीति श्रुतं, ततस्तया मायावृत्त्या सार्थवाहपुत्रो जणि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तो हे आर्यपुत्र! त्वं प्रस्थितः, मया पुनः किं कर्तव्यं? तेनोक्तं हे सुंदरि! त्वया गुरूणां श्वशुरादीनां शुश्रूषा कार्या. ततः कपटप्राधान्याद्बाष्पजलभरितलोचनया धनश्रिया सदुःखमिव प्रोक्तं हे आर्यपुत्र! गुरवो हृदये सन्निहिताः संति, यदि पुनस्त्वं मां त्यक्त्वा गमिष्यसि तर्हि तुभ्यमिदमुक्तमस्त्यहमवश्यमात्मानं व्यापादयिष्ये इति. अव्यक्तशब्दं रोदितुं प्रवृत्ता. अत्रांतरे धनस्य जननी समागता, तेनाभ्युत्थिता धनश्रीश्च निर्गता, अनया तस्या भावो लक्षितः, पुत्राय शिक्षा दत्ता, यथा हे पुत्र! देशांतराणि खलु दीर्घाणि, वियोगः सुलभः, पुनरपि संगमो दुर्लभः, अर्थोपार्जनं च क्लेशप्रयासप्रचुरं, अस्य मूलं चाविषादस्तस्माद्यद्यपि त्वं सकलगुणसंयुक्तस्तथापि विशेषतः क्षमादिगुणेषु यत्नः कर्तव्यः, निरंतरं च मह्यं प्रवृत्तिर्दातव्येति. धनेनोक्तं हे अंब! यत्त्वमाज्ञापयसि. ततस्तस्य जननी गता, तया च वधूर्विसर्जिता, सार्थो गंतुं प्रवृत्तः. निरंतरप्रयाणकैश्च मासद्वयमात्रेण कालेन तामलिप्तीं प्राप्तः, राजा दृष्टः, तेन बहुमानः कृतः, भांडं विक्रीतं, यथेप्सितलाभो न प्राप्तः, ततोऽनेन चिंतितमहमसंपादितमनोरथः कथं गृहं गच्छामि? ततो भगवान् रत्नाकरः प्रत्यासन्न एवास्ति, एतमवगाहे इति, संशयमारूढः पुरुष एकांतकष्टभीरुः सकलजनानंदकारिणीं संपदं न प्राप्नोति. किं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वा संपदा रहितस्य पुरुषसंख्यामात्रफलसाधकेन जीवितेन? तस्मात्समुद्रतरणमंगीकुर्वे, ततो नंदकेन धनश्रिया च सहालोच्य सिद्धांतः स्थापितः.

अत्रांतरे मज्जनवेलायामुपस्थितायां द्विहस्तमात्रजीर्णचीवरनिवसन उद्दामनखविलिखितांगः खटिकाघर्षणश्वेतहस्तस्तांबूलरागरक्ताधरः शिरसि परिम्लानकुसुममालां दधानो द्यूतकारवृंदप्रेरितो भयकातरं पृष्टतो विलोकमान एको द्यूतकार आगतः, आगत्य चानेन भणितं हे आर्य! शरणागतोऽस्मि, आर्यो मां रक्षत्वेतेभ्योऽनार्यद्यूतकारेभ्यः, तदा धनेनोक्तं हे भद्र! विश्वस्तो भव? अथ किं कारणं पुनरेते भवंतं पराभवंति? तेनोक्तं हे आर्य! मम भाग्यानि पृच्छ? अहं कथयितुं न शक्नोमि, ततो धनेनाहोऽस्य भावगुरुक आलाप इति विचिंत्य प्रोक्तं हे भद्र! विषादेनालं, नित्यं समदशा कस्यापि न भवति, तस्माद्भद्रोऽत्र कारणं कथयतु. ततः प्रत्यागतसंवेगेन बाष्पजलरुद्धनयनं सगद्गदाक्षरं तेनोक्तं हे आर्य! वणिक्कुलविडंबक उभयलोकविरुद्धसेवी विबुधजननिंदितो विषवृक्ष इव प्राणिनामपकारनिमित्तमेव समुत्पन्नोऽस्मि, कुसुमपुरनिवासी महेश्वरदत्तो नामाहमिति, सपुण्यजनवर्जितेन सकलदोषनिधानभूतेन द्यूतेनेदृशीमवस्थां प्राप्तोऽस्मि. ततो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धनेन चिंतितमहोऽस्य विवेकः, एतदवस्थागतमप्यात्मानं जानाति, अकार्याचरणं च परिवेदयति, तस्मादेष कोऽपि गुरुकः खल्विति विचिंत्य प्रोक्तं हे जद्र! तावत्ते किं क्रियतां? ततस्तेन मिलल्लोचनं शुष्यद्वदनं स्खलदक्षरमीषदपि जल्पितुमशक्नुवता न जल्पितमेव, ततो धनेन किमपि हारितं जविष्यति, तद्याचितुं न शक्नोतीत्यर्थतो विज्ञाय नंदको जणितो हे भद्र नंदकैतान् बहिर्भ्रमतो द्यूतकारान् पृच्छ? यथा हे जद्रा अनेन जद्रेण जवतां किमपराद्धमिति, नंदको निर्गतस्तेन द्यूतकाराः पृष्टास्तैश्चोक्तमेष खलु वचनरचनया षोमशसौवर्णिकानि हारयित्वायास्मान्निर्गरुहशिबद्धं लब्ध्वा दोजव्यापृतेभ्योऽस्मन्यं सौवर्णिकान्यदत्वा पलाय्येह प्रविष्ट इति. ततो नंदकेनेदं धनायोक्तं, धनेन च जणित एतेज्यः षोडशसौवर्णिकानि देहि? नंदकेन दत्तानि, द्यूतकारा गताः, धनेन च स जणितो हे जद्रोत्तिष्ट? विषादं मुंच? पुरुषाः खलु कार्यप्रधाना जवंति, स्त्रीजनश्च विषादबहुलस्तस्माद्भद्रो मज्जत्विति. महेश्वरदत्त उत्थितो धनेन सह मज्जनं कृतवान्, तस्मै क्षौमयुगलं दत्तं, तेन च परिहितं, जोजनोत्तरकाले च धनेन जणितं हे जद्र! एकजातितः सज्जनजावतश्चावयोः समानत्वे इदं द्रव्यजातं, तावदितः किमपि गृहीत्वा जद्रः स्वयमेव नियोगमनुतिष्ठतु, अनेन नीचलो-

कात्रिमतेन बुधजननिंदितेनोजयलोकातीवकुत्सितेनाधमजनतुष्टिजनकेन द्यूतकारचेष्टितेन तव किं? महेश्वरदत्तेन चिंतितमहो मेऽधन्यता! तातरुद्रदेवकुलसदृशमस्य चेष्टितं, मम पुनरिदमीदृशमिति. अपि च परोपकारमकुर्वन् मनुष्यस्तथा लाघवं न प्राप्नोति, यथा करुणां प्राप्तेन परेण क्रियमाणोपकारः सन् लाघवं लजते, तस्मात्किमनेन? पौरुषमवलंबे, अधुनापि स्वकुलसदृशं करोमीति विचिंत्य महेश्वरदत्तेनोक्तं हे आर्य! धन्यः खल्वहं यस्य मम तव दर्शनं संजातं, अतो मया सांप्रतं पंमितलोकस्यानिष्टं चेष्टितं परित्यक्तमेव, अहं पुरुषगुणैराश्रितोऽलक्ष्म्या विमुक्तस्तस्माद्बहुना जल्पितेन किं? आर्यप्रवाहेणैवाहमवश्यमार्यस्योपदेशश्रमं सफलं कृत्वार्थं प्रेक्षिष्ये इत्युक्त्वा गृहान्नगरीतश्च निर्गतः, ततश्च किं करोमि? ऽव्यजातनिमित्तं किं जगवंतं जलनिधिं लंघे? द्रव्यरहितः खलु पुरुषोऽपुरुष एव, दरिऽस्य हि यशःकीर्तिविस्तारो न जवति, सज्जनेन संगमो न जवति, परोपकारसंपादनं च न जवेदिति. अथवाऽप्रस्तावमनोरथजंगुरेषु विजितसुरासुरेषु सहर्षमुद्दामभ्रमणशीलेषु कालदंडेष्वनेनालोचितेन किं? तस्मादुजयलोकसुखावहं जगवंतं धर्ममंगीकरोमि, एवं च कृते सत्यस्य सार्थवाहपुत्रस्यापि परमार्थतः प्रसन्नत्वमेव जवतीति विचिंत्य स्वपितुर्मित्रस्य योगीश्व-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

रन्निधानस्थ कापालिकस्य समीपे प्रव्रज्यां गृहीतवानिति. इतश्च धनेन स्वकीयाभिप्रायो नंदकधनश्रीभ्यां निवेदितः, ताभ्यां च भणितं भवतो वांछितांतरायकारकाः के वयं? यद्भवतां रोचते इति. ततो धनेन परतीरगामिकं भांडं गृहीतं, प्रवहणं गवेषितं.

अत्रांतरे धनश्रिया नंदकः प्रोक्तो यथैतं व्यापादयावः, आवामन्यत्र गच्छावः, आवयोः समुद्रतरणेन किं? नंदकेनोक्तं हा न युक्तमेतत्, एष खलु स्वामी सद्भावयुक्तश्च, तस्मात्त्वया स्वप्नेऽप्येवं न चिंतनीयं. ततो धनश्रिया चिंतितमेष एतस्य घातं न करोति, अहमेव केनचिदुपायेनैतं करिष्यामीति. ततस्तया नागदत्तानामपरिव्राजिकातः श्रुत्वा रोगोत्पत्तिकारकः कालांतरनिपाती कार्मणयोगः कृत इति. अत्रांतरे सांयात्रिकं प्रवहणं प्रगुणीकृतं, मध्ये प्रचुरं भांडं भृतं, ततः प्रशस्ते दिने धनो निर्गतः, वेलाकूलं गतः, दीनानाथेभ्यो द्रव्यजातं दत्तं, समुद्रः संपूजितः, यानपात्रं पूजितं, एष परिजनेन सहारूढः, नंगरा उत्क्षिप्ताः, शंखकुंदेंदुधवलः सीतपट आपूरितः, ततस्तद्यानपात्रं पवनवेगेन समुद्रं लंघितुं प्रवृत्तं, कीदृशं समुद्रं?—कच्छपकरिमकरनिकरतिमितिमिंगिलकलितं, शंखकुलाकुलदेशं, पातालतलमिव गंभीरं, जलगतजलधरप्रतिबिंबप्रतिहस्तिदर्शनेनात्यर्थद-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

पोध्धुरकरिमकरोछलनसंक्षोभिततरंगं, वेलाकूले लवलीलतागृहेषु निषधैर्गंधर्वयुगलै रमणीयं, हीर-केंडनीलमरकतकिरणपरिरंजितजलसमूहं. विडुमलताभिरामं, पवनप्रकंपितजलकणाहतसरसशब्दायमानतालवनमिति. एवं च यावत्कतिचिद्दिनानि गतानि तावद्धनश्रिया धनाय पूर्ववर्णितो योगो दत्तः, स्तोकदिवसैरेव चाकृतोपचार एष महाव्याधिना गृहीतः, तस्य महोदरं जातं, भुजौ परिशुष्कौ, वदनमुच्छूनं, जंघे गलिते, करचरणौ स्फुटितौ, तस्य भोजनं न रोचते, तृषा पीड्यते, पीतमुदकमुदरे न तिष्टति, ततो धनो विषस्णः, तेन च चिंतितमप्रस्ताव एव किमेवं पापविलसितं! अथवा पापविलसितस्याकालो नास्ति, तस्मात्किं करोमि? मम परिजनो दुःख्यस्ति, धनश्रीर्विषस्णा, नंदकश्च प्रम्लानवदनः, तस्मात्किमस्मिन्नेव रत्नाकरे आत्मानं व्यापादयामि? अथवैवं कृते एतेषां सुखं न भवति, अपि चाधिकतरं दुःखमिति. अकृतप्रतीकारस्य चेदं कापुरुषचेष्टितं न युज्यत इति, मात्रा प्रोक्तं चाविषादिना भवितव्यमिति, यथेष्टमपरकूलं च प्रत्यासन्नमस्ति, तस्मादिदं तावदत्र प्राकालं नंदकमेव भांडस्वामित्वे नियुनज्मि, विधेर्विलसितानि खलु विचित्राणि, को जानाति किं भविष्यतीति? एष च तावत्तातकृतोपचारं मम च भ्रातृस्नेहं बहुमन्यमान एतां धनश्रियं बांधवहस्त-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

गतां करिष्यतीति विचिंत्य तेन धनश्रिया सहितो नंदको जणितो हे मित्र नंदक! कर्मपरिणतिवशेन ममैषावस्था, यथेष्टमपरकूलं च प्रत्यासन्नं, सर्वजीवनामेव जीवितं चानेकापायपीडितं, विशेषतो व्याधिपीमितशरीराणामस्मादृशानामिति. तस्मात्कारणादिदं ऽव्यं त्वं गृहाण? त्वमेवात्र नायकः, जलधिसमुत्तीर्णस्य च मम यथोचितं रोगगमनोपायं कुर्याः, ततो यदि मम रोगापगमो जविष्यति तर्हि सुंदरमेव, अन्यथा तु तातोपकारं मम ज्रातुः स्नेहं च बहुमन्यमानेन त्वयैषा पतिवत्सला धनश्रीर्बांधवानां प्रापयितव्या, हे सुंदरि! त्वयापि च पापं मुक्त्वायमहमिव दृष्टव्यः, अस्य च वचनं न खंडनीयं.

अत्रांतरे नंदकः सदुःखमेव रोदनं कृतवान्, धनश्रीश्च कपटेन रोदितिस्म, धनेनोक्तं हे मित्र नंदकैष विषादस्य कालो न, तस्मात्पौरुषमवलंबय? कापुरुषबहुमतं कातरत्वं परित्यज? स्वकीये हृदये कालोचितं कार्यं निश्चितं कुरु? हे सुंदरि! त्वमपि स्त्रीजनहृदये सुलभं शोकं परित्यज? चिंताप्रयासकारिणं स्नेहं विस्मर? कार्यमवलंबय? अत्र किन्न स पुरुषः स्त्री वा प्रशस्यते यः कालज्ञः, कालज्ञश्च सन्नुत्साहवानवश्यमापदं लंघते इति. ततश्चाभ्यां धनस्याज्ञा प्रतिपन्ना, महाकष्टाहं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समरा-
चरित्रं
१७३

नाम द्वीपं प्राप्ताः, नंदकः प्राभृतं गृहीत्वा नरपतिं विलोकितुं गतः, राज्ञा बहुमानं दत्वा निवास-स्थानं दत्तं, भांममवतारितं, वैद्या धनस्योपनीताः, उपक्रमः प्रारब्धः, तद्योगदानतो व्याधिर्नापगछति. ततो नंदकेन चिंतितं निजदेशमप्राप्तस्यास्यैष व्याधिर्नापगछति, ततोऽत्र कालक्षेपकरणं न युक्तं, ततोऽत्र भांमं विक्रीतं, प्रतिभांमं च गृहीतं, यानपात्रं सज्जितं, नरपतिर्दृष्टः, संपूजितश्च, ततो निजदेशमागंतुं प्रवृत्तः, कतिपयप्रयाणकेष्वतिक्रांतेषु धनश्रिया चिंतितमेष कथं न मृतः? स्वदेश-मुपगतायाश्चैतस्य मारणोपायो दुर्लभः, जीवंश्चैष नित्यं मम हृदयशल्यभूतस्तस्मादिदमत्र प्राप्तकालं, रजन्यां यदैष देहशौचार्थमुत्तिष्टेत्तदास्मिन्नेव जलचरशताकुले सागरे प्रक्षिपामि, प्रक्षिप्तश्च सन्नेष यानपात्रस्य चपलस्वभावत्वात्ततः पतित एव निःसंदेहं न भविष्यति, एवं च कृते सत्येष नंदकोऽपि मम शाश्वतो भविष्यतीति विचिंत्य धनश्रिया यथा चिंतितं तथा निष्पादितं, प्रहरावशेषायां रजन्यां देहशौचनिमित्तमुत्थितः सार्थवाहपुत्रः पातालगंभीरे समुद्रे प्रक्षिप्तः, कंचित्कालं मौनेन स्थित्वा पश्चात्तया हाहारवः कृतः, नंदक उत्थितः, एषा पृष्टा हे स्वामिनि! किमेतत्किमेतत्? ततः सात्मानमनुताडयंती सदुःखमिवाधिकतरं रोदितुं प्रवृत्ता, हा आर्यपुत्र! हा आर्यपुत्रेति जल्पंती धरणी-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पृष्टे निपतिता. ततः संजाताशंकेन नंदकेन सार्थवाहपुत्रशय्यां विलोक्य तमप्रेक्षमाणेन सगद्गदा-
क्षरं पुनरपि पृष्टा, स्वामिनि! किमेतत्? धनश्रिया प्रोक्तमेष खल्वार्यपुत्रो देहशौचनिमित्तमुत्थितः
प्रमादतः समुद्रे निपतित इति. तदेतत श्रुत्वा बाष्पजलभरितलोचनस्तत्स्नेहमोहितमतिर्नंदकस्त-
स्मिन्नेव सागरे आत्मनः प्रक्षेपं कर्तुमारब्धवान्, परिजनेन धृतः. ततोऽत्यंतशोकानलप्रज्वलितमान-
सोऽत्रोपायांतरं न दृश्यत इति विषण्णः, तेन यानपात्रं स्तंभितं, धनं गवेषयित्वा प्रतर्नगरा भृत्कि-
ष्ठाः, सदुःखं निजदेशाभिमुखं गंतुं प्रवृत्तः.

इतश्च स सार्थवाहपुत्रः पतनसमयानंतरमेव संप्राप्तपूर्वभग्नयानपात्रफलकः सप्तभिरहोरात्रैः सा-
गरं समुत्तीर्य लवणजलसेवनाद्विगतरोगः संस्तीरप्रदेशं संप्राप्तः, सागरादुत्तीर्णः, आत्मानं पुनर्जात-
मिव मन्यमानस्तिमिरवृक्षस्य पार्श्वे उपविष्टः, तेन च चिंतितमहो स्त्रीवर्गस्य मायाबहुलता! अहो
धनश्रिया दुष्टता! अहोऽद्वितीयो ममोपरि वैरानुबंधः! अहोऽनया कुलद्वयं लघु कृतं! तावत्किं पु-
नस्तस्या अस्य व्यवसायस्यकारणं? अथवाऽविवेकबहुले स्त्रीजने कः कारणं पृच्छति? यतः स्त्री ना-
म दोषाणां निवासः, साहसानां निमित्तं, कपटानामुत्पत्तिः, मृषावादस्य क्षेत्रं, अश्रेयोमार्गस्य द्वारं,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आपदां गृहं, नरकाणां सोपानं, कुशलपुरप्रवेशस्यार्गला, तस्मात्किमनेन चिंतितेन? कार्यं चिंतयामि, एतस्यालोचनीयस्यैष कालो नास्ति, अपि चोत्साहस्य कालोऽस्ति, उत्साहममुंचन् पुरुषोऽवश्यमेव व्यवसायानुरूपं फलं प्राप्नोति, अतीतवस्तुचिंता चात्यर्थं न कर्तव्येति वृद्धवादः, पुरुषस्येदं च स्तोकं प्रयोजनं, जननीजनकौ च महत्प्रयोजनं, तौ च मम सुंदरावेवेति विचिंत्य वृक्षसमीपादुत्थितः, स्तोकं भूमिभागं गतस्तावत्तत्र तेन प्रवहणभंगमृतायाः श्रावस्तीपुरीनृपतेः सिंहलद्वीपगामिपुत्रीचेटिकाया उत्तरीयदेशे तमुद्देशमुद्योतयंती त्रैलोक्यसारा नाम रत्नावली दृष्टेति. इदं वृत्तांतमजानता च तेन परकीययाप्यनया व्यवहारं कृत्वा पुनः पुनरिदमेवोद्दिश्य कुशलपक्षं करिष्यामीति विचिंत्य सा गृहीता, अग्रे गंतुं प्रवृत्तः, तत्र च द्यूतकारव्यतिकरविमोचितेनांगीकृतकापालिकव्रतः सुसिद्धगारुडमंत्रो मंत्रसाधनार्थमेव च समुद्रतटमधिवसन् महेश्वरदत्तस्तेन दृष्टः, तेनाप्येष इति, तेन प्रत्यभिज्ञातो भणितश्च हे सार्थवाहपुत्र! त्वं कुतः? कथं वा तवेदृश्यवस्था? ततो गृहदुराचारोऽन्यस्मै प्रकाशयितुं न युज्यत इति विचिंत्यानेन प्रोक्तं जलनिधेरहमागतः, प्रवहणवियोगतो ममेयमीदृश्यवस्थेति.

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

महेश्वरदत्तेनोक्तं विधिरुन्नतानां पुरुषाणां भंगेषु तत्परोऽस्ति, श्रीश्चंचलेति लोकवादः सत्यः, गृहवासः क्लेशप्रयासबहुलः, येन च कल्पवृक्षस्येव परिहितसंपादनामात्रफलजन्मनो भवतोऽपीदृश्य-वस्था, अथवा स्तोकमिदं, कालयोगतः प्रणष्टोऽपि चंद्रोऽल्पकालेनैव संपूर्णतां प्राप्नोति. विषमदशा-विभागे च वर्तमाना देवा अपि परिक्लेशभाजो भवंति, किमंग पुनर्मर्त्यलोकवासी जनः! तस्मा-त्त्वया मनसि संतापो न कार्यः, यतो महापुरुषा आपदि वज्रकठिनहृदया एव भवंति, आपच्चोपका-रिणी वर्तते, यतोऽनया सज्जनदुर्जनविशेषो ज्ञायते, परिजनोऽनुरक्त इतरश्च लक्ष्यते, आत्मनो भाग्यानि ज्ञायंते, नित्यप्रछन्नः पुरुषकारः प्रादुर्भवति, अग्निमसंप्राप्तस्य कृष्णागरुकाष्टस्य सर्वथा गं-धोपलब्धिर्न भवति, एषापच्चिरकालस्थायिनी नेति लक्षणतो जानामि, अन्यच्च भवतो विभव इव साधारण एव ममैष क्षणमात्रपीडाकरः परिक्लेशः, अहं च सांप्रतं परित्यक्तसर्वसंगस्तव किमुपकरोमि? तथाप्येतं पठितमात्रसिद्धं तक्षकसर्पदष्टस्यापि विषापहारकं भगवता विनयानंदेन प्रणीतं गारुडमंत्रं त्वं गृहाण? अनेन च विभवो भविष्यति, स्वविभवेन च परार्थसंपादनमपि भविष्यति, धनेन चिं-तितमहोऽस्याकारणवत्सलत्वं! अथवा मुनिजनो दुःखितजंतुवत्सलो भवति, अपि चाकृतोपचारश्चाह-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मस्य सत्कं कथं गृह्णामीति विचिंत्य तेनोक्तं हे भगवन्नहमनुगृहीतोऽस्मि, मम कुशलचिंतनमेव भगवत उपकारः, तपस्विजनानुगृहीतोऽकल्याणं न प्राप्नोति, गृहस्थाश्च प्रमादिनो भवंति, मंत्रदेवताश्चोग्रा भवंति, ततो मम मंत्रेणालं, महेश्वरदत्तेनोक्तं सौम्यदेवतो निष्प्रत्यपायः खल्वेष मंत्रः, धनेनोक्तं तथापि ममानेनालं, महेश्वरदत्तेन चिंतितमहो सार्थवाहपुत्रस्य महानुभावता! निश्चितमनेनाहं नोपलक्षितस्ततोऽकृतोपकारित्वेनोपरोधशीलतयैतं मंत्रं न गृह्णाति, तस्मादात्मानं प्रकाशयामीति विचिंत्य तेनोक्तं हे सार्थवाहपुत्र! तामलिप्त्यां नगर्यां द्यूतकारव्यतिकरविमोचितं महेश्वरदत्तं मां स्मर? तस्मादन्यथाविकल्पेनालं, एतं गृहाण? अन्यथा मम महती पीडा समुत्पद्यत इति. ततस्तस्य वृत्तांतं स्मृत्वैष कृतार्थ इति विचिंत्यैतस्य च महती पीडा भवतीति ज्ञात्वा तदुपरोधभीरुणा धनेन भणितं हे भगवंतो यद्यूयमाज्ञापयत.

ततो महेश्वरदत्तेन मंत्रो दत्तः, धनेन गृहीतः, द्वावपि तपोवनं गतौ, पनसादिभिः फलैः प्राणवृत्तिः कृता, एकदिवसं तत्र स्थितः, अथ महेश्वरदत्तं वंदित्वा तेन च प्रेषितः सन्निजदेशसंमुखं प्रवृत्तः, नारंगादिफलसंपादिताहारश्च प्रयत्नरक्षितरत्नावलिः सन् कालक्रमेण श्रावस्तीं प्राप्तः, तस्यां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च नगर्यां तस्यामेव रात्रौ विचारधवलस्य राज्ञो भांडागारं तस्करैर्मुषितं, तन्निमित्तं च गणिकापति-प्राया नगरीवासिनो लोका अन्ये च कार्पटिकादयो गृह्यंते, मंत्रिपुरतो नीयंते च, तेषां परीक्षां कृत्वा मुच्यंते च. ततः स धन एतां वार्तां श्रुत्वा द्वारादेवान्यतो गछन्नियुक्तपुरुषैर्गृहीतो भणितश्च हे भद्र! त्वं कुतः? तेनोक्तं सुशर्मनगरात्, तैर्भणितं क्व व्रजिष्यसि? तेनोक्तमहमग्रतो गतोऽभूवं, सांप्रतं तदेव पुरं गमिष्यामि, तैरुक्तं त्वया कोपो न कार्यः, अद्य खलु विचारधवलस्य राज्ञो भांडा-गारं कैरपि मुषितं, तन्निमित्तं च कार्पटिका भवद्भिरानयितव्या इति वयं नियुक्तास्तस्मात्त्वमागछ? मंत्रिगृहं व्रजामः; धनेनोक्तं हे भद्रा अहमधुनैवागतः, अहमेतत्कर्मकारो नास्मि, तस्मात्तत्र गतेन किं? तैरुक्तं वयमाज्ञाकारिणस्तस्मादवश्यं गंतव्यमिति. मनसाऽनिछन्नपि मंत्रिगृहं स प्रापितः, मंत्रि-णे दर्शितस्तेन च भणितो हे भद्र! कुतस्त्वं? धनेन तदेव प्रोक्तं, मंत्रिणा भणितं तव पार्श्वे किं पाथेयमस्त्यन्यद्वा? ततस्तेन लोभाज्ञानमोहितमनसोत्तरकालमविचार्य निर्विकल्पेन भणितं, न किंचिद्दर्शनीयमिति, मंत्रिणोक्तं सत्यं कथयेस्तेन भणितं भवत्पुरोऽपि किमन्यथा निवेदयामि? मंत्रिणोक्तं यद्येवं तर्हि गछ? ततो गछंस्तत्रैव भवनांगणे कथंचित्प्रमादाच्त्रुटितेनाश्वशालास्थितवा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नरेण गृहीतः, तस्य वस्त्रं स्फाटितं. अत्रांतरे तमुद्देशमुद्योतयंती सप्तर्षिश्रेणिरिव त्रैलोक्यसारा रत्नावली निपतिता, मंत्रिणा दृष्टा, स मर्कटान्मोचितः, रत्नावली गृहीतोपलक्षिता च, मंत्रिहृदयं चिंताव्याकुलं जातं, निश्चितं राजपुत्र्या अकुशलमन्यथैतस्येयं कुतः? तत एष पृष्टो हे भद्र! तवैषा कुतः? ततो धनेन सलज्जं भणितमहं यानपात्रेण महाकटाहं गतोऽभूवं. तत्र मयैषा क्रीता, आगच्छतश्च मम तद्यानपात्रं भग्नं, तत एतावन्मात्रद्रव्यस्वाम्यहं भगवता दैवेन संपादितोऽस्मि. मंत्रिणोक्तं कदा क्रीता? धनेनोक्तं वर्षमात्रमस्ति, मंत्रिणा चिंतितमस्याः प्रदत्तायास्त्रिमासमात्रः कालः, राजपुत्र्याश्चेतो गताया द्विमासमात्रः कालोऽभूत, एष चैवं जल्पति, तस्मात्कथमेतत? अनेन चषास्माकं पुरो निह्नुता, तस्मादेष खल्वसंबद्धप्रलापी, राज्ञे निवेदयामीति विचिंत्य मंत्रिणा निवेदितं, राजाकुलीभूतः, रत्नावली विलोकिता, भांडागारिकानाकार्य दर्शिता, तैश्चोपलक्षिता, ततो राज्ञा चिंतितमनेन मे पुत्री व्यापादिता मुषिता वा, अन्यथा कथमेवमेतद्युज्यत इति क्रोधाभिभूतेनाप्यत्यंतनयानुसारिणा पुनरपि पृच्छा कृता, धनेन च पुनरपि तदेव प्रोक्तं, ततो राज्ञा पुनरपि रत्नावलिं निरीक्ष्य प्रत्यभिज्ञानेनाधिकतरकुपितेनैतदन्यथा न भवतीति वध्यः समाज्ञप्तः.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततश्च मषीविलिप्तदेहो वाद्यमानविरसडिंडिमोऽपराधस्थापनार्थं च पटलिकास्थापितरत्नावलिवि-
ध्यस्थानं प्रवर्तितः, ततो नीयमानस्य हट्टमार्गविशेषे मांसाभिलाषिणा लावकपक्षिणा मांसमेतदि-
ति ज्ञात्वा रत्नावल्यपहृता, स्वकीयनीडं नीता, धनोऽपि चाधिकतरकुपितै राजपुरुषैः श्मशाने नीतः,
तच्च कीदृशमित्याह—शुष्कवृक्षशाखानिलीनवायसं, जल्पद्वायसकरकरवं, रुदच्छृगालीशब्दभीषणं,
भीषणोषद्दग्धमृतकदुरभिगंधं, मृतश्वानास्थिपंजरसमूहसंयुतं, मांसभक्षकदुष्टलोकप्रीतिजनकमिति.
तत्र लोहितमुखाभिधानं चंडालपाटकपार्श्ववर्तिवनं प्रापितः. ततो राजपुरुषास्तद्वधकचंडालाया-
देशं दत्वा स्वस्थानं गताः, चंडालेन च स्तोकं भूमिभागं नीतो विलोकितश्च, पश्चात्तेन चिंतितम-
होऽनयाकृत्या कथमकार्यकारी भविष्यति? अथवाज्ञाकार्यहं, तस्मान्ममानेन विमर्शेन किं? स्वकी-
यं नियोगं करोमि, ततो यमगंभिकायामुपवेशित इत्थं भणितश्च हे आर्याद्य जीवलोकं सुदृष्टं कु-
रु? एवमवसानश्च तवैष लोकः, अन्याच्चास्माकं श्रावकाः सुहृदः संति, तत्संसर्गतो वयमेकांतक्रूरदृ-
ष्टयो न स्मः, नृपाज्ञा चैवमवश्यं कर्तव्या, अस्माभिर्नरपतिर्विज्ञप्तश्च व्यापाद्यमानः शुभपरिणामो म्रि-
यतामिति, मुहूर्तमात्रमस्माभिस्तस्य वांछितार्थसंपादनं कर्तव्यमिति राज्ञा चास्माकं प्रसादः कृतः, त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्मादार्याज्ञापयतु, तव किं संपाद्यते? धनेन चिंतितमहो चंडालस्य विशिष्टता! अथवा दुःखितजंतुवत्सलः परोपकारतत्परोऽनुकंपारक्त एष न कर्मचंडाल, किंतु जातिचंडालः, सज्जनः खल्वेषोऽकाले च ममैतेन सह दर्शनं, अथवा किमनेन वितर्केण? मम पुरुषचेष्टितस्य कालो गतः, अल्पपुण्यानां वांछितं न संपद्यत इति निःश्वस्य सलज्जेन प्रोक्तं हे भद्र! राजाज्ञां संपादय? किमन्येति, ततोऽदीनभावसूचितमहापुरुषभावोऽत एवानपराधोऽप्येष मया व्यापादयितव्य इति विषण्णेन बाष्पजलभरितलोचनं सगद्गदं चंडालेन भणितो हे आर्य! यद्येवं तर्हीष्टदेवतां स्मर विषादं परित्यज? धर्ममंगीकुरु? तथा स्वर्गाभिमुखं तिष्ठ? ततो जीवलोकं धिगस्तु, परार्थो न संपादित इति विचिंत्य स्वर्गाभिमुखं संस्थितः, चंडालेन यमजिह्वाविकरालो भासुरः करवालो गृहीतः, प्रतीकाराद्बहिर्निःकृष्टः, निजभुजाशिखरे ईषद्वाहितः, तेन भणितं चाहो लोका अनेन किल कथंचिद्राजपुत्रीं वंचयित्वा त्रैलोक्यसारा रत्नावल्यपहृता, अनेनापराधेनैष व्यापाद्यते, तस्माद्यद्यन्योऽपि कश्चिद्राजविरुद्धमासेविष्यति, तमपि राजा सुतीक्ष्णेन दंडेनैवमेव शासयिष्यति, इत्युक्त्वा करवालो वाहितः, कारुण्यशून्यभावतया च प्रहारमदत्वा विमुक्तखड्गश्चंडालो भूमौ निपतितः, धनेन भणितो हे भद्रा-

P.P. Ac. Gunratnasuri M.S.  Jun Gun Aaradhak Trust

नेनासिसंभ्रमेण मे हृदयं मा पीडय? नृपाज्ञां कुरु? त्वं नियोगकारीति. चंडालेनोक्तं हे आर्यसं-पादितोपकारं त्वां प्रहर्तुं न शक्नोमि, तस्मात्तव किमप्यपरं किं संपादयामीत्यार्याज्ञापयतु.

अत्रांतरे राज्ञः प्रथमपुत्रः सुमंगलो नाम, स उद्यानमुपगतो नागेन दष्टः, विषस्योग्रतया स्तोकवेलायामेव प्रणष्टसंज्ञो जातः, नरपतिसमीपमानीतः, गारुडिका आहूतास्त्वरितत्वरितमागता-श्च, तैर्दृष्टः, अहोऽस्य संज्ञा प्रणष्टेति, एते विषण्णाः, मंत्रौषधानि प्रयुक्तानि, तस्य विशेषो न जातः, राजा विषण्णस्तेन चिंतितं पुरुषशक्तयोऽचिंत्याः, कोऽपि सुसिद्धगारुडमंत्रो विषवैद्यः कुमारं जीवय-ति, नान्यः कश्चिदिति, तस्मात्तावत्समंतात्पटहवादकैर्घोषयामि, यथाहोऽद्यैव सुमंगलो नाम राजपुत्र उद्यानमुपगतः सर्पेण दष्टः, यस्तं जीवयति, स यदेव प्रार्थयते, तदेव तस्मै दीयत इति विचिंत्य प-टहवादका आदिष्टास्ते च नगरारामदेवकुलसत्रादिमार्गेषु प्रवृत्ताः. अत्रांतरे एकः पटहवादकस्तमु-द्देशमागतः, धनेन तस्य शब्दः श्रुतो यथा राजपुत्रः सर्पेण दष्टो यस्तं जीवयति स यदेव प्रार्थय-ते तदेव तस्मै दीयत इति. ततः सहर्षेण धनेन चंडालो भणितो हे भद्र! यदि ते निर्बंधस्तर्ह्येत-त्संपादय? तावदेतं सर्पदष्टमहं जीवयामि, पश्चान्मां मारयेरिति. चंडालो हर्षितस्तेन च चिंतितं,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यो मम स्वामिसुतं सकलविषवैद्यपरित्यक्तमपि जीवयिष्यति, तं दाक्षिण्यमहोदधिर्गुणपक्षपाती महाराजः कथं व्यापादयिष्यति? तस्मादेष खलु जीवितः, अथवैष एवं कथं विपद्यते? इति विचिंत्य तेन पटहवादक आहूतः, राजपुरुषाय वृत्तांतः कथितस्तेनोक्तं हे भद्रैष किं सत्यं जल्पति? धनेन प्रोक्तं तावन्मम पन्नगविषापहारी मंत्रोऽस्ति. कार्यसिद्धौ पुनर्दैवं प्रमाणं, एष खलु पुरुषकारस्याविषयः, तथापि तावन्मंत्रशक्तिं पश्यामीति. राजपुरुषेण चिंतितमहोऽस्यावस्था! नो गुर्वालापोऽनुष्ठतश्च, तस्मादेषोऽवश्यं राजपुत्रं जीवयिष्यतीति मोचयित्वा नृपतिसमीपं नीतः, राज्ञे दर्शितः, वृत्तांतः कथितः.

ततस्तं दृष्ट्वा राज्ञा चिंतितमेष खलु महानुभावाकृतिस्तस्मात्कथं परद्रव्यापहारं करिष्यति? अथवा पुनर्विचारयिष्यामि, नैष विचारणायाः समयः, यतो विषस्य विषमा गतिर्मा मे पुत्रस्यात्यधिकं भवत्विति विचिंत्य बाष्पार्द्रलोचनेन तेन राज्ञेषत्परिस्खलद्वचनं भणितो हे भद्र! मम पुत्रं जीवय? ततो धनेनोक्तं हे देव! विषादं मुंच? भगवतो मंत्रस्य सामर्थ्यं विलोकयेत्युक्त्वा मंत्रः स्मृतः, तस्याचिंत्यसामर्थ्यतश्च विकसद्वदनकमलः प्रसुप्त इव सुखनिद्राक्षये कुमार उत्थितः. अत्रांतरे साधुवा-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

दक्कलकलशब्दः सुविस्तृतः, राजा परितुष्टः, तेन हर्षविशेषतः स्वकीयं बहुमूल्यं कटिसूत्रं धनस्य कण्ठ्यां क्षिप्तं, देवीभिश्चाभूषणवृष्टिः कृता, धनेनोक्तं हे महाराजानेन किं? राज्ञा प्रोक्तं हे भद्र! त्वं वद? तवापरं किं संपाद्यतां? धनेन भणितं हे देवानेनालं, इमं पुनर्देवः संपादयतु तस्य वधनियोगकारिणोऽचंडालस्वभावस्य नाम्ना चंडालस्य वांछितो मनोरथः, राज्ञा चिंतितमहोऽस्य गुरुकत्वं! ईदृशविशुद्धसत्वयुक्तो नाकार्यं समाचरति, तस्मात्कः पुनरेषः? एतं पृच्छामि, अथवा तावदेतस्य वांछितं संपादयामि, पुनः प्रक्ष्यामीति विचिंत्य राज्ञा प्रोक्तं चंडालमाकारयत पृच्छत च तस्य को मनोरथः? तदा प्रतीहारो गतः, तेन पृष्टश्चारे खंगिलक! तवोपरि राजा परितुष्टः, अथवा राजपुत्रजीवितदायको विषवैद्यचूडामणिस्तुष्टः, तस्मात्कथय किं ते क्रियतामिति, ततः खंगिलेन चिंतितं सज्जनचरितस्य मूल्यं नास्ति, महानुभावतायाश्चाविषयो नास्तीति विचिंत्य भणितं, हे भद्र! स वैद्येंद्रचूडामणिः किं महाराजेन मुक्तः? तेनोक्तमरे खंगिलात्र कः संदेहः? महाराजः कृतज्ञशेखरभूतोऽस्ति, तस्मात्कथय वांछितं? तदा तेनोक्तं यद्येवं तर्हि देवः प्रसादं करोतु. अस्माकमनया पंडितजनगर्हणीययोभयलोकविरुद्धया जीविकयालमिति. प्रतीहारेणोक्तमरे द्रव्यजातं प्रार्थयस्व? कि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मनेन? खंगिलेनोक्तमतोऽप्यपरं किं द्रव्यजातं? ततस्तत श्रुत्वा प्रतीहारेण राज्ञे तन्निवेदितं, राज्ञा च प्रोक्तमहो तस्य विवेकोऽलोलता च! धनेनोक्तं हे देव! स महानुभावः खलु जातिमात्रचंडाल-स्तस्मादेव एतस्य वांछितं करोतु, राज्ञोक्तं हे भद्रैतत्कृतमेव, इदं पुनस्तस्मै अपरं भद्रः स्वहस्तेन ददातु, एतस्मै दीनारलक्षं, चंडालकुटुंबसहस्रवासिनीं विंध्यवासिनीं पत्तनात्पश्चिमदिशि बाह्यभूमि-मिति. ततो धनेनोक्तं यद्देवो वदतीति प्रतिपद्य राजाज्ञा प्रतिपादिता. खंगिलको द्रव्यलाभेन तथा न तुष्टो यथा धनजीवितेन.

ततो धनमुपचर्य राज्ञा प्रोक्तं हे भद्राचारादेव तव सुकुलजन्म ज्ञातं, अथ भवान् किंनगरवा-सी? किंनामधेयश्चेति ज्ञातुमिच्छामि. ततः परसंबंधिनी रत्नावली, तथाहो मे सुकुलजन्मेति स्मृ-त्वा विमुक्तदीर्घनिःश्वासं लज्जानम्रवदनेन धनेनोक्तं हे देवाकार्यकारिणः कीदृश आचारः? अथ-वा सुकुलस्य चात्र को दोषः? लक्ष्मीनिवासेषु कमलेषु किं कृमयो न संभवंति? अहं जातिमात्रेण वणिगस्मि, न पुनराचारेण, सुशर्मनगरवासी धनाभिधानश्च. ततो राज्ञाहो मे धन्यता यदेतत्पुरुष-रत्नं न विनाशितमिति विचिंत्य भणितं, त्वत्सदृशाः कथमकार्यकारिणो भवंति? तस्मात्परमार्थं क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

थय? त्वयैषा रत्नावली कथं प्राप्तेति. अत्रांतरे च सत्वरं समीपमागत्य महाप्रतीहारिकया विज्ञप्तं हे देवैषा खलु मनोरमाभिधानोद्यानपालिका राजपुत्र्या वचनात्प्रवहणभंगेन वियुक्तपरिजनाया एवं विज्ञपयति. यथा हे देवेतो गछतामस्माकं समुद्रमध्ये तत्क्षणादेव चंडपवनप्रेरितं स्त्रीहृदये गुह्यमिव यानपात्रं स्फुटितं, ततश्च महाराजस्य प्रभावेण तथाविधफलकलाभसंपादितप्राणवृत्तिर्विनयवतीनाम राजपुत्री जीविता, कथंचिन्निजभाग्यैर्नगरीसमीपे संप्राप्ता च, तया मेघवनस्थयाहं प्रेषिता, यथा मम पित्रे एतं वृत्तांतं विज्ञपय? इदं श्रुत्वा देवः प्रमाणमिति.

ततः स राजा संभ्रांतः सन्ननयैव रत्नावलीवृत्तांतमुपलप्स्य इति विचिंत्योत्थितः प्रवृत्तश्च, महता विस्तरेण मेघवनं प्राप्तश्च, स्वपुत्री दृष्टा च, समलंकृतां कृत्वा च श्रावस्तीं प्रवेशिता, रत्नावलीवृत्तांतं पृष्टा च, तया प्रोक्तश्च यथा तस्मिन् प्रवहणभंगदिवसे रत्नावली चूतलतादास्यै मया समर्पिता, तयोत्तरीयवस्त्रबंधनेन संगोपिता च, ततश्च प्रवहणे भग्ने दैववशात्परिजने च वियुक्ते सति तस्याः कीदृशो विपरिणाम इति न जानामि. ततो राजा धनमवलोक्य जजल्प, हे भद्रैषा कथं तव हस्तगोचरं गता? धनेनोक्तं हे देव! समुद्रतीरे स्वयं ग्रहणेनेति, राज्ञा चिंतितं चूतलतिका मृता ज्ञा-

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

यतेऽन्यथा कथं स्वयं ग्रहणं? भणितं च हे भद्र! त्वया तत्र किंचित्कंकालं दृष्टं? धनेनोक्तं देव दृष्टं, अत एव परद्रव्यापहारेणात्मानमकार्यकारिणं मन्ये, राज्ञोक्तं गृहिण ईदृशं परद्रव्यापहरणं नोच्यते, तस्मादतीतवस्तुचिंतनेनालं, त्वं कथय तव किं करोमि? धनेनोक्तं मम कर्तव्यं देवेन कृतं यत्तस्य नियोगकारिणो वांछिताभ्यधिकमनोरथापूरणमिति. राज्ञा प्रोक्तं हे भद्र तेन किं? विमृश्यकार्यकारिणस्तस्यापि तत्खलु स्तोकं, किं पुनर्भवतो जीविताभ्यधिकसुतजीवितदायकस्य? धनेनोक्तं देवदर्शनतोऽप्यपरं किं करणीयं? देवदर्शनतो हे देव मम मनोरथाः संपूर्णा इति. ततो राज्ञाऽमूल्यं स्वकीयमाभरणं दत्वा विश्वासिनरसहायः सुशर्मनगरं प्रेषितः, कतिपयदिवसैर्गिरिस्थलं नाम पत्तनं प्राप्तः, तत्रापि तस्मिन्नेव दिवसे राज्ञश्चंडसेनस्य सर्वसारं नाम भांडागारभवनं केनापि मुषितं, ततो नागरिका नगररक्षकाश्च लोका आकुलीभूताः, चौरा गवेष्यंते, गृहाणां वीथयो मुष्यंते, आगंतुकाः परीक्ष्यंते.

अत्रांतरे च संप्राप्तमात्रा एवेमे राजपुरुषैर्गृहीतास्तैर्भणिताश्च हे भद्रा युष्माभिर्न कोपः कर्तव्यः, वृत्तांतः कथितः, तदा धनादिभिः प्रोक्तं क एष कोपस्यावसरः? आगच्छत यत्र यूयं नयत तव

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्रजाम इति, पंचकुलसमीपं ते नीताः, पंचकुलिकैः पृष्टा यूयं कुतः? तैरुक्तं श्रावस्तीतः, कारणिकै-रुक्तं क्व गमिष्यथ? तैरुक्तं सुशर्मनगरं, कारणिकैः प्रोक्तं किमर्थं? तैरुक्तं नरपतेरादेशादेतं सार्थ-वाहपुत्रं गृहं नेतुं, कारणिकैरुक्तं भवतां किंचिद्द्रव्यजातमस्ति? तैर्भणितमस्ति, कारणिकैरुक्तं किं तत्? तैर्भणितमस्य सार्थवाहपुत्रस्य नरपतिप्रदत्तं राजालंकरणं, कारणिकैरुक्तं पश्यामः कीदृशं? ततः शुद्धचित्ततया तैर्दर्शितं, भांडागारिकैरुपलक्षितं, तैर्भणितं चैतदपि महाराजसत्कमेव कालांतरा-पहृतं राजालंकरणं. ततस्ते सर्वे क्षोभं प्राप्ताः, पंचकुलेन पृष्टाश्च हे भद्राः सत्यं कथयत भवतामेत-त्कुतः? तैरुक्तं भवतां किमन्यथा निवेद्यते? ततः कारणिकैरेष वृत्तांतश्चंडसेनाय राज्ञे निवेदितः, राज्ञा च स एव श्रावस्तीनृपो ममैवं सर्वं चौर्यं कारयतीति कथयित्वा ते सर्वेऽपि कारागृहं प्रापिताः, एषां पार्श्वात्सर्वोऽर्थो ग्राह्य इति प्रयत्नेन रक्षिताः, तत्र च परमदुःखिताः संतो यावत्कतिचिद्दिनानि परिवसंति, तावत्तत्रैव राजपुरुषैः परिव्राजकवेषधारी रात्रौ परिभ्रमंश्चौरितद्रव्यसहित एवैकः पुरुषो गृहीतः, ततो मंत्रिसमीपं नीतः, मंत्रिणा चायं लिंगधारी चौर्यमपि करोति, तर्हि तस्यान्यदप्यकर-णीयं नास्तीति विचार्य मारणाज्ञा दत्ता.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजपुरुषैस्तृणमषीगैरिकभूतिविलिप्तसर्वांगः कोसिकमालाभूषितग्रवो विगतवस्त्रो लंबमानकण-वीरदामभासुरमस्तकोपरिभागो जीर्णसूर्पखंडकृतछत्र उद्भटरासभारूढो वध्यडिंडिमशब्दमेलितबहुज-नपरिवृतो नगराद्बहिर्दक्षिणदिशि भयंकरं शोचनीयं वध्यस्थानं नीतः, तदा स चौरः सुदीर्घं निः-श्वस्य सलज्जं जनसमूहं प्रेक्ष्य च चिंतितवान्, मुनिवचनं कथमसत्यं भवति? इदानीमपि ममेदं कर्तुं न युक्तं, यस्य यद् द्रव्यं गृहीतं तत्सर्वं भूमिगतं तस्मै कथयामि, मम तेन किमिति विचिंत्य तेन नरनाथसत्काः पुरुषा भणिता इदं स्थानं मां विना केनापि न मुषितं, नवरं तत्सर्वमपि द्रव्य-मत्रैव स्थाने आरामशून्यदेवकुलगिरिनदीतीरेषु भूमिगतं तिष्ठति, यूयं तद् द्रव्यं गृहीत्वा यद्यस्य तत्तस्मै जनायार्पयत? मया सर्वेभ्यः प्रोक्तमस्ति, पश्चान्मां मारयत? ततो यद्यदा यतो गृहीतं, यत्र देवकुलादौ तिष्ठति च तत्सर्वं साभिज्ञानं प्रोक्तं. ततस्तैरपि गत्वैतत्सर्वं मंत्रिणे कथितं, तेनापि च विश्वासिनरैस्तद्द्रव्यमानायितं, यद्यस्मिन् यस्मिन् स्थाने कथितं, तत्पूर्वगृहीतराजालंकारद्रव्येण स-हितं सर्वं दृष्टं च, तद् द्रव्यं पश्यतश्च मंत्रिणश्चिंता समुत्पन्ना, पूर्वगृहीतपुरुषैस्तद्राजालंकारद्रव्यं क-थमप्यन्यथा प्राप्तमिति. एवं विचिंत्य स परिव्राजकरूपधारी भुजंगः करुणां प्राप्तेन मंत्रिणा समाहूय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सविनयं भणितोऽहो वेषस्वभावविरुद्धेन तव चरितेन मम विस्मयोऽस्ति, तस्मात्प्रकटार्थमपरस्य विरुद्धमेतत्किं? त्वं कथय? एवं च भणिते एव परिव्राजकेनोक्तं विषयलुब्धानां खल्वपरस्याविरुद्धं नास्ति, अपि च—जणणिजणयाण सुकयं । ण गणंति ण बंधुमित्तसामीणं ॥ विसयविसमोहियमणा । पुरिसा परलोयमग्गं च ॥ १ ॥ अयमर्थः—विषयविषेण मोहितं मूर्छितं मनो येषां ते, ईदृशाः पुरुषा जननीजनकानां सुकृतं न गणयंति, तथा बंधुमित्रस्वामिनां सुकृतमुपकारादिकं च, पुनः परलोकमार्गं न गणयंतीति. एवं चोक्तमात्रे मंत्रिणा भणितं विज्ञानवर्जितानामेतद्युज्यते, न पुनर्भवत्सदृशानां, तस्मात्सत्यं परधनग्रहणस्य कारणं मह्यं कथय? अथवा किं बहुना? लज्जां मुक्त्वा सर्वेभ्यः कथय? एवं च भणिते सति परिव्राजकेनोक्तं यस्त्वया मम वृत्तांतः पृष्टस्तं यथावधिज्ञानिना प्रोक्तं तथा स्फुटार्थं कथयामि, त्वं सावधानमनाः सन् शृणु?—

इहैव भरते पुंड्रो नाम देशोऽस्ति, तत्रामरावतीसदृशं पुंड्रवर्धनं नाम नगरं, तत्राग्निवेश्यायनगोत्रीयः सोमदेवो नाम ब्राह्मणः, तस्य पुत्रो नारायणाभिधानोऽहं तस्मिन्नगरे जीवघातेन स्वर्गा इति कुशास्त्रं प्ररूपयंस्तिष्ठामि, यावत्केचित्पुरुषाः समंततश्चपलाक्षं प्रलोकमानाश्चौरा अमीति ज्ञा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वा वध्या नीयंते, तांश्च दृष्ट्वा मया प्रोक्तमेतान् महाभुजंगान् घातयत? ततस्तन्मम वचनं श्रुत्वैके-
न समुत्पन्नावधिज्ञानिना मुनिना नातिदूरे स्थिते नैवाहोऽज्ञानं कष्टमिति जल्पितं, तच्च साधुवचनं
शृण्वतो मम चिंता समुत्पन्ना, एतेन प्रशांतरूपेणापि मामुद्दिश्य किमेतज्जल्पितमिति, ततो मया
पादयोर्निपत्य स पृष्टो हे भगवन्! किमज्ञानं? तेनोक्तं सर्वसत्वेभ्योऽसद्दोषदानं, विरुद्धोपदेशश्च,
मयोक्तं किमसद्दोषदानं? को वा विरुद्धोपदेशः? साधुनोक्तं यदेतत्पूर्वकर्मपरिणतिवशेन कष्टप्राप्ते
निरपराधेऽपि महाभुजंग इति वदसि, एतदसद्दोषदानं, यतः परपीडाकरं सत्यमपि न वक्तव्यमिति.
एष च भवतां श्रुतिरस्ति—चौरस्य चौरकथनेन सत्पदाभिधाने तत्तुल्यदोषता, अचौरस्य चौरकथ-
नेन मिथ्याभिधाने तु द्विगुणो दोष इति. यत्पुनर्जीवघातेन स्वर्ग इति प्ररूपयसि, एष विरुद्धोप-
देशो यतो जीवघातः परलोके शुभफलप्रदो न भवति, सर्वैस्तीर्थनायकैरुक्तं च न हंतव्यानि सर्व-
भूतानि, अथवा—जो कोहेणाभिभूओ। घायइ जीवे सया निरणुकंपो॥ सो भवचारगवासं। पुणो
पुणो पावए बहुसो॥ १॥ अपि च—जन्मांतरे दत्तस्य चासद्दोषस्य त्वमत्रैव जन्मनि स्तोकदिव-
सैः फलशेषं प्राप्स्यसि, मयोक्तं हे भगवन्! जन्मांतरे मया दत्तोऽसद्दोषः कीदृशः? कीदृशं वा त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्य फलं मयानुभूतं? कीदृशं वा फलशेषं? साधुना प्रोक्तं हे वत्स! शृणु?—

इहैव भारते क्षेत्रे उत्तरापथविषये गर्जनकं नाम पत्तनमस्ति, तत्राषाढो नाम ब्राह्मणस्तस्य रुखुया नाम भार्या, तयोरितोऽतीते पंचमे भवे त्वं चंद्रदेवाभिधानः पुत्र आसीः, आषाढेन वेदाध्ययनं कारितः, शास्त्राणि श्रावितः, तव विद्याभिमानः समुत्पन्नः, गजनकपुरस्वामिनो वीरसेनस्य समीपे स्थितः, तेन संपूजितः, जीवनवृत्तिर्दत्ता, राज्ञा बहुमन्यते, कोऽपि कालोऽतिक्रांतः. अन्यदा च तस्मिन्नेव नगरे परिव्राजकभक्ता विनीतश्रेष्टिनः पुत्री बालविधवा वीरमतीनाम्नी, सा स्त्रीणामविवेकबहुलतया मोहस्य दुर्जेयतया विषयाणामभिलषणीयतया यौवनस्य विकारकुलगृहतया निजकुलस्यापेक्षामकृत्वोत्तरकालमनालोच्य तन्नगरवास्तव्यसिंहलाभिधानमालाकारेण सह प्रोषिता. इतश्च तस्मिन्नेव दिवसे तस्या वीरमत्या एव पूजनीयः स्वमताचारपरिपालने रक्तो योगात्माभिधानः परिव्राजको निःसंगतया परिव्राजकानां कथनीयकार्याभावेन च कमप्यनापृच्छ्य स्थानेश्वरं ग्रामं गत इति, अहो वीरमती केनचित्सह प्रोषितेति लोकवादश्च जातः, त्वया च परिव्राजकगमनं विज्ञातं. ततो मनःपरिणामस्याशुद्धतया जंतूनां विचित्रचरित्रतया च ते चिंता समुत्पन्ना, निश्चितं सा यो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गात्मना सार्धं प्रोषिता भविष्यति. अन्यदा राजकुले वार्ता प्रवृत्ता, यथा विनीतश्रेष्टिनः पुत्री न ज्ञायते क्व प्रोषितेति.

ततस्त्वया शास्त्राचारं त्यक्त्वा नीचलोकमार्गमवलंब्यात्मनो लाघवमविचार्यैवं जल्पितं, किमत्र ज्ञातव्यमहं जानामि, राज्ञोक्तं कथं? त्वया कथितं योगात्मना सार्धं प्रोषितेति. राज्ञा भणितं परित्यक्तनिजकलत्रारंभः खलु स भगवान्, त्वयोक्तमत एव परकलत्राणि प्रार्थयते, हे महाराजैते पाखंडिन एवंविधा एव, एषु परमार्थबुद्धिर्न कर्तव्येति, एतच्च श्रुत्वा केचित्प्राणिनो धर्मभ्रष्टा जाताः, शेषपरिव्राजकैः श्रवणपरंपरयेदं श्रुत्वा योगात्मा स्वपंक्तिबाह्यः कृतः, तस्य स्वपक्षपरपक्षैः प्रायो विडंबना जाता. एवंविधमिथ्यापरिणामवर्तिना त्वया तीव्रं कर्म बद्धं, कोऽपि कालोऽतिक्रांतः, अथायुः परिक्षीणं, तत आरंभस्यापरित्यक्ततयाऽशेषकालस्य मायाबहुलतया धर्मस्यानासेवनया कर्मपरिणतीनां विचित्रतया मृतः सन् कोल्लाकसन्निवेशे एडकतया समुत्पन्न इति, कोऽपि कालोऽतिक्रांतः, तत्कर्मदोषेण तव जिह्वा शटिता, महावेदनया गृहीतः, स्तोककालेनैव ते आयुः क्षीणं, ततो मृत्वा तत्कर्मशेषतया कोल्लाकसन्निवेशाटव्यामेव शृगालतया समुत्पन्न इति, तत्रापि च तत्कर्मप्रेरणया त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

थाविधफलजक्षणेन ते जिह्वा शटिता, कोऽपि कालोऽतिक्रांतः, ततो मृत्वा तत्कर्मशेषतयैव साकेत-नगराधीशनरपतिविलासिन्या मदनलताभिधानायाः पुत्रत्वेनोत्पन्नः, यौवनं प्राप्तः, राज्ञो वल्लभो जातः, अन्यदा तत्कर्मदोषत एव सुरापानमत्तेन त्वया नृपजननी कार्यं विनाप्यत्यंतमाक्रुष्टा, राजपुत्रेणैष वृत्तांतः श्रुतः, तेन वारितः, ततस्तमप्याक्रोष्टुं त्वं प्रवृत्तः, तदा कुपितेन राज्ञा तव जिह्वा छेदिता, मदो व्यपगतः, आत्मनो वृत्तांतेन लज्जितोऽनशनमंगीकृतवान्, मासमात्रेण कालेन प्राणैर्विमुक्तः, अत्र पुंड्रवर्धने पुरे ब्राह्मणपुत्रतया समुत्पन्नश्चेति. एतत्त्वयानुभूतं. तत एतत् शृण्वतो मम संवेगः समुत्पन्नः, भवविरागो जातः, मया चिंतितमहो प्रमादचरितस्य दुःखहेतुत्वं! साधुः पृष्टो हे भगवन्! फलशेषं कीदृशं? ततस्तेनातिशयज्ञानिना विशेषेणेदमवलोक्य सकरुणेन भणितं हे वत्साविवेकिजनयोग्या सर्वलोके विडंबना शेषमिति.

ततः समुत्पन्नवैराग्येण मुनिवचनभीतेन मया सुगृहीतनामगुरुसमीपे प्रव्रज्यामंगीकृता, कोऽपि कालोऽतिक्रांतः, गुरुदेवलोकगमनकाले गुरुसमीपात्तालोद्घाटिनीगगनगामिन्यौ द्वे महाविद्ये च प्राप्ते, गुरुणा भणितोऽस्मि, हे वत्सैते विद्ये धर्मकायपरिपालनार्थं कथमपि महाकष्टकाले एव त्वया

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

प्रयोक्तव्ये, न पुनः सदाऽसारविषयसुखसाधनार्थमिति. अन्यच्चैते विद्ये धारयता त्वया परिहासेना-
प्यसत्यं न जल्पनीयं, प्रमादतो जल्पिते सति तत्क्षणमेव नाभिप्रमाणविमलजलगतेनोर्ध्वबाहुना-
ऽनिमिषलोचनेनैताभ्यामेवाष्टाधिकसहस्रेण जापो दातव्य इति. ततो मया पापमोहितमनसा साधु-
निषिद्धमायावशवर्तिनाऽविद्यानुरागप्रेरितेन गुरुवचनप्रतिकूलमिहलोकपरलोकमार्गविरुद्धं सर्वमिद-
मनुष्ठितं, गतदिने संध्यायामसंप्राप्तायां स्वस्थानकनिकटवर्तिन्यारामे बकुलवृक्षतलगतेन मया प्रमा-
दतस्तरुणस्त्रीजनपृष्टेनापरिहासस्वभावेनापि परिहासेनोभयलोकविरुद्धमसत्यवचनं च जल्पितं. मं-
त्रिणोक्तं किं जल्पितं? परिव्राजकेनोक्तं गतदिने तत्क्षणकृतजलावगाहनाभिर्मठदेवतादर्शनार्थमा-
गताभिर्मधुरपरिस्खलद्वचनाभिः सविलासोद्भ्रांतप्रेक्षणशीलाभिस्तरुणस्त्रीभिरहं पृष्टो हे भगवंस्त्वं त-
रुण एव जीवलोकसारभूतं जन्मांतरेऽपि तपस्विजनप्रार्थनीयं हरिहरब्रह्मप्रमुखदेववरैः सेवितं सकल-
लोकश्लाघनीयं विषयसुखं त्यक्त्वेममीदृशं दुष्करं व्रतविशेषं किमर्थं प्रपन्नः? ततो मया तासां हृद-
यगतं परिहासगर्भितं भावं विज्ञाय विमुक्तदीर्घनिःश्वासं कालानुरूपमसत्यमेव जल्पितं, यथा हृद-
यानुकूलप्रियतमाविरहसंतापपीडितेनेदमीदृशं दुष्करं व्रतमंगीकृतं, इदं वचनं जल्पित्वा च प्रमादत

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एव गुरुजनोपदिष्टो जापो न कृतः, अकृतजापश्च व्यसनवशगोऽपि सन्नर्धरात्रसमये जाते भुवनप्रदीपे चंडेऽस्तमिते नागरलोकसमूहे च प्रसुप्ते सति तमोदुःसंचरेषु राजमार्गेषु कथं कथमपि गत्वाऽकृतप्रतिद्वारपिधानं सागरश्रेष्ठिगृहं प्रविष्टः, ततो गृहीतसुवर्णरूप्यभांडः सागरश्रेष्ठिगृहान्निर्गच्छन्नेवाकर्णितपुरुषपदसंचारो विद्यानुस्मरणे दत्तोपयोगः स्खलितविद्याकाशगमनोऽत एव संप्राप्तदीनभावो विषमभयवशपलायमानः कुंतकरवालव्यापृताग्रहस्तै रणतूररवापूरितदिक्चक्रैरितस्ततस्त्वरितं धावद्भी राजपुरुषैर्गृहीतः, अतःपरं मदीयो वृत्तांतस्तवावगत एव. संप्रति त्वं प्रमाणमिति भणित्वा परिव्राजकस्तूष्णीकः स्थितः, मंत्रिणा प्रोक्तं हे भगवन्नेकदिवसेऽपहृतो राजालंकारः पुनः कथं नास्ति? तेनोक्तं श्रावस्तीस्वामिने दत्तं, मंत्रिणा प्रोक्तं किमर्थं? तेन भणितं शृणु?—

श्रावस्तीनगरनिवासी जीवितादप्यभ्यधिको गंधर्वदत्तो नाम मम वयस्योऽस्ति, तेन तन्नगरीवासिन इंद्रदत्ताभिधानस्य महतः श्रेष्ठिनः पुत्री वासवदत्ता नाम कन्यकान्यस्मै दत्ताप्यतिस्नेहवशतो विवाहमहोत्सवे विद्यमाने यौवनाभिमानिनान्यथाप्यात्मनो विनाशमालोच्य पुरुषकारमवलंब्यापहृत्य परिणीता. एतद्व्यतिकरे रुष्टेन राज्ञा वासवदत्तापहृता, स नगरीतो निष्कासितश्च मम समीपमा-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

गतो जीविकनाममित्रसहितः, मया चागमनप्रयोजनं पृष्टः, तेन च कथितं. ततो मया तमनुपृच्छ्य राजालंकारसहितो जीविको नरेंद्रप्रसन्नीकरणार्थं प्रेषितः, स च श्रावस्तीं गतः, तेनालंकारदर्शनपूर्वकमेतद्व्यतिकरेण राजा विज्ञप्तः, राज्ञा तस्य प्रसादः कृतः, गंधर्वदत्तस्य श्रावस्तीप्रवेशनिमित्तं महांतः पुरुषाः प्रेषिताः, तैरानीतो राज्ञा महाविभूत्या प्रवेशितः, जननीजनकप्रमुखपरिकरेण च दृष्टः, तेन कंठगतप्राणा वासवदत्ता प्रापिता, तस्मादेतन्निमित्तं दत्त इति. मंत्रिणोक्तं सम्यक्कृतं, सत्पुरुषा मित्रकार्यवत्सला एव भवंति, अथ निर्दोषाः खल्वेते पूर्वगृहीता इति विचिंत्य धनादयो मोचिताः, हे भगवंस्त्वयापि स्वविवेकयोग्यमाचरणीयमित्युक्त्वा परिव्राजको विसर्जितः, धनोऽपि च तान् राजपुरुषान् श्रावस्तीं संप्रेष्य स्वयं समुद्रतीरसंस्थितं वैराटं नाम नगरंप्रति प्रवृत्तः, कथानकविशेषेण पद्मावतीमटवीं प्राप्तः, तस्यामपि च कतिपयकार्पटिकपरिवृतस्य धनस्यैकस्मिन् विभागे वनगजेंद्रयूथमुक्तितं, कार्पटिकाः प्रतिदिशं प्रणष्टाः, धनकुमारपृष्टे गजकलभो धावितः, तेनैष गृहीतो धरणीतलोपरि पातितः, दैवयोगेन धनो न व्यापादितः, तत उपर्युत्क्षिप्य दंतमुशलाभ्यां गृहीष्यामीति विचिंत्य शुंडया गृहीतः, उपरि क्षिप्तश्च, उपरि निकटवर्तिन्यां वटशाखायां धनो विलग्नः. इतश्च तदन्य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गजकलभपीडितया करेणुकया रसितं, ततस्तं धनं मुक्त्वा गजकलभः पश्चाद्वलितः, धनो वटशिख-
रमारूढः, तत्र च तेन नीडे लावकपक्षिविमुक्ता त्रैलोक्यसारा रत्नावली दृष्टा, उपलक्षिता गृहीता
च, तेन चिंतितं च यदि गजोपद्रवाच्छुटामि तर्ह्येतां परमोपकारिणे श्रावस्तीनरपतये प्रापयामि, प-
श्चाद्यथाचिंतितं करिष्यामीति विचिंत्य कांचिद्वसतिं संप्राप्तः.

इतश्च तैः पुरुषैः श्रावस्तीं गत्वा राज्ञे वृत्तांतो निवेदितः, राजा तेभ्यः कुपितोऽहो यूयमबु-
द्धिका यत्तथाविधं पुरुषरत्नं तथैकाकिनं मुक्त्वागता इति, तस्माद्भवतामेष दंडस्तमेवागृहीत्वा युष्मा-
भिः श्रावस्त्यां न प्रवेशः कर्तव्य इत्युक्त्वा नगरीतो निष्कासितास्ते धनं गवेषयितुं लग्नाः, तैश्च प्रि-
यमेलकाभिधाने सन्निवेशे स दृष्टः, एभिर्वृत्तांतोऽस्मै कथितोऽनेनापि च तेभ्यः, ततः कतिपयदिव-
सैः श्रावस्तीं प्राप्ताः, नरपतिर्दृष्टः हृदयेन परितुष्टः, नरपतये वृत्तांतः कथितो हे देवानेन प्रकारेण
रत्नावली लब्धा, दर्शिता च, राजा विस्मितोऽहो कार्यपरिणतीनां विचित्रतेति विचिंत्य तेन भणितं
हे भद्रैषा मया तुभ्यमेव दत्ता, मम प्रार्थनाभंगो न कर्तव्यः, अथवैतद्राज्यमपि तव साधारणमेव,
किं दीयत इति. ततः कतिपयदिनेष्वतिक्रांतेषु महांतं सार्थं कृत्वा विचित्रं भांडं भृत्वा नानामणि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रत्नसारं बहुमूल्यमाभरणं दत्वोचितवणिग्वेषेण धनः सुशर्मनगरं प्रेषितः, कालक्रमेण तत्र प्राप्तः, जनेन विज्ञातः, तस्य गुरुजनः परितुष्टो नगराभिमुखावनौ निर्गतः, संमुखमागताभ्यां मातापितृभ्यां दृष्टश्च, तयोश्चरणेषु धनो निपतितः, ताभ्यामभिनंदितः, सर्वदेवगृहेषु पूजा कृता, महादानं दत्तं, महोत्सवेन पुरमध्ये प्रवेशितः, एकांते धनश्रीवृत्तांतः पृष्टः, तेन प्रोक्तः, जननीजनकौ विस्मयं प्राप्तौ, ताभ्यां भणितश्च हे वत्स! तयालं, सा पापकर्मा खलु भवतोऽनुचिता, कल्पवृक्षे कपिकच्छूवल्लिर्न शोभते, तस्मात्तव समानरूपकुलविभवस्वभावामन्यां कन्यां गवेषयावस्त्वयात्र न संतापः कार्य, तेनोक्तमत्र संतापस्य कोऽवसरः? ईदृशः खलु संसारस्वभावः, ताभ्यां प्रोक्तं, साधु साधु महापुरुषः खलु त्वं, तस्मादत्रापरं किं भण्यते? ततस्तस्य मातृपितृभ्यां धनदेवयक्षस्य महिमा कृतः, धनः स्निग्धमित्रैः सह निर्गतः, यक्षः पूजितः, याचकजनप्रतिपत्तिः कृता, भोजनानंतरसमये तदासन्नमेव सिद्धार्थनामोद्यानं गतः.

तत्राशोकवृक्षतलगत ईर्यादिपंचसमितियुक्तो मनोवाकायगुप्तो गुप्तेंद्रियो गुप्तब्रह्मचार्यममोऽकिंचनो निरुपलेपः, किं बहुना? अष्टादशशीलांगसहस्रधार्यनेकसाधुपरिवृतो यशोधरो नाम कोशला-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धिपविनयंधरराजस्य पुत्रः श्रमणसिंहो दृष्टः, तं च पश्यतस्तस्य प्रमोदः समुत्पन्नः, धर्मोद्यमो विजृंभितः, अनेन चिंतितं चाहोऽस्य रूपमहो चरितमहोऽस्य दीप्तिरहो सौम्यताहोऽस्य पुरुषकारोऽहो मार्दवमहोऽस्य लावण्यमहो विषयविरक्तताहोऽस्य यौवनमहो कामविजयश्चेति, तस्मादेष खलु धन्यो दृष्टव्यः पर्युपासनीयश्चेति विचिंत्य तस्य समीपं गतः, अनेन भगवान् यशोधरः शेषसाधवश्च वंदिताः, गुरुणा शेषसाधुभिश्चास्मै धर्मलाभो दत्तः, गुरुपादमूले उपविष्टः, तेन प्रोक्तं च हे भगवन्! किं पुनस्ते निर्वेदकारणं? येन त्वं कामसदृशरूपः सन् विषयसुखं परित्यज्य प्रव्रज्यां प्रपन्नोऽसि, यशोधरेणोक्तमेकांतनिर्वेदकुलगृहात्संसारादपि किमपरं निर्वेदकारणं? धनेनोक्तं हे भगवन्! सकलजनसाधारणः खल्वेष संसारः, अतो विशेषकारणं पृच्छामि, यशोधरेणोक्तं विशेषोऽपि सामान्यमध्यगत एव, तथापि निजकमेव मे चरितं निर्वेदकारणं, धनेनोक्तं भगवाननुग्रहं करोतु, अस्माकमपि निर्वेदकारणं निजकचरितं कथयतु, ततः कल्याणाकृतिः प्रशांतरूपश्चैष कदाचिन्निर्वेदमुपगच्छतीति विचिंत्य यशोधरेणोक्तं हे सौम्य! यद्येवं तर्हि शृणु?—

इहैव भरतक्षेत्रे विशाला नाम नगर्यस्ति, तत्रामरदत्तो नाम राजाभवत्, इतश्चातीते नवमे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भवे तस्य पुत्रः सुरेंडदत्तो नामाहमासं, मम माता च यशोधरा, भार्या च नयनावली, तातश्च म-
ह्यं राज्यं दत्वा श्रमणत्वमंगीकृतवान्. अहमपि संप्राप्तसम्यक्त्वो नयनावलीस्नेहमोहितमना राज्यसंयु-
क्तं विषयसुखमनुभवंस्तिष्ठामि, यावदागतो मम पलितछलेन धर्मदूतः, सारसिकाभिधानया नयनाव-
लीदास्या निवेदितः, ततो मे निर्वेदः समुत्पन्नः, मया चिंतितमहो जीवलोकस्य चंचलता! अहो
पुद्गलानां परिणामः! अहो मनुष्यत्वमसारं! अहो महामोहः प्रभवति, अपि च—दिवसनिसाघ-
डिमालं । आउयसलिलं जणस्स घेत्तूण ॥ चंदाइच्चबइल्ला । कालरहट्टं भमाडंति ॥ १ ॥ खीणे
आउयसलिले । परिसुस्संतिंमि देहसस्संमि ॥ णहि हु कोवि उवाओ । तहवि जणो पावमायरति
॥ २ ॥ तस्मान्मम प्रमादेनालं, पूर्वपुरुषसेवितं श्रमणत्वं प्रव्रजामि, अयं निजकाभिप्रायो नयनाव-
ल्यै कथितः, तया च प्रोक्तं हे आर्यपुत्र! यद्युष्मभ्यं रोचते, अहं खल्वार्यपुत्रस्य प्रतिकूलकारिणी
नास्मि, अपि च यत्त्वं प्रव्रजिष्यस्यहमपि तदेवेत्यार्यपुत्रस्य निवेदितमेव. ततो मया चिंतितमहो
देव्या ममोपरि तीव्रानुरागताहो महार्थत्वमहो विवेकोऽहो छंदानुवर्तनमहो समसुखदुःखताहो चित्त-
शुद्धताहो एकसारतेति. अत्रांतरे मंगलपाठकैर्मे कालो निवेदितस्तथाहि—हे महाराज! दिवाक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र उदयं संप्राप्य क्रमेण प्रतापं परावर्त्य च भुवनमुद्योत्य सांप्रतमस्तमेतीति. ततो मया चिंतितं जीवलोकं धिगस्तु, एतस्य दिनकरस्याप्येकस्मिन्नेव दिने इयत्योऽवस्था इति. ततोऽहं सभामंडपे कंचित्कालं गमयित्वा चंद्रज्योत्स्नामंडितभुवने उद्दामकामिनीजनविजृंभितमदनप्रसरे च रजनीमुखे वासगृहं गतः, कीदृशं तदित्याह—

विकीर्णमणिरत्नमंगलप्रदीपसहितं, रत्नखचितगृहांगणविमुक्तवरसुरभिकुसुमप्रकरं, सांद्रकस्तूरिकाविलिप्तविमलमणिभित्तिकं, प्रवरनिर्मलकनकस्तंभं, उज्ज्वलविचित्रविरचितवितानकं, परिपक्वविद्रुमपादपघटितपल्यंकसनाथं, आस्तृतवरतूलिकास्थापितगंडोपधानकं, विमलस्वर्णमयोपनीतमनोहरपतद्ग्रहं, उल्लंबितसुरभिकुसुममाल्यनिकरं, कनकमयमघमघायमानधूपघटिकाकुलं, प्रज्ज्वलिताव्यक्तधूमवर्तिसमूहं, चपलकलहंसपारापातमिथुनशोभितं, विरचितकर्पूरबीटकसहितताम्बूलपटलकं, वर्तितविलेपनपूर्णविविधगात्राकस्थापितमणिमयवृत्तभाजनं, सुरभिपटवासभरितमनोहरोपनीतकनककच्चोलकं, वरवारुणीसुरभिकुसुमसंपादितमदनपूजं, रत्येव सपरिवारया नयनावल्या समाश्रित इति. ईदृशे वासगृहे पल्यंकेऽहमुपविष्टः, देवीपरिजनः कंचित्कालं गमयित्वा निर्गतः, स्तोकवेलायामेव देवी प्रसु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सा, अहं च विषयसुखविमुखचित्तोऽपि स्नेहानुरागतो देवी परित्यक्तव्या, एतावन्मात्रमत्र दुष्करमिति चिंतयंस्तिष्ठामि, यावत्सा देवी नरपतिः प्रसुप्त इति मन्यमाना पर्य्यंकं मुक्त्वांगणतलमवतीर्णा, सशंका च द्वारमुद्घाट्य वासगृहान्निर्गता, ततो मया चिंतितमेषाऽवेलायां द्वारमुद्घाट्य किं पुनर्निर्गता? निश्चितं मम भाविवियोगकातरा देहत्यागं करिष्यति. ततोऽहं खड्गरत्नं गृहीत्वा तस्याः पृष्ठतो निर्गतः, सा च प्रासादपालस्य कुब्जकस्य समीपं गता, तया सुप्तः कुब्जक उत्थापितः, ततो मया चिंतितं निश्चयतोऽस्मै कथयित्वा यथाचिंतितं करिष्यति. अत्रांतरे घूर्णनेत्रेण कुब्जकेन प्रोक्तमद्य त्वमेतावत्या वेलायाः कथमागता? ततो मया चिंतितं हा किमयमद्येति संलपति? अथवास्यां वेलायां देव्यागमनमनुचितमत एवं वदतीति, भवतु प्रतिवचनं शृणोमि, ततो देव्या भणितं विषमस्वभावो राजाद्य खलु बहुकालात्प्रसुप्तोऽत एव कालक्षेपः, ततो मया चिंतितं हा किमेतत्? अत्रांतरे कठिनहस्तेन तेनागुरुधूमपरिमलगर्भिते केशपाशे देवी गृहीता, ततस्तेन समदं शीत्कारमनोहरं च देवी पातिता, तस्य च मम च मदनकोपानलसंधुक्षणं, तया सह मोहचेष्टितं विजृंभितं, तेनालिंगिता, चलत्तारकं तस्या वदनं च चुंबितं, एतं च गवाक्षप्रविष्टचंद्रप्रकाशभासितं व्यतिकरं

P.P. Ac. Gunratnasuri M.S.	Jun Gun Aaradhak Trust

पश्यतो मम मनस्यविवेकपवनसंधुक्षितः कोपानलः प्रज्ज्वलितः, तमालदलनीलः करवालो मया कर्षितः, चिंतितं चैतौ द्वावपि पापौ व्यापादयामीति.

ततः किरणावलीभासुरं तमेव खड्गं ज्वलंतमिव प्रेक्षमाणस्य ममाविवेकांधकारेणेषत्प्रणष्टं, मे चिंता च जाता, येन मया परचक्रगजघटाविदारणलालसा नरेंद्रकेसरिणो विनिपातिताः, सोऽहमिमं पुरुषेषु श्वानतुल्यमकार्याचरणविनष्टशीलजीवितामिमां देवीं च कथं व्यापादयामि? अन्यच्चानया सार्धं मया विश्वस्तं जल्पितं क्रीडितं च, आबालभावतः स्नेहसारमियं भुक्ता, आत्मना तुल्यो गुणधराख्यः पुत्रश्च जनितस्तस्मादनया किं? स्त्री प्रायोऽविवेकबहुलैव भवति, अहं च श्रमणत्वमंगीकर्तुमुद्यतोऽस्मि, एवं च कृते गुणधरकुमारस्यापि लाघवभवनेन प्रस्तुतकार्यविघात इति, अहो मेऽसदृग्व्यवसाय इति लज्जितेन तत्क्षणमेव खड्गः कोशे निक्षिप्तः, मम मनश्च देवीतो विरक्तं, धर्मव्यवसाय उपस्थितः, अहं वासगृहं गतः, शय्यायां सुप्तश्चिंतितुं प्रवृत्तोऽहो महिला नामाभूमिर्विषलता, अनभिरलातं, अभोजना विसूचिका, अनामको व्याधिः, सचेतना मूर्छा, अनुपसर्गा मारिः, अनिगडा गुप्तिः, अरज्जुकः पाशः, अहेतुको मृत्युरिति. अथवा किमनया चिंतया? एष संसार ईदृ-

श एव, अत एव श्रमणत्वमंगीकुर्वे, एवं यावच्छुभपरिणामः सन् कंचित्कालं तिष्ठामि, तावद्देव्यागता, मया प्रसुप्तचेष्टितं कृतं, मम समीपे प्रसुप्ता च, कंचित्कालं स्थिता, तयाहं समालिंगितः, मयाप्यात्मनो विकारमदर्शयता पूर्वमिव बहुमानविषयीकृता. अत्रांतरे प्राभातिकवाद्यानि प्रहतानि, कालनिवेदकेन पठितं च—

एषा रजनी व्रजति । विमुक्ततमःकेशिका विवर्णमुखी ॥ पानीयं दातुं वा । परलोकगताय सूराय ॥ १ ॥ रजनी प्रभाता, प्रातःकृत्यं कृतं, सभामंडपे स्थितोऽस्मि, सामंतप्रमुखाणां सविशेषः प्रसादः कृतः, मंत्रिगृहकं प्रविष्टः, विमलमतिप्रमुखा महामंत्रिणः समागताः, मयैतेभ्यो निजकाभिप्रायः कथितः, तेषां नो बहुमतः, तैश्च भणितं हे देव! गुणधरकुमारस्तावदपरिणतः, प्रजापरिरक्षणमपि धर्म एवेति. ततो मया प्रोक्तं यूयमेषास्माकं कुलस्थितिरिति किं न जानीथ? यस्माद्धर्मदूते आगते न गृहे स्थातव्यमिति. तैरुक्तं देवो जानात्विति. स दिवसोऽतिक्रांतः, रात्रिः समागता, सभामंडपे स्थितः, कांचिद्वेलां गमयित्वा वासभवनं गतः, निवृत्तदेवीस्नेहत्वान्मम निद्रा समागता, रजन्याः पश्चिमे प्रहरे मया स्वप्नो दृष्टः, अहं किल धवलगृहोपरि सिंहासनोपविष्टः प्रतिकूलभावि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ण्था मात्रा यशोधरया कथमपि पातितः, प्रलुठन् सप्तभूमिकाधो गतः, मदनु प्रलुठंती मातापि च तथैव, अहं कथमप्युत्थाय मंदरगिरिमारूढः. अत्रांतरेऽहं विबुद्धः, मया चिंतितं चैष स्वप्नो दारुणारंभो विपाकसुंदरश्च, तस्मान्न जानामि किं भविष्यतीति, अथवा मया परलोकसाधनं प्रारब्धं, यद्भवति तद्भवतु, ततो धर्मध्यानमनुस्मरत एव मे रात्रिरतिक्रांता, प्रभातोचितं कृत्यं कृतं, सभामंडपे स्थितोऽस्मि, तावता महत्तरोज्ज्वलपरिजनपरिवृता मे मातागता, मया सविनयमभ्युत्थिता, तयाहं शरीरकुशलं पृष्टः, मयेषदवनतमस्तकेन निवेदितं, सा च धवलदुकूलास्तृतायां महापीठिकायामुपविष्टा, ततो मया चिंतितमहो सुंदरं जातं, यतो मातात्यत्रागतेति, अस्यै निजकाभिप्रायं निवेदयामि, प्रव्रज्यां विनैतं स्वप्नं विज्ञपयामि, अथवात्यंतस्नेहालुर्माता मे समीहितं दुःखेन संपादयिष्यति, स्वप्नश्चाशुभो दृष्टः, ततोऽत्र जननीतोंतरायमाशंके, अस्याः प्रतिकूलमासेवितुं च न युक्तं, यतो मातापितरौ दुःप्रतीकारौ भवतः, मम चित्तं च भवप्रपंचाद्विरक्तं, इह स्थातुं न शक्नोमि, तस्मादुपायेन विज्ञपयामि, येन निःसंशयमेवैषानुजानाति, एष चात्रोपायो भवतु, तमेव स्वप्नं तथा कथयामि यथा तस्य प्रतिघातननिमित्तं वेषमात्रं प्रतीत्यानुज्ञास्यतीत्वरकालिकीं प्रव्रज्यां वा, ततोऽहं तथाप्रव्र-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

जित एव भविष्यामीति विचिंत्य सर्वसभासमक्षं माता विज्ञप्ता, हे अंब! मया रात्रेश्चरमप्रहरे स्वप्नो दृष्टस्तं शृणोतु, अंबया प्रोक्तं हे पुत्र! कथय कीदृशः? ततो मया प्रोक्तमहं किल गुणधरकुमाराय राज्यं दत्वा कृतशिरस्तुंडमुंडनः सकलसंगत्यागी श्रमणकः संवृत्तो धवलगृहोपरि संस्थितश्च पतितः, ततः सभयः सन् विबुद्धश्चेति.

ततोऽप्रशस्तं स्वप्नं श्रुत्वा स्वप्नशास्त्रनिपुणया माता भयसंतप्तकंपितहृदयं वामपादेन महीमंडलमाहत्य थूत्कारयुक्तं जल्पितं हे पुत्र! तवामंगलं प्रतिहतं, त्वं चिरं जीव? निरुपसर्गं च महीं पालय? एतस्यापि च दुःस्वप्नस्य प्रतिघातननिमित्तमिदं क्रियतां? कुमाराय राज्यं दत्वा गृहे एवेत्वरकालं श्रमणलिंगांगीकरणं, मयोक्तं हे अंब! यत्त्वमाज्ञापयसि, अंबया प्रोक्तं निपतननिवारणनिमित्तं च वेदविधिना जलस्थलखचरजीवान्निपात्य कुलदेवतार्चनेन शांतिकर्म कुरु? ततो मया कर्णौ पिधायादितौ, भणितं च हे अंब! जीवघातेन कीदृशं शांतिकर्म? धर्मः खल्वहिंसालक्षणोऽस्ति, त्वं शृणु?—इह यः पुमान् परस्य दुःखं करोति, स आत्मनो विशेषेण करोति, यतो यत्प्रमादेन कृतं कर्म, तज्जीवानां निष्फलं न भवति, यदपि च शांतिकर्म कुर्वीति त्वयादिष्टं, तच्छांतिकर्म शृणु?

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नरस्य सर्वार्थसाधनसमर्थं शांतिकर्मोच्यते, यस्मिन्नित्यमल्पमपि परस्य पापं न चिंतयति, इहलोके परलोके च तस्य सर्वोत्कृष्टं शांतिकर्म विद्यते, यो यथात्मानं पश्यति तथा सदा सर्वान् जीवान् पश्यति. अंबया प्रोक्तं हे पुत्र! परिणामविशेषतः पुण्यपापे भवतः, एषा च धर्मश्रुतिः, त्वमेतां शृणु? इदं सर्वं जगद्धत्वा यस्य बुद्धिर्न लिप्यते स पापेन न लिप्यते, पानीयेन पंकजमिवेति. अथवा यद्यपि पापं भवति, तथापि देहारोग्यनिमित्तमिदं पापमपि क्रियतां? यतः कारणं गणयता बुद्धिमता पापमपि तथा कर्तव्यं भवति, यथा किमपि विषमप्यौषधं भवति, मयोक्तं हे अंब! यत्त्वयाऽऽज्ञप्तं परिणामविशेषतः पुण्यपापे इत्यत्राकार्यप्रवर्तने कीदृशः परिणामः? अन्यच्च शृण्विदं पुण्यमिति बुद्ध्या पापमपि सेवन् पुण्यफलं न प्राप्नोति, यथामृतबुद्ध्यापि हालाहलविषभोजी न जीवति, पुनः प्राणातिपातादन्यत् त्रैलोक्येऽपि पापं नास्ति, यतः सर्वेऽपि जीवा इह सुखलवार्थिनः संति. एवं च स्थिते कथं हिंसावती धर्मश्रुतिः? यच्च त्वयाऽऽज्ञप्तं यद्यपि पापं भवति तथापि देहारोग्यनिमित्तमिदं क्रियतामित्यत्र शृणु?—अभयदानेनेह दीर्घायुः सुरूपो नीरोगश्च भवति, जन्मांतरेऽपि जीवः सकलजनश्लाघनीयश्च भवति, तस्मान्मम देहारोग्यनिमित्तमप्येतद्व्रतपालनमेव क्षमं, हे अंब! पापा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निर्वर्धितेन च देहेनापि किं कार्यं? मात्रा भणितं हे पुत्रर्षिवचने विचारणयालमिदमेव मम वचनं क्रियतामिति जल्पंती मे चरणयोर्निपतिता.

ततो मया चिंतितमहो दारुणमेकतो गुरुवचनभंगोऽन्यतो व्रतभंगः, तस्मात्किमत्र कर्तव्यं? अथवा गुरुवचनभंगादपि व्रतभंग एव विपाकदारुण इति विचिंत्य माता विज्ञप्ता, यथा हे अंब! यदि तेऽहं प्रियस्तर्ह्यनेन दुर्गतिनिपातहेतुना समादिष्टेनालं, अथवात्मानं व्यापादयामि, मम मांसरुधिरेण कुलदेवतार्चनमंबा करोतु, ततो मया करवालः कर्षितः, अत्रांतरे हा हा मा साहसमिति कलकलशब्दः सभामंडपे समुत्थितः, मातापि च सभयोत्थिता, तयाहं दक्षिणभुजादंडे धृतो भणितश्च हे पुत्राहो ते मातृवात्सल्यं! त्वयि मृते किमहं जीवामि? ततस्त्वया प्रकारांतरेण कृत एष मातृवध एव व्यवसित इत्येवं निरूपय? अत्रांतरे कुक्कुटेन कूजितं, मात्रा शब्दः श्रुतस्तया प्रोक्तं च हे पुत्रैष कुक्कुट आत्मानं सूचयति, अयं कल्पश्चास्ति, यदीदृशे प्रस्तावे यस्यैव शब्दः श्रूयते, तस्य तत्प्रतिबिंबस्य वा व्यापादनेन समीहितसंपादनमिति, तस्मादन्ये जीवास्तिष्ठंतु, एतमेव कुक्कुटं व्यापादय? मया प्रोक्तं हे अंबाहं खल्वंबादेशेनाप्यात्मानं मुक्त्वान्यं न व्यापादयामि, अंबया प्रोक्तं

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

हे पुत्र! यद्येवं तर्ह्येतेन किं? पिष्टमयकुक्कुटवधेनापि तावन्मे वचनं संपादयेति जल्पंती खङ्गमपहृ-
त्य पुनरपि मे चरणयोर्निपतिता. अत्रांतरे तत्स्नेहमोहितमनसा प्रणष्टज्ञानावलोकेन मया पापक-
र्मणा भणितं हे अंबैवं यत्त्वमाज्ञापयसि, अपि च बह्वपि विज्ञानं निजके कार्ये समर्थं न भवति,
यथा दूरे सुष्ठ्वप्यालोकमानं चक्षुरात्मानं न प्रेक्षते. अत्रांतरे लेप्यकारेभ्य आज्ञा दत्ता, यथा तत्का-
लं पिष्टमयं कुक्कुटं निर्वर्तयतेति, तैश्च निर्वर्तितो मत्समीपमुपनीतः, ततः सांबा तं कुक्कुटं मां च
गृहीत्वा देवतायाः पादमूलं गता, तस्या अग्रतः कुक्कुटः स्थापितः, अहं तया भणितो हे पुत्र! क-
रवालं कर्षय? ततो मयेषद्विहसता खङ्गः कर्षितः, मात्रा च प्रोक्तं हे भगवति कुलदेवते! एष स-
र्वजीवानां वारकः कुक्कुटः पुत्रदृष्टदुःस्वप्नप्रतिघातनार्थं ते उपनीतः. एष इमं व्यापादयति च, त-
स्मादेतस्य शरीरे कुशलं कुर्या इति भणित्वाहं संज्ञितो यथैतं व्यापादयेति. ततो मया कुक्कुटो
घातितः, देवतार्चनं कृतं, मात्रा सिद्धकर्मा नाम सूपकारः प्रोक्त इदं मांसशेषं शीघ्रं मांसमिव पक्वं
कुरु? येन मे पुत्रोऽहं च देवताशेषं पश्याव इति. मया प्रोक्तं हे अंब! मांसभक्षणेनालं, शृणु?—
मांसभक्षिणो सुष्टुगुणप्रसिद्धान्यपि तपोनियमदानध्यानविनयमंत्रौषधानि निष्फलानि भवंति, वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षमपि भक्षितं वरं, यत क्षणे नैकश एव मारयति, मांसं पुनर्भक्षितं सद्बहुभवमरणपरंपरां प्रापयति, तथा मांसभक्षिणो नरस्य प्रायः परभवे आयुष्कं च परिक्षीणं भवति, दौर्भाग्यं नरकेषु दुःसहदुःखं च परिवर्तते, यो वैद्यो भैषज्येऽपि यस्मै मांसं ददाति, अनुमन्यते च, स तस्य मार्गलग्नो निःसंदेहं नरके व्रजति, तथा दुर्गंधं बीभत्समिंद्रियमलोत्पन्नमशुचिकमिति भक्षिते च नरकपतनमतो मांसं विवर्जनीयं, एते च मांसभक्षिणो दोषाः, इमे पुनरमांसभक्षिणो गुणाः—सर्वजलमज्जनानि, सर्ववस्तुप्रदानानि, सर्वा दीक्षा एतान्यमांसभक्षित्वस्याल्पमपि न तुल्यानि, ये चौरस्वप्नशकुनवह्निपिशाचभूतग्रहदोषास्ते एकेनामांसभक्षित्वेन तृणसमा भवंति, जीवलोके नरस्य मांसवर्जनगुणौ द्वावेवालं भवतः, तथाहि—

यन्निरुपसर्गं जीवति, यच्च मृतः सन् सद्गतिं लभते, मात्रा प्रोक्तं हे पुत्र विचारणयालं, त्वया मद्वचनं कृतमेव, तस्मात्किमेतेन? इदं च सत्यं मांसं नास्ति, एषा खलु परिकल्पना विद्यते, ततो मयैतदप्यंगीकृतमनुष्ठितं च. अत्रांतरे सानुबंधमशुभकर्म बद्धमिति. द्वितीयदिवसे च कुमारस्य राज्याभिषेकः कृतः, अहं प्रव्रजितुं प्रवृत्तः, देव्या भणितश्च हे आर्यपुत्राद्यैकपुत्रराज्यसुखमनुभवावः,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रातः प्रव्रजिष्यावः. ततो मया चिंतितं किमेतत्परस्परविरुद्धं देव्या व्यवसितं, अथवैतदप्यस्त्येव—
रुडेइ जियंतंपि हु । मयंपि अणुमरइ काइ जत्तारं ॥ विसहरगयंव चरियं । वंकविवंकं महिलि-
याणं ॥ १ ॥ तस्मान्ममानेन किं? यदेषा जणतीति विचिंत्य मया प्रोक्तं हे सुंदरि! मम जीविता-
दपि त्वं वल्लजासि, मया कदापि किं तव प्रार्थनाजंगः कृतः? ततो देव्या चिंतितं नरपतौ प्रव्रजति
सति ममाप्रव्रजंत्या महान् कलंकः, मृते पुनर्मंत्रिवचनाद्बालराज्यपरिपालननिमित्तं तस्याननुम्रि-
यमाणाया न तथाविध इति, तस्मादद्य केनचित्प्रकारेण महाराजं व्यापादयामि, उपायश्चिंतितः,
चतुरपुरुषाणां दृष्टिं कथंचिद्वंचयित्वा तस्मै जोजनगतमेव तत्कालघातकं विषं ददामीति. कश्चिद्व-
लातिक्रांता, ततो जोजनवेलायां संप्राप्तायामहमुपविष्टः, महता विस्तारेण जोजनं स्थापितं, जोज-
यितारो नरा मुखनासिकं समाघ्राय जोजयितुं लग्नाः, देव्याहूता, एषा चालक्ष्यमाणतालपुटविषसं-
योजितेन किलाहारपरिणमनसमर्थेनालीकप्रयुक्तेन योगवटकेन सहागता, आगत्य समीपे स्थिता
च मया सह भुक्ता, ततो जुक्तावसाने चाचमनवेलायां चतुरेष्वपानीतेषु पर्यंतजक्षणीयं योगवटकं
मे उपनीतं, मया निर्विकल्पेन जक्षितं, जुक्तावसाने च कृतशौचाचारो वासजवनं गतः.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अत्रांतरे विषविकारो विजृंभितः, ममांगैः शमशमायितं, पुनस्तदा मम जिह्वा जाड्यं गता, नखा विषव्याप्त्या श्यामीभूताः, वदनकमलं विच्छायं जातं, लोचनप्रसरो निरुद्धः. ततोऽहं तथाविधमनपेक्षणीयमवस्थांतरमनुभवन् सिंहासनान्निपतितः, हा हा किमेतदिति विषण्णः प्रतीहारो मे समीपमागतः, तेन भणितश्च हे देव! किमेतत्? ततो जिह्वा जडेति न मया जल्पितं, तेनाहं सम्यग्विलोकितः, मम विषविकार उपलब्धः, अनेन प्रोक्तं चारे शीघ्रं विषप्रयोगनिर्घातनसमर्थान् वैद्यानाह्वयत? ततो वैद्यानामाह्वानं न शोभनमिति चिंतयंती ससंभ्रमं समुत्क्षिप्तोत्तरीया हाहारवं कुर्वाणा देवी ममोपरि निपतिता, तयाश्रुरहितमेवाक्रंदं कुर्वत्यांगुष्ठांगुलीभ्यां मम कंठगतमर्मपीडया जीवितं चापनीतं. ततो हे देवानां प्रिय! प्रियया व्यापादितः सन्नार्तध्यानदोषेण हिमाचलपर्वताद्दक्षिणस्यां दिशि पुलिंदगिरिनामपर्वतस्य वने एकस्या मयूर्याः कुक्षौ समुत्पन्नः, कालक्रमेण जातः, ततो बालत्वे एव जननीं व्यापाद्य केनचिद्दूना व्याधपुत्रेणाहं गृहीतः, नंदावाटके वासिने ग्रामकोट्टपालाय प्रस्थप्रमाणसक्थुभिर्दत्तः, तत्र च जातपक्षः शीतोष्णतृषावेदना अनुभवंस्तिष्ठामि, तीव्रतरक्षुधावेदनया प्रेरितः क्रमात् कृमीन् खादितुं प्रवृत्तोऽस्मि, तैश्च पापकर्मभिः पोष्यमाणं मम शरीरम-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चिरेणैव पुष्टमासीत, तथा पृष्टिभागे विविधमणिरत्नशेखरकसदृशो रमणीयो मम पिच्छभारो जातः. अथैकदा नाट्यविद्यायां निपुणो मृदुस्वरो दर्शनीयोऽहं कोट्टपालेनैकाग्रचेतसा दृष्टः, ततो हृष्टेन तेन मम प्राग्भवपुत्रस्य गुणधरस्यैव राज्ञः प्राभृतीकृत्योज्जयिन्यां प्रेषितः. इतश्च मम पूर्वभवजननी यशोधरापि मम मरणदिन एवार्तध्यानोपगता मृत्वा पापकर्मणोऽतिबलवत्तया करहाटकदेशे ध्यानपूरकग्रामे एकस्याः शुन्या गर्भे श्वानत्वेन समुत्पन्नः, स च श्वानो मनःपवनाभ्यामपि वेगवान् रमणीयश्च संजातः.

ततोऽन्यदा स कुर्कुरो ध्यानपूरकस्वामिना शोभनो वीक्ष्य महाप्राभृतबुद्ध्या तस्यैव गुणधरनृपतेः प्रेषितः, आवां द्वावपि समकालमेवोज्जयिन्यां प्राप्तौ, सभायां स्थितस्य राज्ञः पुरो मुक्तौ च, तेन दृष्टौ च, एतस्यावयोरुपरि प्रीतिर्जाता, द्वावपि प्रशंसितौ, श्वानोऽकांडमृत्युनाम्नः श्वानपालकस्य समर्पितः, अहं च नीलकंठनाम्नो राजशकुंतपरिपालकस्य, श्वानपालको भणितश्चारे त्वं जानास्येव, यथाहं द्वयोरेवात्यर्थं प्रसक्तोऽस्मि, प्रजापालने आखेटके च, ततो जीवघातनसुखे श्वाने महांतं यत्नं त्वं कुर्याः? तेनोक्तं यद्देव आज्ञापयति. आवां द्वावपि च नरपतिर्यथाविधि लालयति, एवं च

कोऽपि कालोऽतिक्रांतः. अन्यदा चाहं धवलगृहस्य रत्नमयपङ्क्तिनिवेशनस्थाने आरूढः, तत्रांतःपुरीणां च चरणनूपुरादिरणितगर्भं नवजलधरशब्दमिव नाट्यशालासमुत्थं मृदंगध्वनिमाकर्ण्य प्रमोदादहमपि नृत्यं कर्तुं प्रवृत्तः, स्तोककालानंतरं च गवाक्षविवरे दृष्टिं प्रक्षिपता मया चित्रशालिकायां शय्योत्संगे कुब्जकेन सह संभोगसुखमनुभवंती नयनावली दृष्टा, तां च पश्यतो मम जातिस्मरणं समुत्पन्नं, ततः कर्मवशत्वेनामर्षाग्निप्रज्ज्वलितेन चंचुनखाग्रैः सा मया हंतुमारब्धा, तयापि क्रोधव्याप्तया तस्य कुब्जकस्य संबंधिनीं लोहमययष्टिं गृहीत्वा प्रहतोऽहं, तत्प्रहारविह्वलोऽहं निपतितः सन् सोपानमार्गे लुठंस्तमुद्देशं प्राप्तो यत्र नरपतिर्द्यूतक्रीडां करोति, मत्पृष्टितश्चैतं गृह्णीत गृह्णीतेति संलपन् देवीपरिजनः समागतः, तं च तथाविधशब्दं श्रुत्वा तद्देशवर्तिना तेन च पूर्वभवजननीश्वानेन धावित्वाहं गृहीतः, मां च गृह्यमाणं प्रेक्ष्य राज्ञा हाहारवं कुर्वता स श्वानोऽक्षपट्टेन प्रहतः. ततः प्रहारविशृंखलेन च तेन रुधिरं वमन्नहं मुक्तः, आवां द्वावपि कंठगतप्राणौ धरणीपटे निपतितौ, राजा शोकमुपगतः, तेन पुरोहितप्रमुखा मनुष्या आज्ञप्ताः, यथा तातस्यार्यिकायाश्च मरणानंतरं कृष्णागरुलवंगचंदनकाष्ठैर्महान् संस्कारः कृतः, सद्गतिकारणानि च महादानानि दत्तानि, तथैतयोरपि

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मृतयोः कर्त्तव्यमिति. एतदाकर्ण्य मया चिंतितमहो खलु पुत्रेण सर्वसंस्कारः प्रापितः, आवयोः सद्गतिकारणानि दानानि दत्तानि, अहं पुनस्तिर्यग्योन्यामत्यवच्छिन्नया क्षुधया कृमीन् जक्षयन् शुनकैः खाद्यमानस्तिष्ठामि, अहो कर्मणां गुरुकता! एवं च चिंतयतो मम शरीरकं जीवितेन विमुक्तं. ततोऽहं हे देवानां प्रिय! सुवेलपर्वतस्य पश्चिमदिशि दुःप्रवेशं नाम वनमस्ति, तत्र चोपभोगयोग्यपल्लवपुष्पफलाच्छादितोदकप्रभ्रष्टे बहुलजंबूलशाल्मलीकरीरखदिरादिवृक्षैरतिसंकीर्णे ताडवटादिभिर्गभीरदुःखसंचारे विविधविषवृक्षनिर्गतवक्रतीक्ष्णाग्रकंटकिते, एतादृशे वनेऽहं कुंटपसर्प्येन काणपसर्प्या गर्भे जनितः, तत्र गर्भानलकुंभीपाकाधिकवेदनां विषहमाणोऽसंप्राप्त एव प्रसवकाले जातोऽस्मि, दुष्प्रवेशवनेऽत्यवच्छिन्नक्षुधापीडिताया मे जनन्याः स्तनेषु क्षीरं प्रणष्टं. ततोऽहं बुभुक्षापरिम्लानदेहस्तत्र परिभ्रमन् गोक्षुरकंटकान् खादितुमारब्धः. ततः पापेन सह मे शरीरं विस्तारमुपगतं. इतश्च स पूर्वतरजन्ममातृश्वान आर्तध्यानमुपगतो मृत्वास्मिन्नेव दुःप्रवेशवने भुजंगमतया समुत्पन्नः, स कालपाश इव विद्रुममणिरक्तनेत्रो घनांधकारच्छविः शशिकलाकोटिधवलदंष्ट्रश्चलज्जिह्वायुगलो जलाशयसमीपे दर्दुरं खादन् मया दृष्टः, ततो बुभुक्षापरिगतेन मया परिणतिमविचार्य पुच्छदेशे गृहीतः,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेनापि च नेत्राग्निशिखाजालभास्वरमवलोक्याहं वदनदेशे दष्टः, एवं चाज्ञानक्रोधवशगौ द्वावप्यावां परस्परं खादितुमारब्धौ.

अत्रांतरेऽदृष्टपूर्वेण तरक्षेणाहं गृहीतः, महीतले पातितश्च. ततः स मां खादितुं प्रवृत्तः, कथमित्याह—चरचरिति चर्म स्फाटयन्, त्रटत्त्रटिति नाडीस्त्रोटयन्, घुटघुटिति रुधिरं पिबन्, कटकटित्यस्थीनि मोटयन्निति, अपि च स तरक्षुजंतुस्तथा मां खादितुं लग्नो यथा भीतेनेव जीवेन तत्कालं समस्तं स्वकलेवरं त्यक्तं. ततोऽहं हे देवानां प्रिय! एवं स्वकर्मविनिपातितः संस्तत्रैव विशालायां नगर्यां दुष्टोदकानाम्न्या नद्या महाद्रहे मत्स्यीगर्भपुटके रोहितमत्स्यतया समुत्पन्नोऽस्मि, सोऽपि च कृष्णसर्पस्तथा मृत्वास्यामेव नद्यां शिशुमारतयोत्पन्नः, कालक्रमेण जातौ. अन्यदाहं तत्रैव परिभ्रमन् शिशुमारेण दृष्टः, पुच्छभागे गृहीतः. अत्रांतरे स्नाननिमित्तमंतःपुरचेटिकाः समागताः, तासां मध्ये चिलातिकानाम्न्या दास्या चपलतया प्रथमं झंपा प्रदत्ता, ततो मां मुक्त्वानेन सा गृहीता, ततस्तयापि च हाहं केनचिद् गृहीता गृहीतेति महदारटितं, लोकेन धृता, कलकलशब्देन समागता मत्स्यबंधास्तैर्नद्यामवतीर्य चेटी मोचिता, शिशुमारश्च गृहीतः, दुःखमारेण मारितः, कोऽपि का-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लोऽतिक्रांतः. अत्रांतरेऽहं धीवरैर्जालेन संप्राप्तो जीवन् गृहीतः, महामत्स्य इति विचिंत्य समुत्पन्नकार्यैस्तैः प्राभृतनिमित्तं गुणधरनृपस्योपनीतः, राजा परितुष्टः, तेषां प्रयोजनं संपादितं, तेन नयनावल्याः समीपं नीतः, एषा भणिता च हे अंबैतस्य रोहितमत्स्यस्य पुछभागं तातमार्थिकां चोद्दिश्य ब्राह्मणानां भोजनार्थं पाचय? उपरितनभागं च घृतपक्वं कृत्वात्मनो भोजनार्थं प्रगुणं कारय? एवं च शृण्वतो देवीं च पश्यतो मम जातिस्मरणमुत्पन्नं. एवं च राज्ञा समाज्ञप्ते पुछखंडं छित्वा महानसे नयनावल्यै प्रेषितं, शेषदेहे शुंठ्यादित्रिकटूत्कटं हिंगुलवणं दत्तं, हरिद्रापानीयेन परिचिक्तः, तत उत्कालितनवनीतभरितायां महाकटाह्यां प्रक्षिप्तः, संवर्तनोद्वर्तनेन परिपाचितः, ततश्छिन्नं भिन्नं पक्वं मम मांसं पुत्रः खादतीत्यहं जानामि, तीव्रवेदनापीडितो धर्मध्यानं न ध्यायामि. इत्थं नरकगतितुल्यैर्दुःखैः कदर्थितोऽपि दृढकर्मनिगडबद्धो जीवो मे शरीरं न मुंचति, एवं च तीव्रवेदनाभिभूतस्तिष्ठामि.

इतश्च विशालानगर्यां चंडालपाटके या मम पूर्वभवजननी शिशुमारभवे वर्तमाना व्यापादिता, सा तत्राजातया समुत्पन्ना, ततस्तस्या गर्भेऽहमजत्वेन समुत्पन्नोऽस्मि, कालक्रमेण जातः, यौव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नं च प्राप्तः, महामोहमोहितमना मैथुननिमित्तमहं मातरमारूढः, निजयूथपतिना च दृष्टः, कषाय-
योगेन तथा मर्मदेशे हतो यथा प्राणान् परित्यज्य निजके वीर्ये एव तस्या गर्भे समुत्पन्नः, अपि
च कर्ममलविनटितेन तत्र म्रियमाणेन मंदभाग्येन मया जनन्या गर्भे आत्मनैवात्मा जनितः, सा
च प्रसवकाले प्रत्यासन्ने सति गुणधरेण राज्ञाखेटकान्निवर्तमानेनाप्राप्तान्यजंतुना तथाविधक्षेत्रभागे
कायजडतया मंदं मंदं संचरंती धनुर्दंडमाकर्णमाकृष्य मुक्तेन बाणेन विद्धा प्रहारगुरुकतया पृथ्वीत-
ले निपतिता, लब्धलक्ष्यः सन् राजा तुष्टस्तमुद्देशं समागतः, तेन स्फुरत्प्राणैषा सगर्भेति लक्षिता,
ततश्च सेवकानादिश्य तस्या उदरं विदार्य बहिर्निष्कास्याहमजापालकाय समर्पितः, अन्यायाः स्त-
नपानेन जीवितः, कुमारभावं प्राप्तः. अत्रांतरे गुणधरेण राज्ञा मृगयाजनार्थं कुलदेवतापूजाविधा-
नं कृतं, भोजनार्थं पंचदश महिषा व्यापादिताः, ब्राह्मणजनभोजनार्थं च तेषां कंठामिषं सुसंस्का-
रितं. इतश्च किल पवित्रमुखो मेषो भवतीति लोकवादादहं काकशुनकोच्छिष्टरूपकपरिशोधननि-
मित्तं सूपकारेणानायितः, महानसद्वारे स्थापितः, ततो मया घ्रातं तन्मांसं ब्राह्मणैर्भुक्तं, आचमनं
दत्तं, द्विजवरा उच्छ्रितास्तिसृभिः पंक्तिभिः स्थिताः. अत्रांतरे विशेषोज्ज्वलवेषमंतःपुरं गृहीत्वा गु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णधर आगतः, तं च पश्यतो मम जातिस्मरणं समुत्पन्नं, मया सर्ववृत्तांतो विज्ञातः, राज्ञा चरणेषु निपत्य ब्राह्मणाः प्रणताः, प्रोक्तं चैषा पंक्तिर्मम पितुरुपनमतु, एषा च पितामह्याः, एषा पुनः कुलदेवताया इति, तद्ब्राह्मणैरंगीकृतं, मया चिंतितमहो मदर्थं पुत्र एवं ददाति, अहं तु दुःखितोऽस्मीति. अत्रांतरे भोजननिमित्तमेव सकलमातृलोकपरिवृतो राजोपविष्टः, मया देव्यो दृष्टाः, नयनावली न दृष्टा, ततो मया चिंतितमथ सा क्व पुनर्भविष्यति? अत्रांतरे एकया दास्यान्यामुद्दिश्य प्रोक्तं हे सखि! हे सुंदरीह्यद्यैवेते महिषा व्यापादितास्तस्मात्किं पुनरेष एवंविधः पूतिगंधः? तया भणितं हे सखि प्रियमंजूषिके! एष न महिषगंधः, किंत्वेष खलु नयनावल्या देव्या रसलोलुपत्वेन रोहितमत्स्यपुछोदरादिमांसस्य निरंतरमत्याहारकरणेन सद्योऽजीर्णभवनात्समुत्पन्नं यद् दुष्टं कुष्टं, तस्य पूतिप्रवाहमय एव दुर्गंधवायुरत्र विजृंभते, एतत् श्रुत्वेतरया प्रोक्तं हे सखि सुंदर्येतत्कुष्टं न मत्स्याहारमात्रसमुत्पन्नं, किंतु तथा सद्भावयुक्तनिरपराधमहाराजविषप्रयोगव्यापादनजनितपापसमुद्भमिति, तस्मादावयोरनयालमागछान्यत्र गछावः, अन्यथा कामप्याज्ञां दास्यति, दास्यौ गते. ततः सविशेषं मया प्रलोकिता, एकपार्श्वोपविष्टा दृष्टा च, मक्षिकासहस्रसंपातदूषिता रक्तनेत्रा नयनावली विनिर्ग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ता. ततस्तां प्रेक्ष्य तीव्रतरदुःखसंतप्तोऽहं शोचितुं प्रवृत्तः, हा प्रत्यक्षं कर्ममलाच्छादिता सा मे स्त्री क रूपवैपरीत्यभेदेन जन्मांतरं प्राप्तेव लक्ष्यते? यस्या मुखेन स्तनयुगेन चरणाभ्यां च चंद्रकलशकमलानां शोभा सर्वकामिनीभ्योऽधिकं निर्जिता, तस्या एवांगुलिविगमादिभिस्त एव देशा अत्यर्थं कथमुद्वेजका जाताः? या स्वकीयाधरनयनैश्च सविलासमुद्भ्रांतप्रेक्षितैश्च तपस्विनां मुनिनामप्यत्यर्थं चित्तहरासीत् सैवेदानीं तैरेव पापपरिणतिवशेन चिंत्यमानापि कामिनामप्यौदासीन्यं करोति, एवं च चिंतयन् यावत्कंचित्कालं तिष्ठामि, तावद्राज्ञा सूपकार आहूतो भणितश्चारे महिषमांसं मह्यं न रोचते, तस्मादन्यत्किमपि लघुमांसमानय? ततः सूपकारेण चंडशासनो देवो वर्तते, मा कालक्षेपो भवत्विति विचिंत्य ममैव दक्षिणं पार्श्वं छित्वा ज्वलद्भिरंगारैर्भटित्रं कृतं, राज्ञे प्रेषितं च, तेनापि च तातस्योपनमत्वित्युक्त्वा स्तोकमग्रासनस्थं ब्राह्मणेभ्यो दापितं, किमपि नयनावल्यै प्रेषितं च, शेषमात्मना भुक्तं.

अत्रांतरे या मे माता गुणधरेण व्यापादिता, सा कलिंगदेशे महिषः समुत्पन्नः, स च भांडभारं वहन् विशालां नगरीं संप्राप्तः, तेन च जलपानस्नाननिमित्तं शिप्रानदीं समवतरन्नश्वशालाग्र-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धानो नृपकिशोरो व्यापादितः, अनुचरै राज्ञे निवेदितश्च, अनेन च प्रोक्तमरे तं दुष्टं महिषमान-
यत? नृपाज्ञानंतरं चैष आनीतः, ततस्तं दृष्ट्वा रोषस्फुरिताधरेण राज्ञा सूपकारमाकार्य प्रोक्तमरे ए-
तं दुराचारं दुष्टमहिषं जीवितमेव शीघ्रं भटित्रं कुरु? तेनापि च नृपाज्ञया पृथिव्यां चतुर्दिक्षु च-
त्वारः स्थूला लोहकीलका निहतास्तेभ्यो विनिर्गताभिः शृंखलाभिः स महिषश्चतुर्ष्वपि चरणेषु प-
टमंमूपवद् गृहीत्वा तथा बद्धो यथा भिन्नवृक्षवच्चलितुं हंतुमुत्कूर्दितुं वा किमपि कर्तुं न समर्थो बभू-
व, तस्य पुरतः त्रिकटुहिंगुलवणजलभरितो महाकटाहश्च स्थापितः, चतसृष्वपि दिशासु नातिदूर
एव खदिरवरसारकाष्ठैरग्निः प्रज्ज्वालितः, तदा स तेन महाग्निना पाच्यमानः शुष्कोष्ठकंठताळुजिह्व-
स्तीव्रतृषापरिगतोऽधिकतरदुःखजनकं तं क्षारपानीयं पातुमारब्धः, तेन स देहमध्ये प्रदीप्तः, तस्य म-
लद्वारेण च किल्विषं निर्गतं. अत्रांतरे राज्ञा समाज्ञप्तं शीघ्रं महिषभटित्रमानय? ततश्च यत्र यत्र
पक्वं ततस्तत्तच्छित्वा सूपकारेण ढौकितं, एष महिषश्च घृतभरैः सिक्तः, पिष्टलवणं च प्रक्षिप्तं, विशे-
षेणाग्निः प्रज्ज्वालितः, अत्रांतरे च राजपरिवेषक आगतः, राज्ञा च प्रोक्तमरेऽन्यामपि विजातीयां
भटित्रकां द्रुतं देहि? ततः सूपकारेणाहं प्रलोकितः, संप्रति निश्चयेन मम भटित्रीकरणं संप्राप्तमि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ति हृदयेन संमूढः, मम देहे सद्यो नाभीसमूहः संकुचितः, अस्थिबंधो विघटितः, सर्वेंद्रियबलानि विकलितानि, ततः कंठगतप्राण एव सूपकारेण गृहीतः, मम द्वितीयपार्श्वकं भिन्नं, मम देहश्च जीवितेन विमुक्तः.

ततश्च हे देवानां प्रिय! एतस्मिन् समय एव स महिषजीवोऽहं च मृत्वा विशालानगर्यांश्चंमालपाटके कुक्कुट्या गर्भे समुत्पन्नौ, कोऽपि कालोऽतिक्रांतः, प्रसवकाले उपस्थिते चास्मज्जननी मार्जारबालेन व्यापादिता, कचवरोपरि च तां खादतोंडकद्विकं पतितं, मार्जारो गतः, अन्यचंडाल्या चावयोरुपरि सूर्पकोणेन कज्जकः प्रक्षिप्तः, तत उष्मप्रभावेणावां जीवितौ, अंडके स्फुटिते, आवां निर्गतौ, अणुहल्लाभिधानेन चंडालपुत्रेण गृहीतौ, तेन जीवितौ, आवयोश्चंद्रज्योत्स्नासदृश्यः पिच्छावलयो जाताः, मम शुकमुखगुंजार्धरागसदृशी शिरसि शिखा समुद्भूता, कालदंडपाशिकेनावां दृष्टौ, अहो इमौ राज्ञः क्रीडनयोग्याविति गृहीतौ, तेन च गुणधरस्य राज्ञ उपनीतौ, राजा परितुष्टः, एतस्य कोट्टपालस्यैवावां समर्पितौ, एष भणितश्चारे यत्र यत्राहं व्रजामि तत्र तत्रैतावानेतव्याविति, अनेनांगीकृतं. अन्यदा सकलांतःपुरपरिवृतो राजा वसंतक्रीडानिमित्तं कुसुमाकरोद्यानं गतः, तत्र

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कालदंडपाशिकेनावां नीतौ, तदोद्यानतिलकभूते बालकदलीगृहपरिक्षिप्ते माधवीलतामंडपे राजा स्थितः, इतरोऽप्यावास्यां सहाशोकवीथिकां गतः, तत्र च भगवान् शिष्यगणपरिवृतः शशिप्रभाभिधान आचार्यो दृष्टः, ततोऽलीकवंदनं कुर्वन् स साधुमूलमुपगतः, तेन धर्मलाभो दत्तः, ततस्तं तपःश्रीविराजमानदेहं दृष्ट्वा प्रकृतिसुंदरं तस्य वचनं श्रुत्वैष उपशांतोऽपि च, अनेन च प्रोक्तं हे भगवन्! भवतां धर्मः कीदृशः? भगवता प्रोक्तं शृणु?—सकलसत्वसाधारण एक एव धर्मः, अत्र धर्मेऽनधिगतशास्त्रपरमार्थो मूढो जनश्च भेदान् कल्पयति, स पुनः संक्षेपेणायं—मनोवचनकाययोगैः परपीडाया अकरणं, तथा सुपरिशुद्धस्य सत्यस्य भाषणं, तृणमात्रस्याप्यदत्तादानस्याग्रहणं, मनोवाकाययोगैरब्रह्मचर्यपरिवर्जनं, गोसुवर्णहिरण्यादिकेषु चापरिग्रहः, तथा रात्रिभक्तवर्जनं, द्विचत्वारिंशद्देषणादोषशुद्धपिंडपरिभोगः. अत्रांतरे दंडपाशिकेन प्रोक्तं हे भगवन्नेतेनालं, गृहिधर्मं कथय? भगवता तस्मै पंचाणुव्रतादिकः श्रावकधर्मः कथितः, अनेन च भणितं हे भगवन्नहमेतं धर्मं करोमि, नवरं पूर्वपुरुषक्रमागतवेदोक्तेन विधिना पशुवधं न परित्यजामि, भगवता प्रोक्तं यदि त्वं न परित्यजसि, तर्हिदं कुक्कुटयुगलमिव संसारसागरेऽनर्थं प्राप्स्यसीति. दंडपाशिकेन भणितं हे भगवन्ना-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

भ्यां पुनः किं न परित्यक्तं? कोवानर्थः प्राप्तः? ततो भगवता यथावां जननीपुत्रावास्व, यथा च पिष्टमयकुक्कुटवधः कृतः, यथा मयूरश्वानसर्पपसयमत्स्यशिशुमाराजाऽजामेषमहिषाः कुक्कुटपक्षियुगलं च संसारसमुद्रे जाताः, यानि चावाभ्यां तीव्रदुःखानि प्राप्तान्येतत्सर्वं श्रुतातिशयज्ञानिना प्रोक्तं. एतच्च श्रुत्वा दंडपाशिकः परं संवेगं प्राप्तः, अनेन भणितं च हे भगवन्निदं परिणामदारुणेन वेदविहितेनापि पशुवधेन मेऽलं, मह्यं गृहिधर्मोचितानि व्रतानि देहि?

ततश्च भगवता तीर्थकरभाषितेन विधिना तस्मै संसारजलधिप्रवहणभूतः पंचनमस्कारो दत्तः, तथा स्थूलप्राणातिपातविरमणादिकानि च व्रतानि दत्तानि, अनेन गृहीतानि च, तदा निजचरितश्रवणसमुत्पन्नजातिस्मरणाभ्यां परमसंवेगगताभ्यामावाभ्यामपि तानि गृहीतानि. ततः परितोषविशेषतः संप्राप्तभुवनगुरुधर्मबोधिभ्यां निष्ठापितसानुबंधाशुभकर्मभ्यामावाभ्यां कूजितं, तदुद्यानप्रासादांतरगतेन जयावल्या देव्या सह सुरतसुखमनुभवता राज्ञा च श्रुतं, अनेन पार्श्वस्थं धनुर्वरं गृहीतं, तत्र बाणं संध्याय हे देवि! मम शब्दवेधित्वं पश्येत्युक्त्वानेन शरो मुक्तः, आवां व्यापादितौ, तत्क्षणमेव भुक्तमुक्ताया जयावल्याः कुक्षौ समुत्पन्नौ, प्रादुर्भूतजिनधर्मबोधिगर्भप्रभावेण तस्या देव्या दृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ढमजयदानपरिणामः समुत्पन्नः, सत्वेष्वजयदानं दत्तं, कालक्रमेण जातौ, अहं पुत्रो मम माता पुत्रीति, गर्ज्रस्थाज्यां चावाभ्यां माताजयदानपरासीदतो नाम्नी प्रतिष्ठापिते, ममाजयरुचिरन्यस्या अजयमतीति. आवां देहोपचयेन कलाकलापेन च वृद्धिमुपगतौ, राज्ञा च चिंतितमजयमत्या विवाहं करोमि, अजयरुचेश्च युवराज्यान्निषेकमिति. अत्रांतरे राजा मृगयां प्रवृत्तो विशालापुरीतो निर्गतः, उद्यानांतरं प्राप्तः कुसुमामोदसुरजिणा मारुतेन स्पृष्टः, तदुद्यानमवलोकितं, तत्र च तिलकपादपासन्ने ध्यानमुपगतः सुदत्तो नाम मुनिवरो दृष्टः, राजा कुपितश्च, मृगयां प्रवृत्तस्य मम खल्वेषोऽपशकुनस्तस्मादेतस्य कदर्थनयैवैतमपनयामीति विचिंत्य बुबुत्कारसारं श्वाना मोचिताः, अकालमृत्युरिव शीघ्रवेगेन मुनिवरसमीपं प्राप्ताः, सुहुतहुताशन इव तपःप्रजया ज्वलद्देहो मुनिवरस्तैर्दृष्टः, ततस्तं समुज्ज्वलंतं दृष्ट्वा श्वाना विज्ञाया जाता औषधिगंधाघ्राणप्रभ्रष्टविषा जुजंगा इव, तपःकर्मप्रजावेण प्रदक्षिणां कृत्वा शुनकवृंदैर्धरणीगतमस्तकैर्मुनिवरस्य पादयोः पतितं. ततस्तं दृष्ट्वा राजा लज्जितः, अनेन चिंतितं चाहो एते शुनकपुरुषा नवरं पुनरहं पुरुषश्वानो येनैवं तपश्चरणनिरतस्य जगवतोऽप्यकुशलं चिंतितमिति.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अत्रांतरे विशालानगर्यां सकलार्यप्रधानो राज्ञ एव बालसुहृज्जिनवचनभावितमतिरर्हद्दत्तो नामश्रेष्टिपुत्रः साधुवंदननिमित्तं समागतः. तेन च राज्ञः परलोकनिरपेक्षतया मुनिवरोपसर्गो विज्ञातः, ततोऽनेन प्रणम्य नरपतिर्भणितो हे देव किमेतत्? राज्ञोक्तं यत्पुरुषश्वानस्योचितं, अर्हद्दत्तेनोक्तं हे देव! त्वं खलु पुरुषसिंहस्तस्मादेतेन किं? तुरंगमादवतर? भगवंतं सुदत्तमुनिवरं वंदस्व? एष खलु कलिंगाधिपस्यामरदत्तस्य राज्ञः पुत्रः सुदत्तो नाम नरपतिः, एतस्य प्रथमयौवने वर्तमानस्यारक्षकेण तस्कर उपनीतः, तेन भणितं हे देवैतेन परगृहं प्रविश्यैकं महत्तरं पुरुषं व्यापाद्य गृहं मुषितं, निर्गच्छंश्चास्माभिर्गृहीतः, सांप्रतं देवः प्रमाणमिति. एतच्च श्रुत्वानेन धर्मशास्त्रपाठका आहूता भणिताश्चैतस्यानेनारक्षकेणैष दोषः कथितस्तस्मादस्य कीदृशो दंडः? तैः प्रोक्तं हे देव! पुरुषघातकः परद्रव्यपहारी चैषस्तस्मात् त्रिकचतुष्कचत्वरेषु जनपदेभ्यो निवेद्य, ततो नेत्रोत्पाटनकर्णनासिकोत्कर्तनकरचरणछेदनैर्जीवितनाश एवास्य दंड इति ऋषिवचनं. एतच्च श्रुत्वानेन चिंतितमहो राजकुलजीविकाहीना यदीदृशमप्यनुमन्यंते, तस्मान्ममानेकोपद्रवभाजनेन राज्यसुखेनालमित्यानंदनाम्ने भागिनेयाय राज्यं दत्वा सुधर्मगुरुसमीपे प्रव्रज्यामंगीकृतवांस्तस्मादेष खलु वंदनीयः. एतत्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुत्वा स राजा संभ्रांतः सन् मुनिवरसमीपं गतः, अनेन जगवान् सुदत्तमुनिवरो वंदितः, अत्रांतरे ध्यानयोगः समाप्तः, ततोऽनेन धर्मलाजो दत्तः, राज्ञे जणितं च हे महाराजोपविश? ततोऽहो मयाकार्यं कृतमित्यधिकजातपश्चात्तापो लज्जानम्रीजूतवदनकमलो राजोपविष्टः, अनेन चिंतितमहममर्त्यर्षघातकः, एवं च प्रकाश्यात्मनः शिरश्छेदं विना न प्रायश्चित्तं प्रेक्षे. तस्मात्किं बहुना? अकार्याचरणकलंकदूषितमात्मानं मुहूर्तमपि धारयितुं न शक्नोमि, अतो मे इहावस्थानेनालं, यथेष्टं संपादयामीति.

अत्रांतरे समुत्पन्नमनःपर्यवज्ञानातिशयेन सुदत्तमुनिवरेण प्रोक्तं हे महाराज! तवानेन चिंतनेनालं, यत्त्वया परिकल्पितं, तदेतत्खल्वत्र प्रायश्चित्तं नास्ति, यतो धर्मपदार्थज्ञायकैरात्मघातोऽपि प्रतिषिद्ध एव, जावितजिनवचनानां ममत्वरहितानामात्मनि परे च विशेषो नास्त्येव, तत उजयोरपि पीडां वर्जयेत्, यच्चाकार्याचरणकलंकदूषितमात्मानं मन्यसे इत्येतस्यापि जिनवचनानुष्ठानजलमेव प्रक्षालनं, न पुनरन्यदिति, यदपि चिंतितं यथेष्टं संपादयामीत्यत्रापि तेन जवानुबंधिना संपादितेनालं, असंपादितपूर्वं त्रैलोक्यबांधवानां जातिजरामरणबंधनविमुक्तानां तीर्थकराणां शासनं सं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पादय? अत्रांतरे मनोगताभिप्रायप्रकटनेनाहो भगवतो ज्ञानमिति मन्यमानोऽस्मादेव प्रायश्चित्तं ज्ञास्यामीत्यानंदबाष्पजलभरितलोचनो राजा मुनिवरस्य चरणयोः पतितः, तेन भगवान् मुनिवरो विज्ञप्तो हे भगवन्! कथय किमत्र प्रायश्चित्तं? मुनिवरेणोक्तं यत्पापं कृतं तत्प्रतिपक्षासेवनं प्रायश्चित्तं, तत्पुनर्निदानवर्जनं विना न स्यादिति निदानं परिहर्तव्यं, निदानं चात्र मिथ्यात्वमोहनीयसंमीलितमज्ञानं, तच्चान्यथास्थितेषु भावेष्वन्यथाप्रतिपत्तिरिति. त्वया चिंतितं चैष खल्वपशकुनोऽतः कदर्थनयापनयामीति, अपशकुनत्वे च तवेदं निमित्तं प्रतिभाति, यथा क्लिष्टोऽस्नानसेवी कृतशिरस्तुंडमुंडनो विरुद्धपाखंडवेषधारी भिक्षोपजीवक इति, तस्मादत्र हे महाराज! मध्यस्थो भूत्वा कारणं शृणु स्नानसेवनासेवनयोः के गुणदोषाः? तत्र स्नानसेवनगुणाः—देहः क्षणमात्रशुचिः, तस्मिंश्च रागः, तथाभिमानश्च, वनितानां प्रार्थनीयोऽहं शुचिरिति दर्पादाख्यानं च, इमे च दोषाः—जलगतजीवविनाशः, अन्यसत्वानामुत्पीडनं च, अंगाराणां क्षीरेण प्रक्षालनेऽज्ञानप्रकाशनमेव, एते एव वैपरीत्येनास्नानगुणाः, दोषाः पुनर्विबुधजनमाश्रित्यात्र केऽपि न हि विद्यंते, यतः सर्वशास्त्रसारस्त्रिकरणविशुद्धा प्राणिदया, तथा द्विजैरपि यज्ञदीक्षायामेतदस्नानव्रतं सर्वादरेण गृहीतं, अन्यच्चास्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

डितव्रतनियमा मनोवाक्कायगुप्ता दांतेंद्रिया जितकषायाः स्वाध्यायध्याननिरताः, ईदृशा मुनिवरा भवंति, सर्वाश्रवनिवृत्तस्य मुनिवरस्य शिरस्तुंडमुंडनमपि निश्चयेन प्रथमव्रतरक्षणार्थं गुणावहं भवति, एतत्पाखंडमपि वीतरागद्वेषैर्जिनैर्यस्मात्सुमंगलं प्रोक्तमतो विरुद्धमिति व्यामोहोऽस्ति. तथा सर्वारंभनिवृत्तो भवद्वयेऽप्यप्रतिबद्धश्च पुमान् सर्वशास्त्रेषु भिक्षोपजीविक एव प्रशंसितः, एवं च हे महाराज परमगुणयुक्तत्वेन देवानामपि महामंगलं श्रमणरूपं ते कथमपशकुनः? एतदाकर्णयतो राज्ञो मिथ्यात्वं प्रणष्टं, हे भगवन्नहो ते ज्ञानातिशय इति जल्पंश्चरणयोर्निपतितः. अनेन भणितं च हे भगवन्! यद्भवतादिष्टमेतदेवमेव, मया निदानं वर्जितं, तस्मान्ममैतमपराधं क्षमस्व? भगवता प्रोक्तं हे देवानां प्रियोत्तिष्ठोत्तिष्ठ? तव संभ्रमेणालं, मुनयः क्षमाप्रधाना एव भवंति, मया सर्वसत्वेभ्यः क्षमितं, त्वं तीर्थकरभाषितां क्षमायाः परंपराभावनां शृणु?—

वैरं विनापि केनचिद्बालेनाक्रुष्टेनापि साधुना क्षमा भावयितव्या, एष खलु सुंदरो यदेवमभिनिविष्टोऽपि मां न ताडयति, ताडितेनापि मुनिना क्षमा भावयितव्या, एष खलु सुंदरो यदेवमभिनिविष्टोऽपि मां न जीविताद्व्यपरोपयति, जीविताद्व्यपरोप्यमाणेनापि साधुना क्षमा भावयितव्या, एष

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खलु सुंदरो यदेवमभिनिविष्टोऽपि मां न संयमाकृष्टं करोति, किंतु ममैव पूर्वकृतकर्मपरिणतिरेषेति. एतच्च श्रुत्वा राजा परितुष्टः, अनेन चिंतितं भगवतो ज्ञानस्याविषयं नास्ति, अतो भगवंतं पृछामि तातस्य पितामह्याश्च गतिविशेषमिति, तेन भगवान् पृष्टः, भगवता च पिष्टकुक्कुटवधनिमित्तो मयूरादिलक्षणो जयावलीगर्भसमुत्पत्तिपर्यंतः कथितः, राज्ञा चिंतितमहो संसारस्यासारता! अहो स्त्रीणामनवस्थितस्नेहता! अहो मोहस्य गुरुकता! अहोऽकार्याचरणानां दारुणविपाकता! यदिह देवतानिमित्तं पिष्टमयकुक्कुटवधोऽप्येवं परिणतः, हा हाहं किं करिष्यामि? येन मयाऽज्ञानमहावलिप्तेन निरर्थकं बहूनि स्फुरंति जीवशतानि व्यापादितानि, तस्मान्नूनं मया बाणेनेव ऋजुकेन मार्गेण नरकं गंतव्यं, अत्र ह्युपायो नास्ति, अथवा भगवंतं पृछामि.

अत्रांतरे ज्ञातनरेंद्राभिप्रायेण सुदत्तमुनिवरेणोक्तं हे महाराजोपायोऽस्ति, स पुनस्त्रिकरणविशुद्धा जिनधर्मप्रतिपत्तिः, सा पुनः पूर्वदुःकृतेष्वत्यंतं पश्चात्तापः, जिनवचनजलेन चित्तरत्नशोधनं, सर्वारंभत्यागेन चारित्रप्रतिपत्तिः, सर्वजीवेषु १ गुणाधिकेषु २ क्लिश्यमानेषु ३ दुष्टेषु च ४ क्रमेण मैत्री १ प्रमोद २ कारुण्य ३ माध्यस्थानां च भावनाः, प्रतिपन्नचारित्रभावनाश्च प्राणिनस्तत्प्रभृत्येवा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रमादातिशयेन प्रवर्धमानसंवेगा निरतीचारशीलतया पूर्वदुःकृतानि पापकर्माणि क्षपयंति, निमित्त-स्याभावान्नवानि च कर्माणि न बध्नंति. ततो हे देवानां प्रिय! ते परमसुखसमेताः सुखपरंपरयैव कर्मजालं क्षपयित्वा जातिजरामरणरोगशोकरहितं परमपदं प्राप्नुवंतीति. राज्ञोक्तं हे भगवन्! यदि तावत्तातपितामह्योरेतावन्मात्रस्यापि दुष्कृतस्येदृशो विपाकस्तर्ह्यहं महापापकर्मकारी, विपाकतो नर-कादिषु तं कर्मविपाकमभुक्त्वा कथं सद्गतिं प्राप्नोमि? भगवतोक्तं हे महाराज! शृणु?—चारित्रप-रिणामस्यासाध्यं नास्ति, एष चारित्रपरिणामः खलु पापविषपरिणतेः परमामृतं, कर्मपर्वतस्य वज्रं, वांछितानां चिंतामणिः, सिद्धिसुखफलस्य कल्पवृक्षः, हे महाराज! यथा च विषलेशभोजिनोऽपि प्राणिनोऽत्राकृतप्रतीकारा आपदं प्राप्नुवंति, हिताहितेषु मुह्यंति, मानुष्यकसुखानि न सेवंति, जी-वितं परित्यजंति, तथैवैते प्रमादिनो जीवाः पापकर्माणि कृत्वा, तत्प्रतीकारं चाकृत्वा तत्फलं जाति-जरामरणरोगशोकरूपं प्राप्नुवंतीति. कृतप्रतीकाराः पुनरमृतौषधसामर्थ्यतः कालकूटं महाविषमपि निर्जयति, किमंग पुनर्विषलेशं? एवमेवानादिभववासनातो जीवः पापकर्म कृत्वा तस्य प्रतिपक्षभूतं महाचारित्रपरिणामं सेवित्वानेकभवजनितमपि पापकर्म निर्जयति, किमंग पुनरेकभविकं? एवं श्रु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वा राजा हृष्टः, अनेन भणितं च हे भगवन्नथ कीदृशः पुनरेष चारित्रपरिणाम इत्युच्यते? भगवतोक्तं सम्यग्ज्ञानपूर्वकं तीव्ररुच्या दोषनिवर्तनं, एषोऽनुभवसिद्धः कर्मविगमहेतुः, राज्ञा चिंतितं भगवंतमनुसेवमानानां सम्यग्ज्ञानं न दुर्लभं, समुत्पन्नसम्यग्ज्ञानानां च तीव्ररुचिः संभवति, ततश्च दोषनिवर्तनं स्वायत्तं, तस्माद्धन्योऽहं यस्य मे भगवतो दर्शनं जातमिति, अल्पपुण्या नरा महानिधिं न प्रेक्षंते, तस्मादन्येनालं, भगवत एवाज्ञां सेवामीति विचिंत्यानेन प्रोक्तं च हे भगवन्नहं श्रमणत्वप्रतिपत्तेरुचितः? भगवतोक्तं हे महाराजान्यः क उचितः?

ततः संजातहर्षेण राज्ञा भणितमरेऽद्य मतिसागरप्रमुखमंत्रिभ्यो निवेदयत? यथा देवानां प्रियैरभयरुचेः कुमारस्य राज्याभिषेकः कर्तव्यः, मम संबंधी खेदो न कर्तव्यः, अहं भगवता सुरासुरप्रणतेन भुवनगुरुणा दर्शितं श्रमणलिंगं प्रतिपद्ये, नियोगकारिणः पुरुषा यद्देव आज्ञापयतीत्युक्त्वा गताः, तैर्मंत्रिजनपदेभ्यो निवेदितं, एष वृत्तांतोंतःपुरेण श्रुतः, ततः स्नेहभयसंभ्रमेणासंपूर्णमालेख्यगांधर्वादिकं परित्यज्य हाहारवसंयुक्तमंतःपुरं तत्र गंतुं प्रवृत्तं, अहमपि तेभ्य एवैवं व्यतिकरमाकर्ण्याभयमतीसमेतः प्रवृत्तः, वयं पादचारेणैव च नरपतिसमीपं प्राप्ताः, राजा संवेगमुपगतो मु-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

नींद्रपादमूले दृष्टः, भूमितलासनस्थो दूरीकृतछत्रचामराटोप एष किं नरपतिर्भवेदथवा न भवेदिति सवितर्कं राजपत्नीभिर्दृष्टः. ततस्ताभिः सप्रणामं समकालं प्रक्षुभितभूषणरवेणाविज्ञाताकरार्थस्तस्य जयशब्दः समुद्घुषितः, तेनापि वैराग्यवशादुल्लोलितस्नेहमीषद्वदनं समवनामितं, एनं च संभाषितेन सर्वांतःपुरपरिजनेन पादपतितेन नरपतिर्विज्ञप्तो हे महाराज! पातितदंष्ट्रो भुजंग इव, बंधनभूमिनिगडितो गज इव, पंजरस्थः सिंह इव, प्रभृष्टराज्यः पुरुष इव किमेतद्ध्यायसि? तत एवं विज्ञप्तेन राज्ञा समस्तं मुनिवचनादिकं प्रोक्तं, एतच्च शृण्वतोरावयोर्जातिस्मरणं समुत्पन्नं. ततस्तत्संभ्रमेणावां धरणीतले निपतितौ, हा किमेतदपरमिति मन्यमानाभी राजपत्नीभी रुदितं, बाष्पजलसिक्तगात्रं चावयोरुपरि माता मूर्छामुपगता. तत आवां विबुद्धौ, माता समाश्वासिता, राजा विज्ञप्तो हे तात संसारक्लेशप्रयासकारकैर्विषयैरावयोरलं, आवाभ्यां सकलदुःखविमोचकं श्रमणत्वमनुजानीहि? राज्ञा भणितं यथासुखं देवानां प्रियौ! मा प्रतिबंधं कुरुतं? ततो विजयधर्मणो निजभागिनेयाय राज्यं दत्वाष्टाह्निकामहिमां कृत्वा सकलांतःपुरप्रधानजनसमेत आवां गृहीत्वा राजाभिनिष्क्रांतः. मया भगवान् सुदत्तमुनिवरो विज्ञप्तो हे भगवन्! नयनावल्यै धर्मकथाया अनुग्रहं कुरु? भग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वतः प्रभावेणैषापि सकलदुःखविमोचकं जिनप्रणीतं धर्मं प्राप्नोतु, भगवता प्रोक्तं हे सौम्यैषा खलु धर्मकथाया अयोग्या, अनयाऽकार्यकुपथ्यासेवनया कर्मरोगो वृद्धिं नीतः, तृतीयपृथिव्यां परभवायु र्बद्धं, अतोऽवश्यं तस्या नारकत्वं प्राप्तव्यं, एषा महामोहयुक्ततया जिनधर्मरत्नं न प्रपद्यते चेति. ततो मया चिंतितमहोऽकार्याचरणस्य दारुणविपाकता! एष संसारसद्भाव ईदृशः, तस्मात्किं करोमि? ततोऽतिशयज्ञानालोकसूर्येण भगवता प्रोक्तं तवानेन संसारविवर्धनेन तस्या अपर्यनुबंधेनालं, त्वमेतामेव सकलत्रैलोक्यदुर्लभां कथंचिल्लब्धां प्रव्रज्यां कुरुष्व?

ततो गुरुगुणप्रभावेण श्रमणत्वं सम्यक्पालितं, कालमासे च सिद्धांतविधिना कालं कृत्वा सहस्राराभिधाने देवलोके द्वावप्युत्पन्नौ, तत्रापि सुरायुरुपभुज्य देवलोकाच्च्युत्वा कोशलदेशेऽयोध्यायां नगर्यां विनयंधरस्य राज्ञो लक्ष्मीमत्या महादेव्याः पुत्रत्वेनोत्पन्नोऽस्मि, कालक्रमेण जातः, यशोधर इति च मम नाम कृतं, अन्नयमतीजीवदेवोऽपि ततो देवलोकाच्च्युत्वा पाटलिपुत्रे नगरे ईशानसेनस्य राज्ञो विजयादेव्याः कुक्षौ पुत्रीत्वेनोत्पन्नः, कालक्रमेण जाता, तस्या विनयमतीति नाम च प्रतिष्ठापितं, द्वावप्यावां देहोपचयेन कलाकलापेन च वृद्धिं प्राप्तौ, तदेशानसेनेन सा वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नयमती स्वपुत्री मम स्वयंवरा प्रेषिता, तामागच्छंतीं श्रुत्वा चाहं हृदयेन परितुष्टः, सा महता परिक्-रेण प्राप्ता च, राज्ञा बहुमानपूर्वकं नगराद्बहिरावासिता, वर्धापनकं च कृतं, विवाहदिवसो निर्धारितः, तस्मिन् समागतेऽहं विनयमतीं परिणेतुं प्रवृत्तः, मंगलतूर्येषु वाद्यमानेषु, पणांगनागणेषु नृत्यत्सु, मंगलपाठकेषु पठत्सु, जनन्यादिसधवस्त्रीलोके गानं कुर्वति सति धवलगजवरारूढो राजवृंदैः समेतः प्रासादश्रेणीतलगताभिः पुरसुंदरीभिर्विलोक्यमानो राजमार्गं प्राप्तः, अस्मिन्नवसरे मम दक्षिणलोचनेन स्फुरितं, हर्षविशेषः समुत्पन्नः, मया चिंतितं शीघ्रमतोऽपि महाप्रमोदेन भवितव्यं, अत्रांतरे कल्याणश्रेष्ठिभवनांगणे मया गोचरचर्याप्रविष्टः साधुर्दृष्टः, तं च दृष्ट्वा मम संभ्रमः समुत्पन्नः, ततः साधुधर्मस्य पूर्वाभ्यस्ततया कर्मपरिणतेर्विचित्रतया भगवतो पुनरमोघदर्शनतया च मे जातिस्मरणं समुत्पन्नं, अहं मूर्छितः सन् गजेंद्रस्कंधे निपतन् पार्श्ववर्तिना रामभद्राभिधानेन सकलहस्त्यारोहप्रधानहस्तिपकेन धारितः, किमेतदिति रामभद्रो विषण्णः, मा वादयतेति तूर्याणि वारितानि, अविषाद्यपि दृढं विषण्णचित्तस्तातः समागतः, पूगफलादिमदमूर्छितो भविष्यतीति विचिंत्य चंदनपानीयेन सिक्तः, मया चेतना लब्धा, लोचनयुगलमुन्मीलितं, आसनपरिग्रहः कृतः, संसारसागराभि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्तं विरक्तं, तातेन च प्रोक्तं हे पुत्र किमेतत्? मयोक्तं संसारविलसितं दारुणं, तातेनोक्तं हे पुत्र! कोऽत्र संसारचिंताया अवसरः? मयोक्तं हे तात महती खल्वेषा कथा, संक्षेपतः कथयितुं न शक्यते, तस्मादेकस्मिन् प्रदेशे तात उपविशतु, मम मातृलोकं प्रधानजनपदं च शब्दापयतु, येन ताताय संसारचिंतावसरकारणं कथयामि. ततो राजमार्गासन्नसजायां राजोपविष्टः, मातृलोकः प्रधाननागरिकादिलोकश्च शब्दापितः, उचितस्थानेषु स्थितः.

ततस्तातेन भणितं हे पुत्र! किमेतत्? मयोक्तं हे तात निर्गुण एष संसारः, मोहाभिभूताः खलु प्राणिन एतस्य स्वरूपं न जानंति, अनालोचनीयान्यालोचयंति, अहितकर्मणि प्रवर्तंते, उत्तरकालं न प्रेक्षंते, अत्र खलु तावदेते जन्मजरामरणरोगशोकप्रियविप्रयोगादयो विकाराः सुरासुरसाधारणाः संति, स्तोकस्यापि च प्रमादचेष्टितस्य दारुणो विपाकः, येन पिष्टमयकुक्कुटवधोऽपि प्रेक्षध्वं कथं परिणत इत्युक्त्वा, ततः सुरेंद्रदत्तनृपभवादिको जातिस्मरणपर्यंतो निजवृत्तांतः कथितः, तं च श्रुत्वाहोऽकार्याचरणस्य दारुणविपाकतेति जल्पन् राजा संवेगमुपगतः, मातृलोकः शेषलोकाश्च संवेगमुपगताः, ततो मयोक्तं हे तातेदृशमकार्याचरणपरिणामं वीक्ष्य मे चित्तं भवचारकाद्विरक्तं, जि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नवचनप्रतिबोधो विजृंभितः, तस्मात्तातोऽनुजानातु, येन तातप्रभावेणैव मनुजत्वं सफलं कुर्वे इति, ततोऽनादिभवाभ्यस्तमोहदोषेणोत्तरकालमविचार्य तातेनोक्तं हे पुत्र! कस्तव प्रार्थनाभंगं करोति? तव मनुष्यत्वं सफलमेव, तस्मात्तावदेतामीशानसेनपुत्रीं परिणय? ततः सम्यक्प्रजापालनेन महांतं पुण्यस्कंधं कुर्याः? तदा मयोक्तं हे तात मया प्रागेव भवत्पुरो विज्ञप्तं यदुत मे चित्तं भवचारकाद्विरक्तं, तस्मान्मे स्त्रीपरिणयनेनालं, तातेनोक्तं हे पुत्र! दारपरिग्रहस्यापि कश्चिद्दोषोऽस्ति किं? मयोक्तं तात! दारपरिग्रहो नाम निरौषधो व्याधिः, येन मोहस्यायतनं, धृतेरपचयः, व्याक्षेपस्य सभा, शांतेः प्रतिपक्षः, मदस्य भवनं, शुद्धध्यानानां वैरी, दुःखसमुदयस्योत्पत्तिकारणं, सुखानां निधनं, महापापस्यावासः, एतां प्रतिपद्य पंजरगताः सिंहा इव समर्था अपि प्राणिनः परलोकसाधने मनुष्यभावलाभेऽपि सीदंति. अन्यच्च हे तात रत्नखचितेन स्वर्णस्थालेन पुरीषशोधनं न युक्तं, इह संसारे विषयाश्च पुरीषशोधनतुल्याः, जिनवचनबोधसंयुक्तं मनुष्यत्वं चाचिंत्यचिंतामणिसदृशं, कर्मभूमिश्चैषा, चरणानुष्टानं च परमपदसाधनं, तस्मादन्यथाविकल्पेनालं, मह्यं सकलदुःखविनाशिनीं प्रव्रज्यामनुजानीहि?

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो बाष्पार्द्रलोचनेन तातेन जल्पितं हे पुत्रैवमेवैतत्, किंतु परमार्थमपि जल्पंस्त्वं स्नेहकातरं मे हृदयं पीडयसि, मयोक्तं हे तातापरमार्थप्रेक्षिणा स्नेहेनालं, एष स्नेह एवात्र प्रधानं संसारकारणं, यतः—दीवोव्व सव्वलोगो । खणे खणे जायइ विणस्सइ य ॥ संसरइ य णेहवसा । निरुवाउ णो उ उज्झइ ॥ १ ॥ स्पष्टार्था. तातेनोक्तमेवमेवैतत्, किंतु सा तपस्विनीशानसेनपुत्री खेदं प्राप्स्यति, मयोक्तं हे तातैतत्स्तोकं कारणं, अन्यच्च तातस्तस्या अप्येतद्वृत्तांतं निवेदयतु, कदाचित्साप्येतं श्रुत्वा प्रतिबोधं प्राप्स्यति, ततस्तातेन युक्तमेतदिति भणित्वा शंखवर्धनाभिधानः पुरोहितः प्रेषितः, तातेन भणितश्च राजपुत्र्यै यथाश्रुतं निवेदय? तां ब्रूहि चैवं स्थितेऽस्माभिः किं कर्तव्यमिति. शंखवर्धनो गतः, स्तोकवेलयाऽऽगतश्च, अनेन भणितं च हे महाराज कुमारस्य मनोरथाः संसिद्धाः, महाराजः शृणोतु—अहमितो राजपुत्र्याः समीपं गतः, महाराजपुरोहित इति विज्ञाय प्रतीहारेणाहं सबहुमानं प्रवेशितः, राजपुत्र्या अभिनंदितः, आसनं दापितमहमुपविष्टः. ततो मयोक्तं हे राजपुत्रि! किंचिद्वक्तव्यमस्ति, तयोक्तमार्यो भणतु, मयोक्तं हे राजपुत्रि! देवाज्ञेयं, सावधानीभूय श्रोतव्येति. ततस्तया सद्य आसनादवतीर्य यद्गुरव आज्ञापयंतीत्युक्त्वांजलिर्बद्धः, त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तो मयोक्तं हे राजपुत्रीहागछतः कुमारस्य साधुदर्शनेन जातिस्मरणं समुत्पन्नं, नवजवाश्च स्मृताः, तेनोक्ताश्च, तान् भवती शृणोतु—इहैव जारतक्षेत्रे विशालानगर्यस्ति, तत्रामरदत्तो नाम नरपतिरनूत्, इतश्चातीते नवमे जवे तस्य पुत्रः सुरेंद्रदत्तो नामाहमनूवं, मम माता यशोधरा, जार्या च नयनावल्यासीत्, यावदेतावज्जल्पामि, तावद्राजपुत्री मूर्छां प्राप्ता, परिकर आकुलीनूतः, अहं हा किमेतदिति विषम्णः, चंदनपानीयेन संसिक्ता, तया चेतना लब्धा, मयोक्तं हे राजपुत्रि! किमेतत्? तयोक्तं संसारस्य विचित्रता, मयोक्तं कथं विचित्रता? तया प्रोक्तं यतः सैव यशोधराहमतीतपर्याये तस्य कुमारस्य जननीत्युक्त्वा कुमारोक्तनिजकचरितं कथितं. ततो मया जणितं हे राजपुत्र्येतेन व्यतिकरेण कुमारस्य चित्तं जवचारकाद्विरक्तं, स खलु प्रव्रजितुमिछति, ततो महाराजेन जणितमेवं स्थिते किमस्माजिः कर्तव्यमिति, तया भणितं महाराजं विज्ञपय? यथा तात ईदृश एवैष संसारस्वजावः कस्य वा स्वपरविज्ञानवतो विरागं न करोति? तस्मादत्र स्वप्नमात्रविभ्रमेण प्रतिबंधेनालं, कुमारस्य वांछितं संपादय? ममापि च प्रव्रज्यामनुजानीहि? यतो ममापि चित्तं जवचारकाद्विरक्तमेवेति.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एतत् श्रुत्वाहो जीवलोकस्य मायेंद्रजालसदृशतेत्युक्त्वा राजा परमसंवेगमुपगतः, तेन च प्रोक्तं हे पुत्र! न त्वं मम पुत्रः, किंतु धर्मे नियोजनाद्गुरुः, तस्मादस्माकमप्यनेन संसारपरिक्लेशेनालं, अहमपि त्वया सहैव प्रव्रज्यां गृहीष्यामि, एतन्नृपवचः श्रुत्वा राज्ञीभिरुक्तं हे आर्यपुत्रैतद्युक्तं, अत्र नटपेटकोपमेऽशाश्वते जीवलोके प्रतिबंधेन किं? ततो मयोदितं यथासुखं, देवानां प्रियाः! मा प्रतिबंधं कुरुत? ततस्तातेन महादानं दापितं, सर्वार्हच्चैत्येषु पूजा कारिता, स्वजनादिलोकः संमानितः, मम लघुभ्राता यशोवर्धनाभिधानो राज्ये स्थापितः, ततस्तातो मया मन्मातृभिरीशानसेननृपपुत्र्या विनयमत्या प्रधानजनपदेन च सह सुगृहीतनामधेयस्य भगवत इंद्रभूतिगुरोः समीपे प्रव्रज्यामगृहीत. तस्मादेवं मे निजकमेव चरितं निर्वेदकारणमिति. धनकुमारेणोक्तं हे भगवंस्तव निर्वेदकारणं शोभनं, अन्यस्यापि कस्य वा सहृदयस्य न निर्वेदकारणं? एष संसार ईदृश एव, तस्माद्यन्मया कर्तव्यं तद्भगवानादिशतु, यशोधरेणोक्तं हे सौम्य! शृणु?—

चरणधर्मसामग्री दुर्लभा, यतो भगवता भणितं जीवाः खलु द्विविधा भवंति स्थावरा जंगमाश्च, तत्र स्थावराः पृथ्वीजलाग्निमारुतवनस्पतिकायभेदभिन्नाः, जंगमाः पुनः कृमिकीटपतंगगोमहिष-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

शरभवृषभप्रसयप्रभृतयः, तत्र स्थावरत्वमुपगतो जीवः पृथिव्यादिष्वसंख्येयाः, वनस्पतौ चानंता उत्सर्पिण्यवसर्पिणीर्यावत्परिवसतीति. अतः स्थावरत्वाज्जंगमत्वं दुर्लभं, जंगमत्वमपि प्राप्तः सन् कृमिकीटपतंगेष्वनेकभेदभिन्नेषु परिभ्रम्य, ततः पंचेंद्रियत्वं प्राप्नोति, तत्रापि च खरकरभवृषभमहिषादिषु भ्रांत्वा मनुष्यत्वं प्राप्नोति, तत्रापि च शकयवनशबरबब्बरकायमुरंडोड्रगौड्रादिकेष्वाहिंड्यार्यदेशेषु जन्म प्राप्नोति, तत्रापि चंडालडुंबरजकचर्मकारशाकुनिकमत्स्यबंधादिकेषु परिभ्रम्येक्ष्वाक्वादिषु कुलेषु जन्म प्राप्नोति, तत्रापि च काणकुंटकुब्जपंगुमूकांधबधिरव्याधिविकलेंद्रियशरीरकेषु परिभ्रम्य निरुपद्रवशरीरनिष्पत्तिं प्राप्नोति, तत्रापि च दंडकशस्त्ररज्ज्वादिभिर्जीवितोपक्रमैर्यथायुरनुभवं प्राप्नोति, तत्रापि च क्रोधमानमायालोभरागद्वेषांधकारमोहितो धर्मबुद्धिं प्राप्नोति, तत्रापि च बहुविधेष्विंद्रियानुकूलजनमनोरमेष्वज्ञानिप्रवर्तितेषु कुधर्मेषु परिभ्रमन् यथास्थितं सर्वज्ञभाषितं सिद्धिसुखैककारणं धर्मं प्राप्नोति, तत्रापि चानादिभवपरंपराभ्यस्ताशुभभावनातोऽसंप्राप्तपूर्वां सिद्धिवधूप्रथमप्राभृतं श्रद्धां प्राप्नोति, तत्रापि च स्वपरोपकारकारकं महापुरुषसेवितमेकांतेन प्रशंसनीयं चारित्रधर्मं प्राप्नोति, इमं च संप्राप्तो जीवो हे देवानां प्रिय जातिजरामरणरोगशोकविरहितं परमपदमल्पकालेन प्राप्नोतीति. तस्मादेत-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्संपादने उद्यमं कुरु? सर्वसंयोगा अशाश्वताः, मृत्युर्विनिर्जितसुरासुरः सन् प्रभवति, बांधवा एकवृक्षनिवासिपक्षिगणतुल्याः, विषयप्रमादश्च विपाकदारुण इति.

तत एतदुपदेशाकर्णनात्संजातचारित्रपरिणामेन धनकुमारेणोक्तं हे भगवन्ननेनादेशेनानुगृहीतोऽस्मि, तत एतत्संपादयामि, भगवाननुग्रहं करोतु, यावद्भगवतो वृत्तांतं मातापितृभ्यां निवेद्य प्रव्रज्यामंगीकुर्वे इति, भगवतोक्तं यथासुखं देवानां प्रिय! मा प्रतिबंधं कुर्याः. ततो धनेन मातापितृभ्यां कथितः, एतौ प्रतिबुद्धौ, आभ्यां चिंतितं चावयोरेवमशुभपरिणामे भवे प्रतिबंधेनालं, आवयोः पुत्रश्च योग्यस्तस्मादत्र भारं निक्षिप्य प्रव्रज्यामंगीकुर्व इति. अथ धनो भणितो हे वत्स! मणिमौक्तिकादिकं सारं द्रव्यं गृहाण? आवां महापुरुषसेवितां प्रव्रज्यामंगीकुर्व इति, धनेनोक्तं हे तात! युक्तमेतत, संप्राप्तमनुष्यभावेन प्राणिनेदमेव कर्तव्यं, यत्पुनस्तातेन समादिष्टं यथा मणिमौक्तिकादिकं सारद्रव्यं गृहाणेत्यत्र मणिमौक्तिकादिद्रव्यस्य का पुनः सारता? इदं द्रव्यं किं मृत्यो रक्षितुं समर्थं? किं वैतत्प्रभावतो जन्मजरादिका विकारा न भवंति? किमनेन द्रव्येण समर्थस्य याचकवर्गस्य मनोरथापूरणं कर्तुं शक्यते? किंवा प्रयत्नरक्षितमपीदं द्रव्यं क्षीणभाग्यं पुरुषं न

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परित्यजति? किं वा द्रव्यवतो मृतस्य परलोके कोऽपि गुणो भवतीति. श्रेष्ठिनोक्तं हे वत्सैतन्नास्ति, ततो धनेनोक्तं तस्मादभिमानमात्रसाधनप्रायेणानेन किं? ततो मह्यमप्यात्मनः सदृशमनुष्ठातुमनुमन्यतामिति, श्रेष्ठिनोक्तं हे वत्स मयानुमतं, किंतु यौवनस्य विषमा गतिः, इह खल्विंद्रियाणि दुर्दमानि, कामः संसारतरुबीजभूतः प्रभवति, मनोहरा विषया आकर्षणं कुर्वंतीति. धनेनोक्तं हे तातविवेकादन्यन्न खलु यौवनं, अतोऽत्र परमार्थतो न कोऽपि यौवनस्थो न वा वृद्धः, इमे जीवा अविवेकसामर्थ्यतो वृद्धा अप्यत्र जन्मन्यनिवृत्तविषयविषाभिलाषा लोकनिंदामगणयित्वा परमार्थमविचार्यात्मानं विडंबयंतो दृश्यंते. हृदयस्थापितमलेनापि द्रव्यांतरयोगेन कालपरिणामतः शुक्लीभूतानपि केशान् श्यामवर्णान् करोति, अंगकठिनतानिमित्तं च पारदमर्दनं सेवंति, वृद्धत्वदोषभीरुः सन्नन्यत्स्वजन्मकालं कथयति, केचिदप्रवर्तनीये कार्ये प्रवर्तंते, क्षीणमायुर्न प्रेक्षंते, जन्मांतरं च न चिंतयंतीति.

अपरे पुनः स्वभ्यस्तपरलोकमार्गास्तरुणा अप्यत्र जन्मनि विवेकसामर्थ्येन जीवितं विद्युल्लताटोपचंचलं ज्ञात्वा विषयसुखानामसारतां ज्ञात्वा प्रमादचेष्टितस्य दारुणविपाकतां च विज्ञाय मृत्यु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भयभीता हरिणा इव पापहेतुभ्य उत्त्रस्ताः परलोकबांधवं चारित्रधर्मं सेवंतीति, तस्मादत्र यौवनमकारणमिति विज्ञातसंसारस्वरूपस्य विवेकिन इंद्रियाणि न दुर्दमानि, एतैरदांतैरात्मा दुर्गतौ दमनीयो भवति, दांतैश्चेह शमसुखं, परलोके च भवपरंपरया मोक्षसुखमिति जानन् कः पुमानेतानि न दमयति? कामोऽपि चानार्यसंकल्पमूलः, सोऽनार्यसंकल्पैः परित्यक्तैर्वीतरागवचने भाविते प्रशमसुखस्वरूपे उपलब्धे सति गुरुपादमूलममुंचतां प्रतिपक्षभावनां चिंतयतां कथं प्रभवतीति? पुनर्विषयाणां किं वा मनोहरत्वं? एते हि स्पर्शरसरूपगंधशब्दाः पुद्गलपरिणामाः, पुद्गलाश्च विचित्रपरिणामाः शुभा अपि भूत्वाऽशुभा भवंति, अशुभा अपि च शुभाः, किं वै तैरात्मनोऽनर्थांतरभूतैः? एतेषां संयोगः परमार्थतः सुखहेतुर्न, किंतु दुःखहेतुरस्ति, आत्मस्वरूपप्रत्यासन्नताया असंयोगे च प्राणिनः परमार्थतः सुखमिति मन्यमाना जीवान् विषया आकर्षंतीति कथयंति, तस्मात्किमेतया विचारणया? तातप्रभावत एव मेऽविघ्नं भविष्यति, ततस्तेन पित्रांगीकृतं, घोषणापूर्वकं च महादानं दापितं, अष्टाह्निकामहोत्सवश्च कारितः, ततो महापुरुषनिष्क्रमणविधिना मातापितृसमेतोऽन्येन च प्रधानपरिजनेन सह धनकुमारो यशोधराचार्यसमीपे प्रव्रज्यामंगीकृतवानिति. कोऽपि कालोऽतिक्रां-

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

तः, सूत्रमधीतं, क्रियाकलापोऽभ्यस्तः, भावना भाविताः, वैराग्यातिशयत एकाकिविहारप्रतिमां प्रपन्नः, ग्रामे एकरात्रं नगरे पंचरात्रविहारेण विचरंश्च कौशंबीं नगरीं समागतः.

इतश्च स नंदकः प्रभातेऽपि तं धनकुमारं क्वाप्यदृष्ट्वा धनश्रीसमेतः समुद्रमुल्लंघ्य, तस्या वचनेन स्त्रीद्रव्यलोभेन च श्रेष्ठिधनकुमारकृतानि सुकृतान्यगणयित्वा कौशंबीमागतः, समुद्रदत्तनामपरिवर्तनेन च तस्यामेव नगर्यां स्थितः. अथोचितसमये च भगवान् धनकुमारर्षिर्गोचरे प्रविष्टः, तत्रापि च नंदकगृहे धनश्रिया दृष्टः, उपलक्षितश्च. तया चिंतितमेष समुद्रमध्येऽपि किं न विपन्नः? अहो मेऽधन्यता यत्पुनरप्येष दृष्टः. अथवा सांप्रतं तथा करोमि यथा न पुनर्जीवतीति. अत्रांतरे याचनासमयोऽतिक्रांत इति विचिंत्य भगवान्निर्गतः, तदा तस्योपरि धनश्रीरधिकतरं प्रद्वेषं प्राप्ता. अनेनाहमुपलक्षिता, अन्यथा कथं शीघ्रमेव निर्गत इति विचिंत्य चेटी प्रेषिता, हे सख्येष श्रमणः कः? क्व पुनः स्थित इति सम्यग्विज्ञाय शीघ्रं मह्यं कथय? तयोक्तं यत्स्वामिन्याज्ञापयतीति, चेटी निर्गता, एतस्य पृष्टतो लग्ना, भगवान्निजकावसरे विनिर्गतः, तस्य यथोचित आहारो न मिलितः, नगरीदेवताप्रतिबद्धमुद्यानांतरं गतः. अत्रांतरे चरमपौरुष्यवगाढा, भगवान् कायोत्सर्गेण स्थितः. त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तः कंचित्कालं स्थित्वा सा चेट्येष इतो न गच्छतीति ज्ञात्वाऽऽगता, धनश्रियै निवेदितं, तया नंद-को भणितो भगवतः शरीरेऽसमाधौ सति मया भगवत्यै नगरोदेवतायै औपयाचितकं कृतमासीद्य-था कृष्णपक्षाष्टम्यां गृहीतोपवासव्रतया मया त्वदायतने वासः कर्तव्य इति. मम प्रमादतोऽष्टमी चा-तिक्रांता ततो भगवत्याहं स्वप्ने प्रेरिता, त्वं मयि प्रसुप्तायामेव प्रातर्निर्गतः, अतः तुभ्यं न कथितं, अद्य प्रभाते मयोपवासः कृतः, अतोऽहं तत्र गच्छामीति भगवत्याः पूजोपकरणं मम संपादय? नंद-केन संपदितं. ततः कर्मकरद्विकसंयुक्ता पूर्वचेट्या सह धनश्रीस्तदुद्यानं गता, तया तपस्वी दृष्टः. अत्रांतरे सारकाष्ठभरितेन शकटेन शाकटिकस्तमुद्देशमागतः, तस्य चाक्षो भग्नः, ततो दिनकरोऽ-स्तमुपगतप्रायः, कोऽपि काष्ठानि न गृह्णातीति वृषभौ गृहीत्वा निजं गृहं गतः, ततो धनश्रिया चिं-तितं सुंदरं जातं, एतैरेव सारकाष्ठैरेतं धक्ष्यामीति, सा चंडिकायतनं गता, देवतायाः पूजा कृता, कर्मकराभ्यां पानभोजनं दत्तं, एतौ प्रसुप्तौ. ततः सैकाकिन्येव मुनिवरसमीपं गता, अज्ञानक्रोधमूढया तया भगवतः समीपे काष्ठानि विरचितानि, भगवता च ध्यानयोगमुपगतेन लक्षितानि, अग्निः प्र-ज्वालितः, अग्निज्वालावल्या भगवान् स्पृष्टः, तस्य करुणाप्रधानत्वेन ध्यानयोगसंक्रमः संजातः, क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भमित्याह—

स भगवान् कायोत्सर्गेऽवस्थितस्वभावोऽनुकंपागतचित्तो ज्वलदग्नौ ज्वलांश्चिंतयति—इह येऽनुत्तरं मोक्षं गतास्ते सत्पुरुषा धन्याः, यस्मात्ते जीवानां कर्मबंधस्य न कारणभूताः, एष तु कोऽपि जीवोऽज्ञानवशतो मामाश्रित्य दुःखप्रचुरायां दुर्गतौ प्रव्रजिष्यति, अहो बहु कष्टं कष्टमेतस्य दुर्गतिगमनेऽहं निमित्तं, यतो लोकनाथेनेदं प्रोक्तमस्ति, निमित्तविरहेण कार्यसिद्धिर्न भवति, अहं निजदेहं न शोचामि, एतं मोहपरवशं जिनवचनबाह्यमतिं दुःखसमुद्रे निपततं शोचामि, अथवा मोहवशगानां क्लिष्टसत्वानामेतत्कियदस्ति? एष मोहस्वभावो वर्तते, संसारवासं धिगस्तु. इत्थं शुभपरिणामः स साधुस्तया पापया विनाशितः सन् शुक्रदेवलोके पंचदशसागरोपमायुर्देवः समुत्पन्नः. इतश्च सा धनश्रीः सभयापि च चंडिकायतनं गता, तत्र प्रविशंती च चेट्या भणिता हे स्वामिनि? क्व गता आसीः? तयोक्तं न कुत्रापि, परमर्धरात्रसंध्यायां भगवत्याः प्रदक्षिणा कृतेति. अत्रांतरे चेटिकयाग्न्युद्योत उपलब्धः, किमेतदिति विकल्प्यैषा च प्रसुप्ता, रात्रिर्गता, प्रभातं जातं, ततो देव्याः पूजां कृत्वा कर्मकरौ संमान्य धनश्रीः स्वगृहं चलिता, मार्गे च धनश्रिया कर्मकराभ्यां चेटिक-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

या चर्षिर्व्यापन्नो दृष्टोऽहो केनेदमकार्यं कृतमिति कर्मकराभ्यामुक्तं, धनश्रियोक्तं न जानामि, तदा चेटिकाया विकल्पः समुत्पन्नोऽनयाहं भगवतोऽन्वेषणनिमित्तं प्रेषिता, एषा चार्धरात्रसमये निर्गता, मया च तस्यामेव वेलायामुद्योत उपलब्धः, तस्मान्न जानीमः कथमेतत्? एतयाहं नाम महापापा देशे योजितास्येवं. अत्रांतरे शाकटिक आगतः, अनेन चास्थिमात्रशेषमुनिवरो दृष्टः, अनेन चिंतितं चाहो मेऽधन्यता! भगवत उपसर्गकरणेनाहं कस्यचित्क्लिष्टसत्वस्य सहायभावं प्रतिपन्नः, मयात्मा दुर्गतौ पातितः, तस्मादेतन्नरपतये निवेदयामि, अर्धप्रहरमात्रे च दिवसेऽनेन निवेदितं, राजा क्रुद्धः, अनेन दंडपाशिको नियुक्तोऽरे शीघ्रमृषिघातकं लभस्वेति. दंडपाशिको निर्गतः, चंडिकायतनं गतः, अनेन तत्पूजका स्त्री पृष्टा, अद्य पुनरत्र रात्रौ को निवासं कृतवान्? तयोक्तं भुजंगप्रायस्तु न कोऽप्यत्रोषितः, परं समुद्रदत्तस्य गृहिणी धनश्रीरुषिता, दंडपाशिकेनोक्तं किं पुनरत्र तस्या निवासकारणं? पूजकया प्रोक्तं न जानामि, दंडपाशिकेन चिंतितमद्य नाष्टमी, न नवमी, न चतुर्दशी, तस्मात्किं पुनस्तस्या निवासकारणं? विदेशगमननिमित्तं कदाचिदत्र निवासो भवेत्, किंतु तदप्यघटमानकं, यतो गतदिने मंगलवार आसीत्, चरमपौरुष्यां च वृष्टिरासीत्, विनिपातयो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गच्छेति, दुष्टां स्त्रियं विना खल्वेवंविधं कर्मापि प्रायेण न संभवति, तस्मात्तावत्समुद्रदत्तगृहं गच्छामि, तत एव मे सर्ववार्तोपलब्धिर्भविष्यति, एष गतः, तेन च द्वारदेशभागे एव चेटी दृष्टा, एषा पृष्टा, इह सार्थवाहगृहिण्यस्ति न वा? ततश्चेटिकया ससंक्षोभं प्रोक्तं तया समुद्रदत्तगृहिण्या पुनः किं तव प्रयोजनं? ततोऽभिप्रायजल्पननिपुणेन दंडपाशिकेन सक्रोधमिव जल्पितमाः पापे! ऋषिवृत्तांतो विस्मृतः किं? ततः स्वकर्मदुष्टत्वेन कैतवबलिकतया च चेटिकया प्रोक्तं हे आर्य! भगवत एव गवेषणनिमित्तं स्वामिन्याहं प्रेषिता, अन्यत्पुनर्नाहं विजानामि. ततो दंडपाशिकेन नाव संदेहोऽन्यथा किं गवेषणकारणमिति विचिंत्यैषा पृष्टा, हे सुंदरि! भयशंकयालं, किं पुनरुद्दिश्य त्वं भगवतो गवेषणनिमित्तं प्रेषिता? चेट्या प्रोक्तं हे आर्य! गतदिने खलु स भगवांस्तृतीये प्रहरे भिक्षानिमित्तमिह प्रविष्टः, भिक्षामगृहीत्वा शीघ्रमेव च निर्गतः, ततस्तं निर्गच्छंतं प्रेक्ष्य स्वामिन्याहं भणिता, यथा हे मंजरिके! गच्छ? क्व पुनरेष श्रमणकः स्थित इति ज्ञात्वा च शीघ्रं मां कथय? ततो मया कथितं, न पुनः कार्यं विजानामि. दंडपाशिकेनोक्तं ततस्तत्र गत्वा तया तस्य किं कृतं? चेटिकयोक्तं हे आर्य! न किंचित्, स्वामिन्यैष वंदितोऽपि न, अपि च चंडिकायाः पूजा कृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ता, दंडपाशिकेन चिंतितमत एव क्रूरदेवतापूजाविधाननिमित्तं परिवारं विप्रतार्य मुनिर्व्यापादितो भविष्यति, तस्मात्तावत्सार्थवाहगृहिणीं पश्यामि, ततो मुखविकारत एव लक्षिष्ये इति विचिंत्य तस्याः समीपं स गतः, धनश्रीः संक्षुब्धा, दंडपाशिकेन तस्या भावो लक्षितः, अनेन भणिता च महाराजेनाहं प्रेषितोऽस्मि गतदिने यो मुनिर्व्यापादितस्तस्य घातकविज्ञानार्थमिति, त्वं च चंडिकायतने प्रसुप्तासीत्, एष वृत्तांतो मया विज्ञातस्तस्मात्त्वमागच्छ? नरपतिसमीपं गच्छामः, एतच्च श्रुत्वा भयकंपांगी धनश्रीर्भूपीठे निपतिता, दंडपाशिकेन चिंतितमनयेदं कृतमन्यथा कथमेवंविधं भयमित्येषा निर्भर्त्सिता, लोको मिलितः, एवं च जनसमीपाद्व्यतिकरं श्रुत्वा माहं चैवमेव गृहीष्य इति विचिंत्य नंदको निजगृहमप्रविश्य द्वारत एव नष्टः, सा च नरपतिसमीपं नीता, नरपतये वृत्तांतः प्रोक्तः, अनेन विलोकिता, चिंतितं च हं तैतयाऽकृत्या कथमिदमीदृशं क्रूरकर्म भविष्यति? अनेन पृष्टं च कथय त्वं किमर्थं चंडिकायतनं गता आसीः? ततः संक्षुब्धत्वेनानया न जल्पितं, तदा राज्ञः शंका समुत्पन्ना, स्तोकवेलया पुनः पृष्टा त्वं कुतः? कस्य वा पुत्री? ततोऽनया प्रोक्तं सुशर्मनगरात्, अहं पूर्णभद्रस्य पुत्री समुद्रदत्तस्य गृहिणी धनश्रीनामा, तदा राज्ञा तस्या भर्तुर्गवेषणा का-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रिता, परं स नोपलब्धः, ततोऽत्यंतशुद्धस्वभावतया यथास्थितं प्रजापरिपालनशब्दमुद्वहता राज्ञा चिंतितं कदाचिदेषा मत्पुरतः प्रयोजनं कथयितुं न शक्नोति, तस्माद्विस्वस्ता कथयिष्यतीति विचिंत्य कुलप्रवाहपरिपालननिमित्तं पूर्णचंद्रश्रेष्ठिसमीपे एतद्व्यतिकरप्रतिबद्धलेखसंयुक्तो लेखवाहकः प्रेषितः, एषा रक्षिता च, प्रतिदिवसं राजा पृछति, परं सा किमपि न जल्पति, लेखवाहक आगतस्तेन प्रतिलेखः समर्पितः, राज्ञा वाचितः, तत्र लिखितं च मम धनश्रीः पुत्र्यस्ति कुलकलंककारिणी. ततो राज्ञा चिंतितं निःसंदेहमिदमनया कृतं, एषा महापापाऽकार्याचरणशीलैव, अहोऽस्या मूढता! अहो पापकर्मानुष्ठानं! अहो क्रूरहृदयता! अहोऽलौकिकत्वं! तथापि स्त्रीत्यवध्येति विचिंत्यानेन स्वराज्यान्निर्धाटिता, गछंती च सा दिवसांते तृषाक्षुधाभिभूता ग्रामदेवकुलसमीपे प्रसुप्ता, जंगमेन दष्टा, महता परिक्लेशेन जीवितेन विमुक्ता, एषा मृत्वा वालुकाप्रभायां पृथिव्यां सप्तसागरोपमायुर्नारकत्वेनोत्पन्ना. इति संविग्नपक्षीयश्रीमदमृतधर्मगणिशिष्यपाठकश्रीक्षमाकल्याणगणिविनिर्मिते संस्कृतमयसमरादित्यचरित्रे धनधनश्रीपतिभार्याप्रबंधरूपश्चतुर्थो भवः समाप्तः. ॥ श्रीरस्तु ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ अथ पंचमभववर्णनं प्रारभ्यते ॥

वर्धमानं जिनं नत्वा । वर्धमानसुखप्रदं ॥ नृपतापसयोरेव । पंचमं जन्म वर्ण्यते ॥ १ ॥ धनजीवः सुरस्तत्र । भुक्त्वा दिव्यं महासुखं ॥ यत्रोत्पन्नस्ततश्च्युत्वा । सांप्रतं तन्निशम्यतां ॥ २ ॥ अत्र मूलचरित्रगाथा यथा—वक्खायं जं भणियं । धणधणसिरिभो य एत्र पइभज्जा ॥ जयविजया य सहोयर । एत्तो एयं पवक्खामि ॥ १ ॥ पंचमे मनुष्यभवे तौ द्वावपि जयविजयनामानौ भ्रातरावभूतां, तथाहि—

इहैव जंबूद्वीपे द्वीपे भारते वर्षे काकंदीनामनगर्यस्ति, यस्याः परिखाः समुद्रोद्देशा इव पंकजरूपग्राहाकुलाः संति, पुनर्यस्याः प्राकारः पतिव्रताजनमन इव परपुरुषालंघनीयोऽस्ति, तथा यस्या द्वारतोरणानि गिरिकंदराणीव सिंहबालकसमाश्रितानि संति, पुनर्यत्र प्रासादाः शरज्जलधरप्रकरा इव धवला भोगसुंदराः संति, अपि च यस्यां नगर्यां दिवसे यो भर्तुर्विरहस्तेन खिन्नः कुलवधूसमूहो निशामुखे जालांतरपतितैश्चंद्रकिरणैरुपतप्तमनस्को भवति, पुनर्यस्यां नगर्यां गुणनिधिर्लोको वसति, कीदृश इत्याह—गुरूणां विनये उद्यतः, पुनर्याचकजनवत्सलः, पुनः सुखेनाभिगम्यः, पु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नर्धर्मार्थसाधने रक्त इति. तस्यां नगर्यामखंडितनिजभुजपराक्रमः सूरतेजानाम राजा, यस्मिन् रणवासरेषु विकटकटके विशालवंशेऽस्ताचलशिखरे इव राज्ञि सूर्यतेजः प्रतिबिंबितमिव, तस्य च सकलांतःपुरमुख्या मूर्तिमती कामस्त्री इव लीलावती नाम भार्या, तस्य राज्ञोऽनया सह विषयसुखमनुभवतः कोऽपि कालोऽतिक्रांतः. इतश्च स महाशुक्रकल्पवासी देवो निजायुरनुपाल्य ततश्च्युतः सन् लीलावत्याः कुक्षौ समुत्पन्नः, तया च स्वप्ने तस्यामेव रात्रौ प्रभातसमये संपूर्णमंडलः स्वजनमनआनंदकारी ज्योत्स्नामंडितभुवनभवनो मृगलांछनश्चंद्रमा मुखेनोदरं प्रविशन् दृष्टः, तं दृष्ट्वा च सुखजागृतया तया यथाविधि भर्त्रे कथितः, हर्षवशोद्भिन्नपुलकेन च तेन भणिता हे सुंदरि! सकलसामंतचंद्रस्ते पुत्रो भविष्यति, अनया भर्तृवचोंगीकृतं, एषा परितुष्टा, त्रिवर्गसंपादनसुखमनुभवंत्याः प्रसूतिसमयः संप्राप्तः, शुभयोगेन चैषा प्रसूता, तस्याः पुत्रो जातः, निर्वृतिनाम्न्या राजदारिकया नरपतये निवेदितः, अनेन यथोचितं कृतं, मासोऽतिक्रांतः, तस्य च दारकस्य जयकुमार इति नाम प्रतिष्ठापितं, कथानकविशेषेण कुमारभावं प्राप्तः, तेन राजकुमारोचितः कलाकलापः गृहीतः, पूर्वभवभावनातश्च तस्य चारित्रधर्मेऽनुरागोऽभूत्. अन्यदा स कुमारोऽश्ववाहनिकायां निर्गतः, तेन चं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्रोदयोद्याने यथाप्रासुके प्रदेशेऽनेकसाधुपरिवृतः सनत्कुमारो नामाचार्यो दृष्टः, स च कीदृश इत्याह —दीप्ततया सूर्य इव, सौम्यतया चंद्र इव, गंभीरतया समुद्र इव, बहुमूल्यतया रत्नराशिरिव, लावण्यवत्तया काम इव, रम्यतया स्वर्ग इव, निर्वचनीयतया मोक्ष इव, श्वेतंबिकाधिपस्य यशोवर्मणो राज्ञः पुत्रोंगीकृतसाधुलिंगः स्वसमयपरसमयगृहीतसार इति.

तं च दृष्ट्वा कुमारस्य संवेगः समुत्पन्नः, अनेन च चिंतितमहो खल्वेष संसार ईदृशो येनैवंविधैरपि सुरलोकदुर्लभैरयत्नसंपाद्यमानसकलमनोरथैः परित्यक्त इति, तस्मात्कः पुनरेषः? किं वास्य परित्यागविशेषकारणमित्येवं पृच्छामि. तस्य समीपं स गतः, तेन भगवान् सनत्कुमाराचार्यो वंदितः, शेषसाधवश्च वंदिताः, भगवता शेषसाधुभिश्चास्मै धर्मलाभो दत्तः, स गुरुपादमूले उपविष्टः, अनेन च विनयरचितकरतलांजलिपुटं भणितं हे भगवन्नेष संसारोऽसार एव, कस्य वा स्वपरविज्ञानवतो निर्वेदकारणं न भवति? तथापि प्रायेण बाह्यनिमित्तं विनैष न संजायते इति, तस्माद् हे भगवन् कथय तव विशेषनिर्वेदकारणं किं? अथवा किमहं भगवंतमनुजानामि? ततो भगवता चिंतितमहोऽस्य विवेकोऽहो वचनविन्यासोऽकथ्यमाने माऽन्योक्तं संभावयिष्यतीति विचिंत्य भणितं हे सौ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

म्य! शृणु? संसारविचारं विना विशेषकारणमपि नास्ति, तथापि विज्ञातसंसारस्वभावस्यापि भवतः कौतुकमिति ज्ञात्वा कथ्यते—अहमल्पकारणं महाविपाकं च कर्मपरिणामं श्रुत्वा चित्रांगदविद्याधरसाधुसमीपे प्रव्रज्यां प्रपन्नः, तथाहि—

इहैव भारते क्षेत्रे श्वेतंबिकानाम नगरी, तत्र यशोवर्मा राजा, तस्य पुत्रः सनत्कुमाराभिधानोऽहं, जातमात्रस्य च मम ज्योतिषिकेण विद्याधरनरेंद्रत्वमादिष्टं, पितुरतिवल्लभोऽहं कुमारभावे तत्र तिष्ठामि, यावत्केचित्तस्करा गृहीता वध्या नीयंते, ते च बहिर्गतेन मया दृष्टाः, तैश्चोक्तं हे देव! वयं शरणागताः, देवोऽस्मान् रक्षतु, ततो मया ते मोचिताः, नागरिकाश्च रुष्टाः, आरक्षकैर्महाराजाय निवेदितं, राज्ञा प्रोक्तं कुमारो यथा न जानाति, तथा तान् गृहीत्वा नागरिकेभ्यो निवेद्य व्यापादयतेति. तैस्ते व्यापादिताश्च, मयैष वृत्तांतो ज्ञातः, अहं महाराजोपरि रुष्टो नगरीतो निर्गतः, तामलिप्तीं नगरीमागतः, तन्नगरीस्वामिनेशानचंद्रेणैष वृत्तांतो ज्ञातः, स संमुखं निर्गतः, तेनाहं बहुमानविषयीकृतो भणितश्च हे वत्सेदमपि ते निजकमेव राज्यं, तस्मात्सुंदरं कृतं यदिहागतोऽसीति. द्वावपि नगरीं प्रविष्टौ, मह्यं कुमारावासो दत्तः, कियत्सु दिनेषु गतेषु तेनाहं कथापितो यथेप्सितं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जीवनं गृहाणेति, तच्च मया नांगीकृतं. ततस्तत्रैव तिष्टतो ममाविवेकिजनहृदयानंदकारी वसंतसमयः समागतः, मलयाचलवायुर्विजृंभितः, वनोद्यानानि प्रफुल्लितानि, कोकिलारव उच्छ्लतिः, नगरवासिलोका विलोकनार्थं प्रवृत्ताः. एवंविधे च वसंतसमयेऽहमपि विशेषोज्ज्वलवेषो मित्रसमेतो निजगृहादेव क्रीडानिमित्तं तामलिप्तीतिलकसदृशमनंगनंदनं नामोद्यानं प्रवृत्तः, राजमार्गमागतः, गवाक्षोपविष्टया नगरीस्वामिन ईशानचंद्रस्य पुत्र्या विलासवत्या दृष्टश्च, भवांतराभ्यासतो ममोपरि तस्या अनुरागः समुत्पन्नः, गवाक्षपार्श्वे व्रजतो ममोपरि तया स्वहस्तग्रथिता बकुलपुष्पमाला विमुक्ता, मम द्वितीयहृदयभूतेन वसुभूतिना मित्रेण मम कंठदेशभागे निपतिता लक्षिता, मयोर्ध्वं विलोकितं, गवाक्षविनिर्गतं तस्या वदनकमलं दृष्टं, मम हृदये परितोषः समुत्पन्नः, तस्यां प्रेक्षमाणायां च सा मया स्नेहबहुमानं कंठदेशे स्थापिता. अत्रांतरे परितोषविषादगर्भितमीषद्विहसितसंयुतमनया निःश्वसितं, अहं देहमात्रेण तमुद्देशमतिक्रांतो न पुनर्मनसा, अनंगनंदनमुद्यानं प्राप्तः, तत्रापि च मित्रानुरोधेन देहचेष्टया विचित्रक्रीडाप्रवृत्तोऽपि तदेव स्वभावसुंदरं तस्या वदनकमलं चिंतयन् कंचित्कालं स्थितः, उचितसमये तामलिप्तीं प्रविष्टः, उचितकरणीयं कृतं, दिवसोऽतिक्रांतः,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रात्रिः समागता, मम शिरो दुष्यतीत्युक्त्वा मित्रादिकः परिवारः संमान्य शीघ्रमेव विसर्जितः, वासभवनं गतः, शयनीये स्थितः, तत्र चासंभावनीयमननुभूतपूर्वं तथाविधं दुःखातिशयमनुभवतो मे क्षणमात्रलब्धनिद्रं रात्रिरतिक्रांता, प्रातःकृत्यं कृतं, वसुभूतिप्रमुखाः सुहृदः समागताः, तांबूलानि दत्तानि, वयं क्रीडार्थमेव गृहोद्यानं गताः, विचित्रक्रीडाभिः क्रीडितुं प्रवृत्ताः, शून्यहृदयत्वाच्च मम चित्ते वसुभूतिमित्रेण कामविकारो लक्षितः, क्रीडाव्यतिकरे च पूर्णीभूते सति माधवीलतामंडपेऽहं तेन प्रोक्तोऽहो मित्राद्य त्वं दिवसे चंद्र इव कथं पुनर्विछायो दृश्यसे? क्षणं च ध्यानगतो मुनिरिव सकलचेष्टां निरुणत्सि, क्षणं पुनः प्राप्तजयो द्यूतकार इव परितोषमुद्वहसीति. ततो मया कामस्याविमृश्यकारितया द्वितीयहृदयभूतस्यापि तस्याग्रे निजकमाकारं गोपयता जल्पितं न किंचिज्जानामि, वसुभूतिना प्रोक्तमहं जानामि, मयोक्तं किं तत्? वसुभूतिनोक्तं राजकन्यया बकुलमालिकामिषेण तवगुरुकचिंताभार आरोपितः, तया दृष्टिपातछलेन च कामबाणश्रेणिभिर्विद्धः, तज्जनित एष विकारः, अन्यथाऽप्रस्ताव एव ते वदनं कथं परिपांडुरं? अप्राप्तनिद्रासुखे च कथं रक्ते लोचने? हृदयप्रयासकारिणः कथं दीर्घा निःश्वासा इति. तस्मान्मा संतापं कुरु? सा त्वया सह समागममिछति, तया

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्नेहबहुमानं बकुलमालिकादूती च प्रेषिता, अन्यच्चावश्यं भवितव्येषु कार्येषु विधिः सावधानो विधत्ते, एषोऽभिमुखीभूतोऽन्यद्वीपगतमपि प्राणिनं निश्चयेन मेलयति, अहमत्र कंचिदुपायं करोमीति. मयांगीकृतं, तेन विलासवतीधात्रीपुत्र्यानंगसुंदर्या सह प्रसंगः कृतः, आदरणीयपुरुषगुणयोगतश्च सा तेन सह प्रीतिं कृतवती, कियंतोऽपि दिवसा अतिक्रांताः.

ततो वसुभूतिनेह न किंचित्कृतमथवा तस्य बुद्धिविषयो न भवतीति चिंतयन्नहं कामपरवशतयैकतः शयनीये मूर्छित इव मूढ इव मृत इव भीत इव कंपमानहृदय इंद्रियाणि धारयितुमशक्नुवंस्तिष्ठामि यावत्तावत्स्तोकवेलायामेव प्रहृष्टवदनकमलो वसुभूतिरागतः, वदनविकारेण मया लक्षितं यथानेन कार्यं कृतं भविष्यतीति, तेन च भणितं भो मित्र! विषादं परित्यज? आनंदमंगीकुरु? तव वांछितं संपन्नं, मयोक्तं कथं? तेनोक्तं शृणु? अहमद्यानंगसुंदरीगृहं गतः, मया चानंगसुंदरी विछायवदना दृष्टा, भणिता च हे सुंदरि! किं पुनस्ते उद्वेगकारणं? यद्यकथनीयं न भवति तर्हि कथय? तयोक्तं दुःखदग्धेन हृदयेन दुःखं कथ्यमानमादर्शे प्रतिबिंबमिव यस्मिन् दुःखं न संक्रमति तस्याग्रे कथनेन किं? मयोक्तं हे सुंदरि!—विरला जाणंति गुणा। विरला विरयंति ब-

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

लियकवाइं ॥ सामत्थधणा विरला । परदुक्खे दुक्खिया विरला ॥ १ ॥ तथापि मे तव मनोरथसंपादनेऽस्ति, तयोक्तं यद्येवं तर्हि शृणु?—महाराजपुत्री विलासवतीनाम कन्यकास्ति, सा मम निजदेहाप्यात्मना निर्विशेषा, तस्यांत्यावस्था वर्तते, ततो मयोक्तं किं पुनरत्र कारणं? तयोक्तं कामविकारः, मयोक्तं निर्जितसुरासुरस्य रतिहृदयानंदकारिणः कामस्य शासनं केन पुनर्जगत्रता वीतरागेणापि च खंडितं? तयोक्तं खंडितं न खंडितमिति न जानामि, मम पुनरेतावान् संतापोऽस्ति यत्तस्या मनोरथविषयः पुमान्न ज्ञायते, मयोक्तं कथं? तयोक्तं शृणु?—मदनमहोत्सवे नागरिकवृंदेषु विनिर्गतेष्वनया यस्तरुणः पुमान् दृष्टः, अनुमानतो विजानामि मूर्तिमान् काम इव, अन्यथा कथमीदृशोऽन्यस्मिन् लघीष्ठे वरेऽभिलाषः? यतो लक्ष्मीः कमलं विनान्यवनानि न प्रार्थयते, तया तस्योपरि स्वहस्तग्रथिता बकुलमालिका च मुक्ता, सा तस्य कंठदेशे निपतिता च, तत ऊर्ध्वमवलोक्यते, नान्यजनसंपातभीरुकतया तस्या हृदयमिव गृहीत्वा कंठे स्थापिता च, स चाग्रे चलितः, विलासवत्यपि च तत्प्रभृत्येव परित्यक्तनिजव्यापारा कामेन तथा कृता यथा कथयितुमपि न शक्यते, एष वृत्तांतो मया बर्बरिकाचेटीसमीपाद्राजपुत्रीतश्च विज्ञात इति, सा मया समाश्वासिता हे स्वा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मिनि ! विषादेनालं, स्वामिनीं हृदयवल्लभेन सह मेलयामि, चंद्रेण कौमुदी न खंड्यते, इत्युक्त्वा हेरकलोचनैः स विलोकितो न पुनरुपलब्ध इति. ततश्च साद्य कामविकारत एवानिष्पादितकार्यां मां ज्ञात्वात्युत्कंठापराधीनहृदया संक्रांतदुःसहशरीरसंतापं शयनीयं परित्यज्य सखीजनमवलंब्योपरितलमारूढा, दक्षिणदिक्पवनेन च विशेषप्रज्ज्वलत्कामाग्निरुष्णं दीर्घं च निःश्वस्य तमेव राजमार्गोद्देशं विलोकितुं प्रवृत्ता, तस्या दृष्टिश्चाश्रुपातजलेनाधिकतरं प्रक्षालिता, ततोऽकस्मादेव रुणझणरवमुखरमणिवलयं करपल्लवयुगलं कंपयंती मूर्छामुपगतेति.

ततोऽहं संभ्रांतः सन्नुत्थितः, वसुभूतिर्भणितश्च हे मित्र ! सा हृदयानंदकारिणी कुत्रास्ति? मह्यं दर्शय? तस्यामतिपीडितायां मे जीवितेनालं, वसुभूतिनोक्तं हे देवैतत्खलु वृत्तं कथावसानमपि तावद् हृदयानंदकारकमेव, तद्देवः शृणोतु, ततो लज्जानम्रवदनकमलोऽहमीषद्विहस्य मौनेन सुप्तः, वसुभूतिनोक्तं ततो हे देव सखीभिरुत्संगशयनीये स्थापिता, मया बाष्पजलसिक्तेन तालवृंतेन वीजिता, तस्या वक्षःस्थले स्वभावशीतलं चंदनं दत्तं, मृणालिकावलयहार उपनीतः, तया कथमपि चेतना लब्धा, अलब्धनिद्रेषद्रक्तं लोचनयुगलमुन्मीलितं, मयोक्तं हे स्वामिनि तव किं बाधते ? ततः कामवि-

P.P. Ac. Gunratnasuri M.S.   Jun Gun Aaradhak Trust

कारस्योत्कटतया सखीजनमनपेक्ष्य तयाऽव्यक्तमेव जल्पितं तस्यादर्शनमेवेति. ततो मया तस्याः समाधानार्थमसत्यमेव जल्पितं हे स्वामिनि! धीरा भव? मया तस्य प्रवृत्तिरुपलब्धा, अवसरे तं विज्ञपयिष्यामीति. ततस्तया विहसितं, मह्यं कटिसूत्रकं च दत्तं. अत्रांतरे तस्या जननी समागता, तया भणिता च हे विलासवति पुत्रि! वीणां सारय? यतो महाराजेनाज्ञप्तमद्य त्वया वीणाविनोदः कर्तव्य इति. ततो गुरुजनलज्जालुतया तया जल्पितं यद्येवं तर्हि शीघ्रं वीणावादनाध्यापिकामाह्वयत? वीणावादनाध्यापिकाहूता. अत्रांतरेऽहं किंकर्तव्यमूढा राजपुत्र्याऽविसर्जितैव राजगृहान्निर्गता, स्वगृहमागता, विशेषेण स पुमान् गवेषितः, तत्प्रवृत्तिर्न लब्धा. ततः किं पुनरहं स्वामिन्यै विज्ञपयिष्यामीति चिंतापिशाचिकया समाध्यासिता, तस्मान्मे एतदुद्वेगकारणमिति. ततो मयोक्तं त्वं चिंतापिशाचिकां परित्यज? तं युवानमहं जानामि, तस्मात्तथा करिष्ये यथा ते स्वामिनी सुखिनी भविष्यतीति. अनंगसुंदर्या प्रोक्तं त्वं कथं जानासि? को वा स युवा पुमानिति तावत्कथय? मयोक्तमात्मना निर्विशेषो मम वयस्योऽथवा स्वामिशालोऽतो विजानामि, स पुनः श्वेतंबिकाधिपस्य महाराजश्रीवर्मणः पुत्रः सनत्कुमारो नाम, क्रीडानिमित्तमनंगनंदनवनं प्रस्थितस्य तस्य तया बकुल-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मालिका प्रेषिता, तेन बहुमानविषयीकृता च, अनंगसुंदर्या प्रोक्तं यद्येवं तर्हि ते स्वामिशालेनालं, य एवं स्वामिनीहृदयं ज्ञात्वापि निरुद्यमस्तिष्ठति. मयोक्तं न निरुद्यमः, किंतूपायं विचिंतयति कथं पुनः प्रशस्तेन विधिनैषा प्राप्तव्येति. अनंगसुंदर्या प्रोक्तं समानरूपानुरागकुलकन्यकाहरणमपि प्रशस्तमेवं विधिः, मयोक्तमेतदस्ति, किंतु महाराजः सनत्कुमारस्यात्यंतस्नेहवान्, यतः सर्वस्थानेषु गतिप्रसरोऽप्रतिहतोऽस्ति, महाराजेन तस्य सबहुमानं जीवनं चोपन्यस्तमस्ति, तस्मात्कदाचित्प्रार्थित एव दास्यतीति, तस्मात्किमेतेन हरणेन? एतं वृत्तांतं स्वामिन्यै तावन्निवेदय? उपायं च चिंतय? कथं पुनरेतयोर्दर्शनं संपत्स्यते? अनंगसुदर्या प्रोक्तमेतन्निवेदयामि. दर्शनोपायः पुनरहं स्वामिनीं मंदिरोद्यानं नेष्यामि, त्वमपि च कुमारं गृहीत्वा तत्रैव सन्निहितो भवेरिति, मया च तदंगीकृतं, सांप्रतं त्वं प्रमाणमिति.

तत एतत् श्रुत्वा मोहदोषेणाहं सर्वसौख्यानामपि पारमिव प्राप्तः, प्रीत्यापि च प्रीतिं प्रापितः, धृत्यापि च धृतिमवलंबितः, उत्सवेनापि च मे उत्सवः कृतः, वसुभूतये कटकयुगलं दत्तं, एष भणितश्च हे मित्राहं भवंतं न खल्वप्रमाणीकरोमीति. आवां तदुद्यानं गतौ, तत्र च वृक्षशास्त्रनिपुण-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुरुषसंपादिताकालदोहदप्रसूतविकारोपलक्ष्यमाणस्वरूपाः सर्वे ऋतवो दृष्टाः, प्रथममेव कुसुमिततिलकाशोकसिंदुवारमंजरीमनोहरो वसंतो दृष्टः, ततो विकसितसुरभिमल्लिकाकुसुमशोभितो ग्रीष्मः, ततः कदंबकुसुमगंधानुवासिघनागमकालः, ततो गजेंद्रमदगंधानुवासितसप्तच्छदकुसुमसमुद्गमः शरत्कालः, ततः परिपिंजरप्रियंगुमंजरीकृतावतंसो हेमंतः, ततो विजृंभितोद्दामकुंदकुसुमहरहासधवलः शिशिरसमय इति. ततस्तदुद्यानं दृष्ट्वा मया चिंतितमहो इयमुद्यानर्द्धिर्मनुष्यलोके दुर्लभा, तत्र च यावत्स्तोककालं तिष्ठामि तावदनंगसुंदर्यागता, तया च भणितं हे कुमारासनग्रहणेनैतच्चंदनगृहमलंकुरु? ततो मया वसुभूतिवदनं विलोकितं, तेन च प्रोक्तं यदेषा वदतीति. तत आवां चंदनलतागृहं गतौ, तत्र च जलधरोदरविनिर्गता तारागणपरिवृता चंद्रज्योत्स्नेव कलहंसीपरिवारा राजहंसीव ऋतुलक्ष्मीपरिगता कामस्त्रीरतिरिव चित्तानुकूलानुरक्तनिपुणसखीजनमध्यगता विलासवती राजकन्या दृष्टा, सा च कीदृशीत्याह—

रक्तोत्पलतुल्यतलाभ्यां कूर्मोन्नताभ्यां घनसरलकोमलांगुलिविभूषिताभ्यामलक्ष्यमाणशिराजालमनोहराभ्यां निर्मलनखमयूखसमूहप्रतिबद्धपरिवेषमंडलाभ्यामलब्धहृदयप्रवेशेन पूर्वसेवासंपादनोपा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यचतुरेणेवालक्तकरागेणांगीकृताभ्यां चरणाभ्यां, तथा चरणानुरूपाभ्यामेव निर्मलसुकुमालाभ्याम-
कृतकुंकुमरागपिंजराभ्यां जंघाभ्यां, तथा कामस्य तूणीरयुगलतुल्येन प्रकामप्रबलेन निरंतरेणेवोरु-
द्वयेन, तथोत्तप्तकनकमयनिर्मितेनेव पीवरेण घटितविमलमणिमेखलाभरणेन कामगृहेणेव विस्ती-
र्णेन नितंबेन, तथा सकलत्रैलोक्यलावण्यपानीयस्थानेनेव स्वभावगंभीरेण नाभिमंडलेन, तथा
कुसुमायुधधनुर्लताविभ्रमया तनुमध्यमंडनया रोमराज्या, तथा यौवनारोहणसोपानभूतत्रिवलिसंयु-
क्तेन मध्येन, तथा लावण्यातिशयलंपटेनेव कामेन समालिंगिताभ्यां वक्षःस्थले प्रादुर्भवद्भ्यां स्त-
नाभ्यां, तथा सुप्रतिष्ठिताभ्यां बाहुलतिकाभ्यां तथाशोकपल्लवविभ्रमाभ्यां सुप्रशस्तरेखालंकृताभ्यां प-
र्यंतमाणिक्यखचितकनककटकसंयुताभ्यामनुचितकार्याकराभ्यां कराभ्यां, तथा वर्तुलया महामुक्ताफ-
लमालावेष्टितया त्रिरेखालंकृतया ग्रीवया, तथा बंधूकपुष्पतुल्येन स्वभावरक्तेनाधरेण, तथा विनि-
र्जितकुंदकुसुमशोभैर्विनिर्गच्छन्मयूखजालशोभितैर्दंतैः, तथोत्तुंगेन स्वभावरमणीयेन नासावंशेन, त-
था कांतिप्रतिपूरिताभ्यां विनिर्जितचंद्रबिंबशोभाभ्यामशोकपल्लवावतंसकपतितप्रतिबिंबाभ्यां गंडपा-
र्श्वाभ्यां, तथा विकसितनवीनकुवलयदलकांतिसुकुमालाभ्यां सुपक्ष्मलाभ्यां दर्शनगोचरापतितजनम-

P.P. Ac. Gunratnasuri M.S.　Jun Gun Aaradhak Trust

नश्चानंदनाभ्यां नयनाभ्यां, तथा राहुग्रहेषद्गृहीतमृगांकमंडलसदृशेन सुस्निग्धालकाकुलेन ललाट-पट्टेन, तथा वदनानुरूपाभ्यां जात्यतपनीयतलवर्तिकायुक्ताभ्यां प्रलंबकर्णाभ्यां, तथा जिनध्यानाग्नि दह्यमानमदनधूमोद्गारेणेव कृष्णकुटिलेन मालतीकुसुमदामसुरभिगंधाकर्षितभ्रमन्मुखरभ्रमरावलिपरि-वृतेन केशकलापेन त्रिभुवनैकसुंदरपरमाणुविनिर्मितामिवाप्रतिरूपां रूपशोभां धारयंतीषद्विहसिताऽर-ब्धसखीजनकथाप्रबंधा विमलमाणिक्यखचितकनकासनोपविष्टा, ईदृशी विलासवती दृष्टेति.

ततस्तां दृष्ट्वा मोहांधकारदोषेण परमार्थमविलोक्याहं तयाक्षिप्रांतविलोकितः, स्फुरद्बाहुयुगल-श्चिंतितुं प्रवृत्तः, कथमित्याह—अहमिति वितर्कये, एतां सुरसुंदरीरूपातिशयां विनिर्मितां दृष्ट्वा स्थि-तस्य विधेरप्यात्मनिश्चितं बहुमान आसीदहो कीदृशीयं मया विनिर्मितेति. पुनर्विधिना कामं बाणा-ग्रस्थभल्लीविकलं ज्ञात्वा जनहृदयभेदनसमर्थैषा हस्तभल्लीव विनिर्मिता. अत्रांतरेऽहं तस्या दर्शनगो-चरं समागतः, तया सस्नेहमारक्तकृष्णश्वेताभ्यां चलत्तारकाभ्यां नेत्राभ्यामहं विलोकितः, लज्जयापि चानालोचनीयमवस्थांतरमनुभवंत्येषा समुत्थिता. ततो मयोक्तं वसंतलक्ष्म्याः स्वागतं, हे सुंदरि! सं-भ्रमेणालं, अत्रांतरे तदेवासनमुपदर्श्यानंगसुंदर्या प्रोक्तं कुमारो विलासवत्यासनमुपविशतु. इति ब-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हुमानेनाहमुपविष्टः, कलधौतमयपात्र्यां मे तांबूलं चोपनीतं, तच्च गृहीत्वा मयोक्तं राजपुत्र्युपविशतु, एषोपविष्टा, वयं कियद्वेलां तत्र स्थिताः. अत्रांतरे मित्रभूतिर्नाम कन्यांतःपुररक्षकः समागतः, तेनाहं नमस्कृतः, मयापि च संभाषितः, तेन च प्रोक्तं हे विलासवति! महाराज आज्ञापयति त्वया वीणावादनं विस्मृतं, गतदिने महाराजः कुपितः सन्नेवमुक्तवान्, तस्माच्छीघ्रं तद्वीणावादनं स्मर? अद्य पुनस्त्वया वीणा वादनीयेति. ततो यन्महाराज आज्ञापयतीत्युक्त्वा सा द्रुतं निर्गता, अथ तेन कंचुकिना समेता कुमारं तिर्यग्दृष्ट्या विलोकयंती मंदगत्या मदनशरघातभीतेव कंपमाना स्वभवनं गता.

ततो वसुभूतिनोक्तं हे मित्र! त्वमागच्छावां गच्छावः, विलासवत्या विनेहावस्थानेन किं? आवां निर्गतौ, उद्यानद्वारदेशभागेऽनंगवतीनाम्न्या राजपत्न्या दृष्टौ च, कामस्याकार्याचरणकुलगृहत्वेन तस्या अपि ममोपर्यभिलाषः समुत्पन्नः, आवां स्वगृहं गतौ, दिवसप्रांते चानंगसुंदरी सिंदुवारकुसुमानि विलेपनसंयुक्तं च तांबूलं गृहीत्वागता, तया प्रोक्तं च हे कुमार! स्वामिन्या विज्ञसमेतानि स्वहस्तग्रथितानि सिंदुवारकुसुमान्यार्यपुत्रेणावश्यं परिधानीयानीति. ततोऽनेनोपन्यासेन मे वां-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ज्ञितमंगीकृतमिति विचिंत्य यदेव्याज्ञापयतीत्युक्त्वा कुमारेण कुसुमदाम गृहीतं, मस्तके विरचितं, विलिप्तोऽपि प्रियतमाबहुमानेन पुनरप्यात्मा विलिप्तः. ईषल्लज्जां मुक्त्वा तांबूलं समानीतं. अत्रांतरे वसुभूतिना प्रोक्तं हेऽनंगसुंदरि! त्वया प्रियमित्रस्य विनीतत्वं दृष्टं? तयोक्तमीदृशेषु पुरुषेषु विनयो नाश्चर्यमिति. ततः कांचिद्वेलां गमयित्वानंगसुंदर्युत्थिता, मया च तस्यै भुवनसारनामकं कंठाभरणं दत्तं, एषा भणिता च हे सुंदर्येतत्तव स्वकीयं गृहं तस्मादिहागमने खेदो न कर्तव्यः. ततो यत्कुमार आज्ञापयतीत्युक्त्वानंगसुंदरी गता. प्रवर्धमानानुरागयोः कतिचिद्दिवसा अतिक्रांताः.

अन्यदा च राजकुलान्निर्गच्छन्नहं चेटिकया भणितो हे कुमार! महाराजपत्न्यनंगवती भणति यद्यतीवोपरोधो न तर्हि कुमार इहागच्छतु. ततो महाराजस्य विश्वस्ततया मातुरप्याज्ञासंपादने उपरोध इत्युक्त्वानंगवतीसमीपं प्रवृत्तः, द्वारप्रवेशे च मे वामलोचनं स्फुरितं, तथापि चोपरोधशीलतयाहं प्रविष्टः, सा च वामकरतलन्यस्तं परिभ्रष्टकपोलपत्रलेखं वदनकमलमुद्वहंती मया दृष्टा, सादरं प्रणता, तया चास्पष्टाक्षरं यथा स्यात्तथा जल्पितं हे कुमाराहं शरणागता, मां त्रायस्व? मयोक्तं हे मातः! कुतो भयं? ततो मदनविकारनिर्भरया दृष्ट्या मां विलोक्य तयोक्तं हे कुमार! कामात्,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यत्प्रभृति मया मंदिरोद्यानान्निर्गच्छंस्त्वं दृष्टस्तत्प्रभृति मम चित्ते कामः पंचबाणोऽपि दशकोटिबाणः संवृत्तः, तस्माद् हृदयेन समर्पितं त्वया निजगुणैर्बद्धमनुरागेण धारितं मदनबाणैः शल्यितं मे शरीरं स्वसंयोगेन शीतलं कुरु? ते च शक्तिमंतः पुरुषा ये प्रार्थनावत्सलाः समापतितकार्या उत्तरकालं न गणयंति, दीनोद्धारं कुर्वंति, परमनोरथान् पूरयंति, शरणागतं च रक्षंति, तस्मान्मामस्मात्कामाद्रक्षेति. तत एतदाकर्ण्य वज्रेण ताडित इव, शूलेन भिन्न इव, मर्मसु प्रहत इव, जीवितेन मुच्यमान इव च महद्दुःखमनुप्राप्तोऽस्मि. ततो विषयातुराणामकरणीयं नास्तीति विचिंत्य मया जल्पितं हे मातरिममुभयलोकविरुद्धमनार्यसंकल्पं परित्यज? आत्मनो महाकुलं विचिंतय? महाराजसंबंधिनो गुणान् प्रेक्षस्व? एष कामः संकल्पयोनिर्नरकगमनैकहेतुश्च प्रोक्तोऽस्ति, तस्मादेतैः संकल्पैरपरित्यक्तैरेष न निवर्तते, तव चरणवंदनं विना तव शरीरेण ममोपयोगो नास्ति, शक्तिमंतोऽपि च ते पुरुषा ये धर्मं न त्यजंति, शीलं न खंडयंति, आचारं न लंघयंति, वचनीयं न कुर्वंति, उचितेषु न मुह्यंति, कामादात्मपरिरक्षणमपि च विवेकसन्नाहं विना न भवति, अन्यच्चाहं यदि तव वल्लभोऽस्मि, तर्हि क्षणिकसुखमेव बहुमत्वा मामविध्याताग्निज्वालावलीभीषणे नरके कथं पातयसि?

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अत इममविवेकिजनबहुमतं कामाभिलाषं परित्यज? स्वामिशालिनी चासि, अत एवं ब्रवीमि, यतः—जा पावं कुणमाणं । अणुयत्तइ सामियं च मित्तं वा ॥ सा णरयपडियस्सा । कहेइ कंरुज्जुयं मग्गं ॥ १ ॥ अत्रांतरे लज्जानम्रवदनयानंगवत्या प्रोक्तं हे कुमार! साधु साधु तव विवेकभचितः, मयापि रूपशीले विरुद्धे इति लोकवादजिज्ञासार्थमिदमुक्तं, न पुनः परमार्थत इति, तस्मात्कुमारो गच्छतु, ततोऽहं तस्याश्चरणयुगलं प्रणम्य ततो निर्गतः, निजगृहं गतः, काचिद्वेलातिक्रांता, तदा नरपतेर्द्वितीयहृदयभूतो विनयंधरो नाम नगररक्षकः समागतः, तेन भणितं हे कुमाराहं किंचिद्वक्तुकामोऽस्मि, तस्मात्कुमार आत्मानमेकांतस्थमाज्ञापयतु, ततो मया वसुभूतिप्रमुखाः सुहृदोऽवलोकिता अपगताश्च, तेन च प्रोक्तं हे कुमार! सावधानः सन् शृणु?—

भवतः पितृराज्ये शक्तिमतीनामसन्निवेशोऽस्ति, तत्र वीरसेनः कुलपुत्रकः, स चात्यंतदानभ्यसन्यभिमानधनो दयालुः शूरो गंभीरः शरणागतपरिरक्षणबद्धकक्षः, तस्य च कल्पपादपस्येव परार्थसंपादनेन सकलं जन्मानुभवतः कोऽपि कालोऽतिक्रांतः, तस्य स्त्री सगर्भा जाता. ततः स तां गृहीत्वा महता भटपरिकरेण तस्याः कुलगृहं जयस्थलं नाम नगरं गंतुं प्रवृत्तः, मार्गे श्वेतंबिकां न-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गरीं प्राप्तः, तस्या बाह्यभूमावावासितः. अत्रांतरे श्वाससमापूरितमुखो भयकातरचक्षुः क्षीणगमनशक्तिः कंठगतप्राणस्त्वरितं त्वरितं कोऽपि कुलपुत्रः समागतस्तेन भणितं च हे आर्याहमार्यस्य शरणागतः, मां परित्रायस्व? परित्रायस्व? कुलपुत्रकेणोक्तं हे भद्र! भयेनालं, मम प्राणेषु विद्यमानेषु भद्रस्य केशमपि क उत्पाटयति? स्त्रिया प्रोक्तं हे आर्यपुत्र! मैवं कुरु? कदाचिदयं दोषकारी भवेत्, कुलपुत्रकेणोक्तं हे सुंदर्यदोषकारी किं शरणं प्रपद्यते? तस्मात्किमेतेन? यो भवतु स भवतु. मयांगीकृतः, एष भणितश्च हे भद्रोपविश? तेनोक्तं हे आर्य! यमतुल्यहस्तिलंघितानि मृगकुलानीव मेंगानि सीदंति, भयव्याप्तस्त्रीहृदयमिव मे सक्थिनी थरहरायेते, परनिंदायां सज्जनस्य वाणीव च मे गतिर्न प्रसरति, अर्थिजनोल्लापा इव च पदे पदे चरणौ स्खलतः, यमस्येव च यशोवर्मणो राज्ञो निर्देशकारिणः पुरुषा आसन्नीभवंतीति. कुलपुत्रकेणोक्तं हे भद्र! भयेनालं, मयि जीवति तव कुतोऽपि भयं नास्तीति, तस्माद्विषादं परित्यज? आवासांतरे उपविश? अत्रांतरे राजपुरुषाः समागतास्तैरुक्तं चारे पापकर्मंश्चंमां नृपाज्ञामतिक्रम्याद्यापि जीवितं धारयसि? यदि पातालं व्रजसि, सुरपतिं वा शरणं गच्छसि, जलनिधिं वा प्रयत्नेन लंघसे, तथापि जीवितं न प्राप्नो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षि, हे कुलपुत्र! यदि वयं न प्रमाणं, तथाप्येतं पापकर्माणं समर्पय? नृपकोपानलज्वालावल्यां पतंगत्वं मा प्रपद्यस्व? कुलपुत्रेणोक्तं हे भद्राः सत्पुरुषाणां नैव मार्गो यच्छरणागतः समर्प्यते, तैरुक्तं यद्येवं तर्ह्येतं परिरक्ष? बलाद् गृह्णीम इति, तेनोक्तं मम प्राणेषु विद्यमानेषु क एनं गृह्णातीत्युक्त्वा खड्गो गवेषितः, तस्य परिवारः सन्नद्धः, ततो राजपुरुषैर्माऽस्माकमपराधो भवत्विति विचिंत्य तत्स्थानान्निर्गत्य महाराजाय निवेदितस्तद्व्यतिकरः, तेन च प्रोक्तं मदाज्ञालोपकमपि यो मे शरणागतमित्युक्त्वा रक्षति, तं शीघ्रं व्यापादयत? ततोऽधिकतरं नरेंद्रसैन्यं समागतं, कुलपुत्रकस्यावासभूमिर्वेष्टिता, युद्धं प्रवृत्तं. अत्रांतरे बाह्यभूमितो महताश्ववृंदेन यशोवर्मकुमारः समागतः, तेन पृच्छा कारिता रे किमेतत्? राजपुरुषैश्च तस्म राजकुमाराय सर्वोऽपि वृत्तांतः कथितः, तेन च प्रोक्तमरे मय्यव्यापादिते शरणागतवत्सलं को व्यापादयति? पित्रे निवेदयत? ततो युद्धमुपशांतं, राज्ञे निवेदितं, तेन च चौरग्रहणमनादृतं, पुत्रवचनमंगीकृतं, हे भद्र! विश्वस्तो भवेति कुलपुत्रकं बहुमान्य कुमारो गतः, तस्कर संमान्य शिक्षां च दत्वा कुलपुत्रको मासद्वयमात्रेण कालेन तज्जयस्थलं नगरं प्राप्तः, तस्य स्त्री प्रसूता, तस्याः पुत्रो जातः, हे कुमार! स पुनरहमेव, तस्मादेवं सकललसत्वो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पकारकोऽपि ते पिता मम तातस्य मातुश्च मम विशेषत उपकारीति कुमाराय निवेदितं, कारणं पुनरिदं—

अद्य खल्वीशानचंद्रमहाराजो बाह्यभूमितः समागतमात्र एवानंगवतीगृहं प्रविष्टः, तेन च न-खविलिखितानना बाष्पजलधौतकपोलपत्रलेखानंगवती दृष्टा, भणिता च हे सुंदरि! किमेतत? त-योक्तं शीलपरिरक्षणविपाकः, राज्ञोक्तं सुंदरी कथयतु यमस्य कः स्मृतावायातः? तयोक्तं मया म-हाराजाय न विज्ञप्तमेव, अनेनासंबद्धप्रलापेन किं? अथवा मां प्रार्थयमानस्य सनत्कुमारस्य कत्य-पि दिवसा अतिक्रांताः, मया च तन्नांगीकृतं, अद्य पुनः स्वयमेवागत्य तस्य हृदयवांछितमनंगीकुर्वा-णाहमेवं कदर्थितास्मि. ततो राजा कुपितस्तेन च प्रोक्तमरे विनयंधर! शीघ्रं तं दुराचारं कुलकलं-कभूतं व्यापादय? मयोक्तं यद्देव आज्ञापयति, राज्ञा प्रोक्तं तथा त्वया मारयितव्यो यथा न कोऽ-पि जानाति, ततो मया चिंतितमहोऽहं दारुणे कार्ये नियुक्तोऽस्मि, नरेंद्रप्रत्यासन्नतैवंफला भवति, धन्याः खलु ते जना ये दुर्जनरहितानि तपोवनानि सेवंति, हा किमत्र कर्तव्यं? यदि स दीर्घायु-र्न व्यापाद्यते तर्हि शोभनं भवति, चिंतापिशाचिकयाहं समधिष्ठितः, तथापि नृपादेशोऽलंघनीय

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्येतद्व्यतिकरेण यावत्प्रवृत्तः, अत्रांतरे केनापि तोरणप्रदेशे क्षुतं, तदाकर्ण्य विलंबमानः सिद्धादेशनामनैमित्तिकेन भणितो हे भद्र विनयंधर! मा विलंबं कुरु? यतः सौम्या नामैषा छिक्का श्रेष्ठारोग्यफलानंतरा पूर्वार्थलाभोत्तरा च, तथा चेदं पूर्वर्षिभिरुक्तं—पच्छिसेहमज्झत्तं । वा हाणिं वुड्ढिं खयं असिद्धिं च ॥ आरोग्गमब्भलाभं । छीयंमि पयाहिणदिसासु ॥ १ ॥ तस्मादस्याश्छिक्काया एष विपाकः, पुनर्निमित्तांतरयोगतो जानामि, राज्ञा निर्दोषवस्तुविषयस्ते विरुद्धादेशो दत्तः, भवतोऽनिष्टश्च, तस्मान्मा संतापं कुरु? यथा त्वं चिंतयसि तथैव परिणस्यति, किंतु शीघ्रं प्रवर्तस्व? अन्यथाशोभनं परिणमति, ततो मया चिंतितमयं सिद्धादेशः, अस्यानेके प्रत्यया दृष्टाः संति, एतच्चैवंविधं कार्यं, महाराजस्य कोपश्च विज्ञापनागोचरः, एतत्सर्वथा विषममिति चिंतयन्नहं निजगृहं गतः, हा को नूनमिहोपाय इति चिंतयन्नुद्वेगेन गृहीतः, जनन्या पृष्टश्च हे पुत्र किमेवमुद्विग्न इव लक्ष्यसे? ततो मया जननीतोऽप्यपरं विश्वासस्थानं नास्तीति विचिंत्य तस्यै स वृत्तांतः प्रोक्तः, तया च भणितं हे पुत्र त्वयेदमकार्यं न कर्तव्यं, एष खल्वस्मत्कुलोपकारिणः पुत्र इति सर्वो वृत्तांतस्तुभ्यं कथितः, तस्मादेवं व्यवस्थिते कुमारः प्रमाणमिति.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विनयंधरस्तूष्णीकः स्थितः, ततो मया चिंतितमहो स्त्रीवर्गस्य मायाशीलता! अथवा नारी नाम भुजंगमगतिरिव कुटिलहृदया, विद्युदिव दृष्टनष्टप्रेमा, सरिदवोऽन्नयकुलोच्छेदिनी, ससंगप्रव्रज्येवास्पृष्टधर्मा, हिंसेव जीवलोकगर्हणीयेति, अथवानया चिंतया किं? अविवेकबहुला विषयविषलालसेदृश्येव महिला भवति, अथ महाराजेन तस्या वचनतः कथं पुनरेतदेवमेव प्रतिपन्नं? अथवेदृशी मेऽवस्थास्ति येनैतदपि संभवति, यौवनानि किलाविमृश्यकारीणि भवंति, सा च महाराजस्येष्टास्ति, तस्मात्किमत्र युक्तं? महाराजाय किं यथास्थितं कथयामि? अथवा महाराजेन सा वराक्यवश्यं व्यापाद्यते, तस्या वांछितं च मया न कृतं, तस्मात्तस्या अन्यमप्यनर्थं कथं संपादयामि? अकथ्यमाने च मे कुलगृहस्य मलिनता भाविनी, तथापि मलिनता वरा, न पुनः परपीडेति चिंतयन् विनयंधरेण प्रोक्तः कुमार आदिशतु, मयात्र किं कर्तव्यं? मयोक्तं हे भद्र! त्वमादेशकारी, तस्मान्नृपाज्ञां संपादय? मया दुराचारेण कुलकलंकभूतेन जीवता किमित्यर्धभणिते राजमार्गचारिणा श्रीधराभिधानेन पुरुषेण श्रुतं, पुना राजमार्गगामिभिर्ब्राह्मणैर्महता शब्देन निजकथाप्रतिबद्धं जल्पितं भो किं बहुना? एष न दोषकारी, अत्र वयं कोटिशपथैः प्रतीतिमुत्पादयाम इति. एतदा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कर्ण्य विनयंधरेण प्रोक्तं हे कुमार! त्वं न दुराचारो यतः सिद्धादेशेन नणितं राज्ञा निर्दोषवस्तु-
विषयस्ते एष विरुद्धादेशो दत्तोऽस्ति, स नैमित्तिकश्च नगवान् सत्यादेशोऽस्ति, नगवतो दुराचारा-
दिशब्दः सत्यार्थसूचकैश्छिक्कादिनिमित्तैर्न सोढश्च, तस्मादेतेनालापप्रायेण किं? त्वं कथय? इदं
पुनः कथं व्यवस्थितं? येन महाराजाय विज्ञपयामि, मयोक्तं हे नडाहं किं कथयामि? अत्र मा-
ता प्रमाणं, तेनोक्तं हे कुमार तवात्र दोषो नास्ति, सा पापा च दुष्टेतीदं सामान्यतो निश्चितं, वि-
शेषं न जानामि, तस्मान्ममानया किं? महाराजायैवमेवैतद्विज्ञपयामि, ततः स एवात्र निश्चयं प्रा-
प्स्यतीत्युक्त्वा विनयंधर उत्थितः, मया भुजदंडे धृतो नणितश्च हे नद्र मातुरुपरि संरंभेणालं, यतो
जीवितं चंचलं, एतज्जीवितस्य बहुमानं कृत्वा गुरुजनसंक्लेशकरणं खलु न युज्यते, विनयंधरेणोक्तं
हे कुमार! त्वं महाराजविजयवर्मणः पुत्रोऽसि, अत्रापरं किं नण्यते? अत एव तस्याः पापाया उ-
परि मे कोपस्तस्मात्प्रसादं कुरु? मां मुंच? येन महाराजायैतं व्यतिकरं विज्ञपयामि, मयोक्तमने-
नाग्रहेणालं; तेनोक्तं हे कुमार! मयेदं देवायावश्यं विज्ञपयितव्यं, मयोक्तं हे नद्र यद्येवं तर्हि म-
याप्यवश्यमात्मा व्यापादयितव्य इति.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एतदाकर्ण्य बाष्पार्द्रलोचनो विनयंधरो विषण्णः, अनेन जणितं चाहो देवस्याविमृष्टकारिता! यदीदृशं पुरुषरत्नमेवं संजाव्यते, एतस्य देवशब्दं धिगस्तु, मयोक्तं हे जद्र तातं मा निंद? अत्र तातस्य को दोषः? ममैव पूर्वकृतपापकर्मपरिणतिरेषेति. ततो महाशोकव्याप्तेन विनयंधरेण प्रोक्तं हे कुमार! यद्येवं तर्हि कुमार आदिशतु मया पापकर्मणा किं कर्तव्यं? मयोक्तं हे जद्र त्वमादेशकारी, तस्मान्नृपाज्ञां संपादय? तेनोक्तं हे कुमारानेनासंबद्धप्रलापेन किं? त्वं कथं पापकर्मा? धन्यस्त्वं सकलकल्याणानां जाजनं, सकलगुणरत्नानामालयः, सकलसत्वानां कल्पतरुजूतः, किं बहुना? त्रैलोक्यस्यापि त्वं सौख्यदातासि, तस्माद्यद्येतदाज्ञे न विज्ञपयितव्यं, सा दुष्टराजपत्नी रक्षितव्या, तर्ह्यत्रोपायं चिंतय? यथा जवतः प्राणधारणानंदितमना अहं देवस्यानपराधी जवामीति. ततो मया चिंतितमेष मां न व्यापादयति, अव्यापादयंश्चैवमपराधितां न प्राप्नोति यदि परिजनेनालक्षितो वसुजूतिमित्रसहितो दूरदेशांतरमुपगच्छामीति विचिंत्यैतमेव विनयंधरो जणितः, तेन च जणितं हे कुमार! कोऽन्य उपायइः? तस्मात्कुमार इदमेव कार्यं करोतु, अन्यच्च प्रवहणं सुवर्णजूमिं प्रवृत्तमेवास्ति, अद्यैव रजन्यां तन्मोदयते, तेनैव सुवर्णजूमिगमनेन कुमारो मामनुगृह्णातु, मयोक्तं य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

युष्माकं रोचत इति. अत्रांतरे संध्यासमयः समागतः, अहं वसुभूतिविनयंधरसमेतस्तामविप्रीतो निर्गतः, वेलाकूलं गतः, विनयंधरेणावां प्रवहणस्वामिने समुद्रदत्ताय सबहुमानं समर्पितौ, तेन स्वीकृतौ, स्तोकवेलातिक्रांता, चंद्रः समुद्गतः, संक्षुब्धजलचरनिनादयुक्ता समुद्रवेला समागता, अहं वसुभूतियुक्तो यानपात्रं समारूढश्च, विनयंधरश्चरणयोर्निपत्य हे कुमार ममोपरि कोपो न कार्य इत्युक्त्वा बाष्पार्द्रलोचनो विनिवृत्तः, मंगलानि कृतानि, कर्णधार उपयुक्तः, यानपात्रमापूरितं, पवनवेगेन प्रवृत्तं, वसुभूतिना भणितं भो मित्र! किमेतत? ततो मयानंगवतीवृत्तांतः कथितः, तेन भणितमथ महाराजाय यथास्थितमेव किं पुनर्न निवेदितं? मयोक्तं हे मित्रानंगवतीपीडानिवारणार्थमिति.

आवां मासद्वयमात्रेण कालेन सुवर्णभूमिं प्राप्तौ, प्रवहणादवतीर्णौ, श्रीपुरं नाम नगरं गतौ, तत्र च श्वेतंबिकावास्तव्यः समृद्धिदत्तश्रेष्ठिपुत्रो वाणिज्यार्थं समागतो मनोरथदत्तो नाम बालसुहृद् दृष्टः, तेनापि चावां दृष्टौ, ततोऽसंभावितागमनशंकितेन तेन कंचित्कालमेकाग्रदृष्ट्या विलोकितौ, तदा चावाभ्यां विहसितं, तत उपलक्षितौ, तदा प्रणम्य तेन हर्षविषादगर्भितं जल्पितं हे कु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मार! महाराजस्य कुशलं? मयोक्तं कुशलमस्ति, तेन स्वगृहं नीतौ, आवयोर्विज्ञवप्रीतिसदृश उ-
पचारः कृतः, भोजनानंतरमागमनप्रयोजनं पृष्टस्तातनिर्वेदेन विनिर्गतः सिंहलेश्वरनिजमातुलसमीपं
गमिष्यामीति भणित्वा सबहुमानं चैष प्रोक्तः सिंहलद्वीपगामिप्रवहणोपलब्धौ सावधानेन भवित-
व्यं, मनोरथदत्तेनोक्तं यत्कुमार आज्ञापयति, कोऽपि कालोऽतिक्रांतः, मित्रं वियोगभीरुत्वेनोपल-
ब्धमपि सिंहलद्वीपगामिकं प्रवहणमावाभ्यां न कथयति. अन्यदा चावयोर्गमनोत्सुकत्वं श्रुत्वानेन भ-
णितं हे कुमार! किमवश्यं सद्य एव गंतव्यं? मयोक्तं हे मित्र मम प्रयोजनमस्ति, तेनोक्तं यद्येवं
तर्हि कुमारेण क्षंतव्यं यन्मया वियोगभीरुत्वे नैतावन्मात्रं कालं प्रयोजनविघातः कृत इति, यतः
प्रायेणेतः प्रतिदिनमेव प्रवहणानि सिंहलद्वीपं गच्छंति. मयोक्तं यद्येवं तर्ह्यद्यैवावां गच्छावः, तेनोक्तं
कुमारस्याविघ्नमस्तु. यानपात्रमुपलब्धं, करणीयं साधितं, तथा स्फुरद्भासुरदीप्तिर्महाप्रमाणोऽत्यंतश्लक्ष्णरू-
पः पटो मह्यं दत्तः, तेन भणितं कुमार सकौतुकोऽयं पट इति कृत्वा नयनमोहनाभिधानमेतत्पटरत्नं गृहा-
णेति. मयोक्तं कीदृशं कौतुकं? तेनोक्तमनेन प्रच्छादितशरीरः पुरुषो नयनाभ्यां न दृश्यत इति.
मया परीक्षा कृता यावत्तथैवेति. मम कौतुकं समुत्पन्नं, मया मनोरथदत्तो भणितो हे मित्र त्वयैष

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथं प्राप्तः? तेनोक्तं शृणु?—

इहैवागतस्य ममानंदपुरनिवासिना सिद्धविद्याप्रयोगेण सिद्धसेनाभिधानेन सिद्धपुत्रेण सह प्रीतिः समुत्पन्ना, मया स भणितश्च हे मित्रेह विद्यासाधने कः पुनः परमार्थः? इह किं सत्यमेव दिव्यसंपातो भवति न वेति, तेनोक्तं यथोक्तकारिणो भवतीति, मयोक्तं हे मित्र मम महत्कौतुकं, तस्मान्मे दिव्यविलसितं दर्शय? तेनोक्तं स्तोकमिदं, किंतु मंमलं कर्तव्यं, मयोक्तं वयस्यः करोतु, तेनोक्तं यद्येवं तर्हि श्वेतसर्षपादिमंमलोपकरणं प्रगुणं कुरु? मया संपादितं. ततो दिनकरेऽस्तमितेंधकारे विजृंभिते निशाचरेषु घूकादिषु शब्दं कुर्वत्सु मंमलोपकरणं गृहीत्वावां द्वावपि नगराद्विनिर्गतौ, श्मशानं प्राप्तौ च, अनेन तत्रैकदेशे मंडलमालिखितं, मह्यं च खड्गः समर्पितः, ज्वलनो ज्वालितः, तेन भणितं च हे मित्राप्रमत्तेन भवितव्यं, तन्मयांगीकृतं, तेन मंत्रजापः प्रारब्धः. ततः स्तोकवेलायामेव मया गुरुकनितंबवहनप्रयासक्षीणमध्याभिनवोद्भिन्नकठिनस्तनविराजमानवक्षःस्थला संपूर्णचंद्रमुखी विकसितकमलपत्रनयनशोभा सुरतरुकुसुममालाविभूषितधम्मिलमुद्वहंती परिपक्वमधूककुसुमवर्णा गगनतलात्समुत्तरंती यक्षकन्यका दृष्टा, ततो मया चिंतितमहो मंत्रस्य महाप्रभावता!

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तया सिद्धसेनो नमस्कृतः सबहुमानं भणितश्च हे भगवन्! किं पुनर्मम स्मरणप्रयोजनं? तेनोक्तं न किंचिदन्यदपि च मम प्रियवयस्यो दिव्यदर्शनानुराग्यस्ति, ततस्तया मां विलोक्य प्रोक्तं हे भद्राहं ते परितुष्टानेन दिव्यदर्शनानुरागेण, तस्मात्किं ते प्रियं करोमि? मयोक्तं तव दर्शनादप्यपरं किं प्रियं? तया प्रोक्तं तथापि देवता अमोघदर्शना भवंति, एतन्नयनमोहनं पटरत्नं गृहाण? ततो मया संभ्रमसंभाषणजनिताग्रहेण तस्याश्चरणयुगलं प्रणम्य सबहुमानमेवेदं गृहीतं. यक्षकन्यका गता, आवां रजन्यां प्रज्ञातरूपायां नगरं प्रविष्टौ च, तस्मादेवं प्राप्त इति. मयोक्तं सुंदरा संप्राप्तिः, पटो गृहीतः, ततो मनोरथदत्तपरिजनमापृच्छ्य तेनाभिनंदितौ मनोरथदत्तेन सह वेलाकूलं गतौ, तत्र च सुरविमानानुकारमनुकुर्वाणं विचित्रध्वजमालोपशोभितं यानपात्रं दृष्टं. यानपात्रस्वामिनेश्वरदत्तेन वयमभ्युत्थिताः, अनेन प्रणामः कृतः, आसनान्युपनीतानि, मनोरथदत्तेनावां समर्पितौ, तेनोक्तं च हे सार्थवाहपुत्रैतौ खलु मम स्वामिनौ सुहृदौ बांधवौ जीविततुल्यौ, न कावप्यन्याविति, तस्मात्सुंदरं द्रष्टव्यौ, तेनोक्तं हे मित्रानेन पुनरुक्तोपन्यासेन किं? ममाप्येतावीदृशावेवेति. ततो यानपात्रमारूढौ, समुडाय बलिः क्षिप्तः, सितपट ऊर्ध्वीकृतः, निर्यामकेण गम्यदिक्संमुखं प्रवहणं दत्तं, आवां

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रणम्य मनोरथदत्तः स्थितः, यानपात्रं प्रवृत्तं, सिंहलद्वीपाभिमुखं गम्यत इति. एवं च गच्छतां त्रयोदशे दिवसेऽस्माकमुपरि काल इव कालमेघ उन्नतः, जीविताशेव विद्युल्लेखा स्फुरिता, उन्मूलितगिरिकाननो जलनिधिमाकंपयन् महतः कल्लोलानुत्क्षिपन् विषमवायुर्विजृंभितः, अशनिवर्षं निपतितं, हस्तिपकानधीनमत्तहस्तीवानियमितगमनेन यानपात्रमवशीभूतं, निर्यामिका विषण्णाः, ततो मया धैर्यमालंब्य सितपटनिबंधनभूता रज्जवश्छिन्नाः, सितपटः संकीर्णीकृतः, नंगरा विमुक्ताः, तथापि च भांडस्य गुरुकत्वेन, जलनिधेः संक्षुब्धत्वेन, विद्युद्वर्षणस्योत्कटतया, निर्यामिकाणां विषण्णतया, कर्मपरिणामस्य विचित्रतया यानपात्रं भग्नं. बांधवा अपि च कालपर्यायेण विपन्नाः, सर्वे प्राणिनो विमुक्ताः, मया फलकं प्राप्तं. ततोऽहमायुःशेषतया त्रीनहोरात्रांस्तत्र गमयित्वा फलकलग्नस्तटसमीपं प्राप्तः, अंधकारलेखेव वनराजी दृष्टा, मम हृदयेन समुच्छ्वसितं, समुद्रादुत्तीर्णः, वस्त्राणि निष्पीडितानि, अंतरीयवस्त्रग्रंथिसंस्थितं पटरत्नं जलानार्द्रीभूतं विलोक्य मया चिंतितमहो एतस्य सामर्थ्यं! मम विस्मयो जातः.

ततः स्तोकं भूमिभागं गत्वा जंबूवृक्षसमीपे उपविष्टः, मया चिंतितं चैतानि दैवस्य यथेच्छवि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लसितानि, सैषा च कर्मणोऽचिंत्या शक्तिर्यदेवमप्यश्रद्धानीयमवस्थांतरमनुभूय प्राणान् धारयामि, अथवैकोदरनिवसिनेव वसुभूतिना मित्रेण वियुक्तस्य प्राणैः किं? अथवा कर्मपरिणतिर्विचित्रा, विषादिना न भवितव्यं, संयोगवियोगौ दिवसरात्रिसमौ, कदाचित्सोऽप्येवमेव कथंचित्प्राणान् धारयति. ततः क्षुधापिपासापीडितः फलग्रहणनिमित्तमुत्तराभिमुखं प्रवृत्तः, स्तोकां भूमिं गतः, फनससहकारकदलीतरुसंछन्नकूला तीरतरुकुसुमसमास्तृतजला गिरिनदी च दृष्टा, प्राणवृत्तिः कृता, सहकारवृक्षसमीपे तिष्ठता मया गिरिनदीतटे सारसपक्षी युवा स्वप्रियायाः पुरश्चाटुकर्म कुर्वाणो दृष्टः, विलासवती स्मृतिपथमागता, मम चिंता च जाता, अहो खल्वेते मृगपक्षिणोऽदृष्टबंधुविरहदुःखाः स्वाधीनाहारप्रचारा अविज्ञातयाचना अदीनभावाः पार्श्वस्थितप्रणयिनीप्रसंगदुर्ललिता असंजातमहाव्यसनभयाः सुखं जीवंति. एवं च चिंतयतो मम सहस्ररश्मिरस्तगिरिशिखरमुपगतः, रत्नोद्योत इवातपः शीतलीभूतः, मया विमलशिलातले पल्लवशयनीयं कृतं, संध्यावश्यकं संपादितं, उचितसमये च देवतागुरुप्रणामः कृतः, वामपार्श्वेन सुप्तः, कुसुमसुरभिणा मारुतेनाभिनंदितः, बहुदिवसखेदतो मे निद्रा समागता, रात्रिरतिक्रांता, नानाविधविहंगमशब्दैर्विबुद्धः, देवतागुरुप्रणामः कृतः, वनां-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तरादिकं विलोकितुं प्रवृत्तः, विचित्रान् वनप्रदेशान् प्रेक्षमाणश्च सुकुमारवालुकमत्यंतसौम्यदर्शनं गिरिसरित्तटं प्राप्तः, तत्र च सुप्रतिष्ठितांगुलितला प्रशस्तरेखालंकृता तत्क्षणोल्लिखितेव पदपंक्तिर्दृष्टा, हर्षितमनसा निरूपिता, लघुकसुकुमारत्वात्स्त्र इयं स्त्रियाः पदपंक्तिर्न पुनः पुरुषस्येति विज्ञाय पदपृष्ठितो लग्नः, अग्रे चलितः, नातिदूर एव चैका तापसकन्यका दृष्टा, सा कीदृशीत्याह—

श्लक्ष्णवल्कलवस्त्रा, तप्तकनकावदातदेहा, हृदयनिर्भर्त्सितेनेव चरणलग्नेन रागेण, मदनमंदिरतोरणेनेव जानुयुगलेन, कटिमेखलाकलापयोग्येन विपुलेन नितंबभागेन, बहुदिवसोपवासखिन्नेनेव कृशतरेण मध्येन, सज्जनचित्तेनेव गंभीरया च मदनरसकूपिकया नाभ्या, तपोविनिर्जितेनेव मोहांधकारेण पुनर्हृदयप्रवेशकामेन रोमलतामार्गेण, सुकृतपरिणामाभ्यामिव समुन्नताभ्यां स्तनाभ्यां, अभिनवोद्गतरक्ताशोकलताविलासाभ्यां बाहुभ्यां, कंबुपरिमंथरया ग्रीवया, पाटलाकुसुमसदृशेनाधरेण, अत्यंतनिर्मलाभ्यां कपोलपालीभ्यां, हरिणीकृतसंविभागाभ्यामिव लोचनाभ्यां, प्रमाणयुक्तेन नासिकावंशेन, दीर्घपक्ष्मलाभ्यामाकृष्टधनुर्भ्यामिव भ्रूभ्यां, अर्धचंद्रसदृशेन ललाटपट्टेन, पृष्ठिदेशसंस्थितेन कुटिलकेशकलापेन च शोभमाना वामहस्तगृहीतकरंडिका दक्षिणहस्तेन कुसुमाव-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चयं कुर्वाणेति. तां च दृष्ट्वा मया चिंतितमहो वनवासदुःखमनुभवंत्या अपि कीदृग्लावण्यं? ततः स्तोकं भूमिभागं समीपे गत्वा लताजालांतरेण सविशेषं प्रलोकिता, यावद्वनवासवेषं विना सर्वमेव विलासवत्याः स्वरूपं दृष्टं, स्मरणपवनसंधुक्षितो मदनाग्निर्मे मनसि प्रज्ज्वलितः, तया च कुसुमैश्छब्बिका भरिता, तपोवनाभिमुखं प्रवृत्ता. ततोऽहं मदनविकारं संवृत्य लताजालांतरान्निर्गतस्तस्याः समीपं गतः, प्रणम्यैषा भणिता च हे भगवति! तव तपःकर्म वर्धतां, अहं खलु श्वेतंबिकावास्तव्यस्तामलिप्तीतः सिंहलद्वीपं प्रवृत्तः, अंतराले मे यानपात्रं भग्नं, अत एकाकी संवृत्तः, तस्माद्भगवती कथयत्वयं पुनः प्रदेशः कः? किं तावज्जलनिधितटं? किं वा कोऽपि द्वीपः? कुत्र वा युष्माकमाश्रमपदं? ततः सा मां दृष्ट्वा निरुद्धदृष्टिप्रसरा दिग्मंडलं प्रेक्षमाणा मंदचलिततिर्यग्लोचना सलज्जयेव क्षणमात्रमधोमुखी स्थिता, अदत्तप्रतिवचना च सती तपोवनाभिमुखं प्रवृत्ता. ततो युवती तापस्येकाकिनी चेयं, तस्मादनया किं? अन्यं कंचित्पुरुषं प्रक्ष्यामीति विचिंत्याहं निवृत्तः, तदेव स्वभावसुंदरं लतागहनं प्रविष्टश्चिंतितं च पश्यामि तावत्क पुनरेषा व्रजतीति, विलोकितुं प्रवृत्तः, सविशेषमंदया गत्या व्रजंती दृष्टा च, स्तोकं भूमिभागं गता, तया पृष्ठतो विलोकितं, कोऽपि जनो न दृ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ष्टः. ततः कुसुमभव्बिकां मुक्त्वा परिहितमपि वल्कलं पुनः परिहितं, केशकलापः परामृष्टः, अंगानि मोटितानि, बाहुलतिके ऊर्ध्वीकृते, विजृंभणं प्रवृत्तं, ततो मया चिंतितमथ किं पुनरिदं, अथवानेन विरुद्धवस्तुविषयेणालोचितेन किं? गिरिनदीं गतः, प्राणवृत्तिः कृता, वनांतरेषु परिभ्रमतो वा सरोऽतिक्रांतः, पूर्वविधिना प्रसुप्तश्च, याममात्रावशेषायां रात्रौ स्वप्नो दृष्टश्च—कस्यचिद् वृक्षस्य पार्श्वे संस्थितस्य मे एकया दिव्यस्त्रिया सर्वेंद्रियमनोहरा कुसुममाला दत्ता, तया प्रोक्तं च हे कुमारैषा खलु दिव्यकुसुममाला पूर्वनिष्पादितैव मया कुमारस्योपनीता, तस्मात्कुमारो गृह्णातु, तदा मया सा गृहीता, कंठदेशे स्थापिता.

अत्रांतरे सारसशब्दो विजृंभितः, अहं जागृतश्चित्तेन परितुष्टः, मया चिंतितमेष स्वप्नः खलु निकटकन्यालाभफलोऽस्ति. एतच्चारण्यं तस्मान्न जानामि कथं भविष्यतीति. अत्रांतरे मम दक्षिणभुजेन लोचनेन च स्फुरितं. ततो मया चिंतितमृषिवचनमन्यथा न भवतीति, अनेन भवितव्यं, शकुनसमुदायोऽनुकूलोऽस्ति, मम विलासराजधानीं विलासवतीं विनान्यकन्यालाभेऽपि न बहुमानोऽस्ति, स्वप्नदेवतया भणितं च हे कुमारैषा खलु दिव्यकुसुममाला पूर्वनिष्पादितैव, तस्माद्दिव्यकु

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सुममालोपमिता नान्या कन्या, अनया सह मम पूर्वपरिचयोऽपि न, विलासवतीलाजेनैव जवित-
व्यमिति, सा तापसी विलासवत्याः सदृशी दृश्यते. विधेर्विलसितानि च विचित्राणि संति, कदा-
चित्सैव जवेदन्यथा तापस्याः कथं मदनविकारः? किंच यद्यपि सा विलासवती तथाप्यंगीकृतव्रतया
सह विषयसंगो विरुद्धः, अथवा संप्राप्तदर्शनसुखस्य मे प्रियतमांगीकृतं च मार्गमनुगछतो व्रतधार-
णमपि सुंदरमेव, एवं चिंतयतश्च रजन्यतिक्रांता, सूर्य उद्गतः, रात्रिविरहपीडितानि चक्रवाकयुगला-
नि संमिलितानि. ततोऽहं रागस्योत्कटतया वनानां रम्यतया स्वप्नस्य लोजोत्पादकतया च कामज्व-
रेण गृहीतः संस्तां तापसीं गवेषयितुं प्रवृत्तः, वर्गभ्रष्टस्य हरिणस्येव, यूथभ्रष्टस्य गजेंद्रस्येव तस्मिन्ने-
व वनांतरे भ्रमतो मम महता परिक्लेशेन कत्यपि दिवसा अतिक्रांताः, माधवीलतालिंगितः सहका-
रो दृष्टः, तस्य समीपे उपविष्टः, तामेव मुग्धहरिणलोचनां चिंतयंस्तिष्ठामि, यावन्मया शुष्कपत्राणां
मर्मरशब्दः श्रुतः, ग्रीवा वालिता. दृष्टिर्विदारिता, जस्मनिर्मितेन ललाटतिलकेनोपबद्धेन जटाकला-
पेन पुत्रंजीवकमालालंकृतेन दक्षिणकरेणोपलक्षिता, वामहस्तगृहीतकमंडलुर्महावल्कलवस्त्रा बहु-
दिवससंभृततपःप्रयासेनास्थिमांसावशेषेण शरीरेण युक्ता, अतिक्रांतमध्यमवयस्तापसी च दृष्टेति. त-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्तां दृष्ट्वा मदनविकारः संगोपितः, सा प्रणता च, ततो विशेषेण मां विलोक्येषद्राष्पार्द्रलोचनया च तया भणितं हे राजपुत्र! चिरं जीव? ततो मया चिंतितमेषा पुनर्मां कथं विजानाति? अथवा तपस्विजनो विमलज्ञानलोचन एव भवति, तस्मात्किं न जानाति? अत्रांतरेऽनया पुनर्भणितं हे कुमारोपविश? त्वया सह किंचित्कथनीयमस्ति, ततो मया यद्भगवत्याज्ञापयतीत्युक्त्वा भूमिपट्टं प्रमार्जितं, तापस्युपविष्टा, तया भणितं च हे कुमार शृणु?—

इहैव भारते क्षेत्रे वैताढ्यो नाम पर्वतोऽस्ति, तत्र गंधसमृद्धं नाम विद्याधरपुरं, सहस्रबलो राजा, तस्य सुप्रभा भार्या, तयोरहं सुता मदनमंजरीनाम्नी संप्राप्तयौवना विलासपुरस्वामिनो विद्याधरनरेंद्रस्य पुत्रेण पवनगतिना परिणीता, विषयसुखमनुभवतोः कोऽपि कालोऽतिक्रांतश्च. अन्यदा चाकाशयानेन नंदनवनं गतौ, यावद्विचित्रक्रीडाभिः क्रीडितुं प्रवृत्तौ, तावदप्रस्ताव एव कनकशिलासनात्पवनगतिर्निपतितः, तेन लोचनयुगं संमीलितं, ग्रीवा प्रकंपिता, वदनकमलं विच्छायं. ततो जीवलोकस्यासारतया मयि प्रेक्षमाणायामेव स पंचत्वमुपगत इति. ततोऽहमनाथापि च महाशोकेन गृहीता, शोकाधिक्याच्च सारसीवानिवारितं परिभ्रमंत्यकस्मादेव भूमिपट्टे निपतिता, लब्धचेत-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ना चोत्पतितुमारब्धा, यावन्मे गतिर्न प्रसरति, ततो मया नभोंगणगामिनी विद्या स्मृता, तथापि न प्रसरतीति. ततो मया चिंतितं हा किमेतदपरं? यावत्स्तोकवेलायां मज्जनकस्य द्वितीयहृदयभूतोंगीकृततापसव्रतो देवानंदो नाम विद्याधरः समागतः, तेन च भणितं हे वत्से! मदनमंजरि किमेतत्? मयोक्तं हे भगवन् कालविलसितं. तेनोक्तं कथं? मयोक्तं मम भर्ता मृतः, आकाशगामिनी विद्या च न प्रभवति. ततो बाष्पार्द्रलोचनेन भगवता प्रोक्तं हे वत्से विलापेनालं, एष संसार ईदृश एव. एतां च संसारस्यासारतां जीवलोकस्याध्रुवतां संगमानां क्षणभंगुरतामिंद्रियाणां चंचलतां च परिचिंत्य प्राणिनः सकलत्रैलोक्यपरमार्थबांधवं धर्ममंगीकुर्वंति. ततो मयैतदेवमिति विचिंत्य च भगवान् भणितो हे पूज्य! मह्यं व्रतप्रादनेनानुग्रहं कुरु? भगवतोक्तं हे वत्से! युक्तमेतदथ किं पुनस्ते नभोगमनविद्याभ्रंशकारणं? मयोक्तं हे भगवन्न जानामि. ततो भगवता ज्ञानावलोकेन निरूपितं भणितं च हे वत्से शोकव्याप्तया त्वया सिद्धायतनकूटं लंघितं, एतस्यैव शिखरभागे कुसुमदाम निपतितं च, तन्निमित्तस्ते एष विद्याभ्रंश इति. मयोक्तं हे भगवन्निहलोकमात्रोपकारिणीभिर्विद्याभिरलं, मह्यं व्रतप्रदानेन प्रसादं कुरुष्व? ततो भगवता मत्पितरं पृष्ट्वा निजकमाचारं कथयि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वा तपःप्रभावेणैतत श्वेतद्वीपोपकंठमानीयाहं दीक्षितास्मि, कोऽपि कालोऽतिक्रांतः.

अन्यदा च कुसुमेंधननिमित्तं समुद्रतीरं गता, तत्र च जलधिजलकल्लोलप्रेरिता मृगांकलेखेव देहप्रभया तमुद्देशमुद्योतयंती काष्टफलकलग्ना कन्यका दृष्टेति. एतच्च श्रुत्वा मे प्रमोदः समुत्पन्नः. मया चिंतितं सुमनोरथपादपस्य कुसुमोद्गमो दृश्यते. तापस्या प्रोक्तं ततोऽहं तमुद्देशं गता, लाव एयसद्भावतश्च जीवतीति गम्यमाना कन्यका दृष्टा, कमंडलुजलेन सिक्ता, तस्या लोचनयुगमुन्मीलितं, मया सा भणिता च हे वत्से! धीरा भव? अहं खलु तापस्यस्मि, ततो बाष्पजलभरितलोचनं तयाहं प्रणता, ससंभ्रमं चोत्थितस्य चित्तेन खेदं प्राप्ता, तस्या भावो लक्षितः, ततो मया चिंतित महोऽस्या महानुभावता! अनया सुकुलप्रसूतया भवितव्यं, फलानि तस्या उपढौकितानि, अनिच्छंत्या अपि च प्राणवृत्तिः कारिता, आश्रमपदं नीता, कुलपतये दर्शिता, तया भगवान् प्रणतः, भगवताभिनंदिता, आवश्यकं कृतं, सा च पृष्टा हे वत्से! त्वं कुतः? तयोक्तं हे भगवति! तामलिप्तीतः, मयोक्तं का पुनस्त्वं? कुत्र वा प्रस्थिता? ततो दीर्घं निःश्वस्यानया न जल्पितं, ततो मया चिंतितं महाकुलप्रसूता खल्वेषा, तस्मात्कथमेवमात्मानं प्रकाशयति? तस्मात्किमनया? कुलपतिं पृच्छामीति.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वासरोऽतिक्रांतः, संध्यासमयोचितमनुष्ठानं कृतं, मया कुलपतिर्भगवान् पृष्टो हे भगवन्नेषा कन्यका, पुनः का कथं वेदमीदृशमवस्थांतरं प्राप्ता? अस्याः कीदृशो वा विपाको भविष्यति? तत उपयोगं दत्वा तपःप्रभावेण भगवता प्रोक्तं शृणु?—तामलिप्तीस्वामिन ईशानचंद्रस्य राज्ञ एषा खलु पुत्री भर्तृस्नेहपराधीनतयेदमीदृशमवस्थांतरं प्राप्तेति. मयोक्तं हे भगवन्नेषा किं कन्यका नेति, भगवतोक्तं द्रव्यतः कन्यकास्ति, न पुनर्भावत इति. मयोक्तं भगवन् कथं? भगवतोक्तं शृणु?—अनया मदनमहोत्सवे तस्यामेव नगर्यां श्वेतंबिकाधिपतेर्यशोवर्मणः पुत्रः सनत्कुमारो नाम क्रीडानिमित्तमनंगनंदनं नामोद्यानं गच्छन्दृष्टः, अस्यास्तस्मिन्ननुरागः समुत्पन्नः, मनोरथेन भर्ता प्रतिपन्नः, न परिणीतेति. कतिपयदिनेष्वतिक्रांतेष्वेकदानया लोकमुखात्श्रुतं, यथा राज्ञा सनत्कुमारो व्यापादितः. ततस्तत्स्नेहव्याकुलमना एषापि खलु तस्मिन्नेव श्मशाने मृत्युमुपगतं भर्तारं विलोक्य प्राणान् परित्यजामीति विचिंत्यार्धरात्रसमये परिवारे प्रसुप्ते सत्येकाकिन्येव राजगृहान्निर्गता, राजमार्गेऽवतीर्णा, तस्करैश्च गृहीता, तैराभरणानि गृहीत्वा बर्बरकुलगामिनोऽचलसार्थवाहस्य हस्ते विक्रीता, तेन स्वकीयकूलं प्रवर्तिता, तद्यानपात्रं च भग्नं, अनया काष्टफलकं प्राप्तं,. ततो रात्रित्रयेणेदं तटं प्राप्ता, अथ भर्तारं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्राप्य भोगान् भोक्ष्यति, ततः परभवसाधनं विधाय मनुष्यत्वं सफलं करिष्यतीति. मयोक्तं हे भगवन्नस्या हृदयवल्लभः किं न व्यापादितः? भगवतोक्तमामिति. मया चिंतितं शोभनं संजातमिति. रात्रिरतिक्रांता.

द्वितीयदिवसे च मयैषा भणिता हे राजपुत्रि! विषादं परित्यज? धृतिमवलंबस्व? एष संसार ईदृश एव, अत्र खलु ऋद्धयः स्वप्नसंपत्तितुल्याः, यौवनमम्लानकुसुममिव क्षणमात्ररमणीयं, प्रियजनसमागमा विद्युद्विलसितानीव दृष्टनष्टा अनित्या इति. तया प्रोक्तं हे भगवत्येतदेवं, तर्हि व्रतप्रदानेन मे प्रसादं कुरु? मयोक्तं राजपुत्रि तावद्व्रतग्रहणेनालं, प्रथमयौवनस्थस्य प्राणिनो मदनबाणप्रसरो दुर्निवार्यः, मया दिव्यज्ञानसूरो भगवान् कुलपतिः सर्वमेव तव वृत्तांतं पृष्टः, तेन च श्वेतंबिकाधिपसुतदर्शनादिकः कथितः, तस्मान्मा संतापं कुरु? तव तेन सह संगमो भविष्यति, स खलु दीर्घायुष्को जीवतीति. ततः परितोषविस्मयसंयुतमत्यंतशोभनमविचारणीयमवस्थांतरं संप्राप्य संकल्पतोऽसदपि कटकयुगलमवतार्य मह्यं दत्तं, हारलतानिमित्तं ग्रीवायां हस्तश्च प्रक्षिप्तः, तस्यासंप्राप्त्या च तस्याश्चित्तं स्थाने समागतं, एषा लज्जिता च. ततो मया प्रोक्तं हे राजपुत्रि! संभ्रमेणालं, त्वं ख

P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

त्वीदृशस्य तुष्टिदानस्योचिता, तस्मात्तव व्रतग्रहणेनालं, ततो यत्त्वमाज्ञापयसीति तयांगीकृतं, ताप-
सकन्योचितेनैव विधिना कोऽपि कालोऽतिक्रांतः. अन्यदास्माकं भगवान् कुलपतिर्धर्मभ्रातृद-
र्शनार्थं सिद्धपर्वतं गतश्च, यावदितोऽतीतकतिपयदिनेष्वेषा कुसुमेंधनग्रहणार्थं गत्वोचितवेलायाम-
तिक्रांतायां पृष्टतो विलोकमानाऽरतिव्याप्ताश्रमपदमागता, कीदृशी?—ईषत्स्पृष्टकपोलतललग्नबाष्प-
जललवा स्वेदजलधौतगात्रा क्षीरसमुद्रमथनतत्क्षणोद्भिता श्रीरिव. ततो मया पृष्टा हे राजपुत्रि!
किमेतत? तयोक्तमथ मया बांधवाः स्मृताः, मयोक्तं विषादं परित्यज यावत्कुलपतिरागच्छति, ततः
स बांधवान् प्रापयिष्यतीति. तयांगीकृतं, यावत्तत एव दिवसादारभ्य देवतापूजायां मंदादरा. अति-
थिबहुमानेऽनुद्यमवती कुसुमोच्चयं न करोति, हुताशनं न प्रणमति, विद्याधरमिथुनकान्यालिखति,
सारसयुगलं विलोकते, कामस्यापि मनोहरान् यौवनविकारान् करोति, निजभर्तृकृतस्त्रीप्रसादनप्रधा-
नपौराणिककथासु च परितोषमुद्वहति.

ततो मया चिंतितमहोऽस्या वयोविशेषेण यौवनमुपागतं, यौवनेन मदः, मदेन मदनः, मद-
नेन विलासाः, विलासैः सर्वथा निर्विकारं यौवनं न सुलभमिति. अपि च—ण य अत्थि णवि य

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

होही । पाएणं तिहुयणंमि सो जीवो ॥ जा जोव्वणमणुपत्तो । वियाररहिओ सया होइ ॥ १ ॥ द्वितीयदिवसे च नागवल्ल्यालिंगितं पूगपादपमवलोक्य तदासन्नं च हंस्याः पुरश्चाटुकर्म कुर्वाणं राजहंसं दृष्ट्वा कंपितकरपल्लवं यथा स्यात्तथा बाष्पार्द्रलोचना दीर्घं दीर्घं निःश्वस्य सा तपोवनान्निर्गता, ततो मया चिंतितमस्या आकारो न शोभनस्तस्मात्पश्यामि तावदेषा कुत्र व्रजतीति, यावच्च छब्बिकां गृहीत्वा कुसुमोच्चयभूमिं गता, चपलकनीनिकं च विलोकितुं प्रवृत्ता. ततो मया चिंतितमेषा किं पुनर्विलोकते? यावद्विलोकमाना चाशोकवीथिकां गता, कदलीवनांतरिता चाहमस्याः पृष्ठतः स्थिता, एषा च रोदनं कृतवती, अनया प्रोक्तं च हे भगवत्यो वनदेवता एष खलु स प्रदेशो यत्रार्यपुत्रेण तापसीति विचिंत्याहं सविनयं प्रणतास्मि, भणिता च हे भगवति! तव तपःकर्म वर्धतां, अहं खलु श्वेतंबिकावास्तव्यः पुरुषस्तामलिप्तीतः सिंहलद्वीपं प्रवृत्तः, अंतराले च यानपात्रं भग्नमत एकाकी संवृत्तस्तस्माद्भगवती कथयतु कः पुनरयं प्रदेशः? किं तावत्समुद्रतटं? किं वा कोऽपि द्वीपः? कुत्र वा युष्माकमाश्रमपदमिति. मया पुनर्भयव्याकुलया प्रत्युत्तरं न दत्तं, स्वभावतो वक्रतया मदनस्योत्कटतया च मया स न जल्पितः, स्तोकं भूमिभागं गता, ततो धीरतां कृत्वा पृष्ठतो विलो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कमानया च नोपलब्धस्तस्मान्न जानामि मया किमेतदुत्प्रेक्षितं? मम हृदयाग्रतो विनिर्गतः स मे सत्यो ज्र्तैव किं वार्यपुत्रवेषेण कोऽपि देवादिर्मां प्रलोजयति? अथ सर्वथा यद्भवति तद्भवतु, पुनरपि प्रज्ज्वलितमदनानलदाहमार्यपुत्रविरहदुःखं सोढुं न शक्नोमि, तस्मादेतयातिमुक्तलतयात्मानमुद्बध्य व्यापादयामि. आर्यपुत्रस्य सौख्यकरणे यूयमप्रमत्ता जवत? मम मातृतुल्यायै अकारणवत्सलायै जगवत्यै तापस्यै एतं वृत्तांतं कथयत? अहं पुनर्लज्जापराधीनतयाख्यातुं न शक्नोमीति कथयित्वा वाल्मीकशिखरमारूढा, लतापाशो बद्धः, ततो मया चिंतितं मदनस्य दुष्करं नास्ति, तया गुरुदेवतानां प्रणामः कृतः, ग्रीवायां पाशो दत्तः, आत्मानं तत्र प्रक्षेप्तुं प्रवृत्ता. अत्रांतरे परित्रायध्वं परित्रायध्वमिति ब्रुवाणाहं तस्याः पार्श्वं गता, पाशो दूरीकृतः, सा जणिता च हे राजपुत्रि! परलोकप्रवृत्ताया अपि ते जनन्यास्तुल्यायै च मह्यमिदमनापृच्छ्य प्रछन्नं प्रयोजनाकथनं युक्तमिति? ततो हा धिग्मां सर्वमेवैतया श्रुतमिति लज्जानम्रवदनया तया जल्पितं हे जगवति! त्वया कोपो न कार्यः, मम लज्जापराधकारिकास्ति, ततो मयोक्तं हे राजपुत्रि! कोपशंकयालं, तपस्विजनः कोपनो न जवति, त्वं कथय तावत्त्वया किमत्र कोऽप्यपूर्वोऽतिथिर्दृष्टः? तयोक्तं भगवत्या श्रुतमेव, मयोक्तं हे

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजपुत्रि धीरा भव? कुलपतिर्भगवान् खल्वमोघवचनो वर्तते, तस्मादवश्यं ते निकटमेव प्रियं भविष्यति, तस्मादागच्छ? तावदाश्रमपदं गच्छावः, ततो यद्भगवत्याज्ञापयतीति तयांगीकृतं, आवामाश्रमपदं गते, मया तव गवेषणनिमित्तं च मुनिकुमारकाः प्रेषिताः, अहं चाप्रमत्ता सती पौराणिककथाविनोदेन राजपुत्रीसमीपे स्थिता, मुनिकुमारकैश्च मह्यं निवेदितमस्माभिर्न दृष्ट इति. ततोऽहं राजपुत्रीसमीपे सकलपरिजनं संस्थाप्यास्या अन्यो जीवितोपायो नास्तीति विचिंत्य सांप्रतमेव तवान्वेषणनिमित्तमिहागतास्मि, अवश्यकार्यनिष्पादने दक्षया भवितव्यतया च मह्यं त्वं दर्शितस्तस्मादागच्छावामाश्रमपदं गच्छावः, कंठगतप्राणामबांधवां तां कन्यकां जीवयेति. ततो मयोक्तं यद्भगवत्याज्ञापयतीति.

आवां तपोवनं गतौ, प्रथममेव तापसी प्रविष्टा, पश्चाच्च मुनिकुमारेणाहूतोऽहमपि, ममासनमुपनीतं, तत्र च मृणालिकावलयहारमुद्वहंती कमलिनीदलस्रस्तरगता विलासवती दृष्टा, सा च मां दृष्ट्वा लज्जिता सती स्रस्तरं मुक्त्वाभ्यंतरं गता, अहं चोपविष्टस्तस्या वयस्याभिस्तापसकुमारिकाभिरर्थः संपादितः, तापसीसमादेशेन च चरणशौचं गृहीत्वोत्तरीयं संस्थापयंती वलितग्रीवं दिक्षु विलो-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कमाना विलासवती समागता, चरणौ प्रक्षालितौ. अत्रांतरे गगनमध्यचारी दिनकरः स्थितः, मुनिजनश्च स्वाधिकारतत्परो जातः, फनसादीनि फलान्युपनीतानि, प्राणवृत्तिः कृता, तापसी चागता, तया प्रोक्तं च हे राजपुत्र! त्वत्सदृशानामाश्रमपदमागतानां तापसजनः कंदफलमात्राहारप्राणवृत्तिं वल्कलनिवसनं च विना किमतिथिसत्कारं करोतु? तत एषा विलासवती मम जीवितादपि वल्लभतरा विधिना पूर्वं संपादितैव मया पुनः संपादितेति भणित्वा वल्कलवस्त्रप्रांताच्छादितवदना सा रोदितुं प्रवृत्ता, ततो मया प्रोक्तं हे भगवति! त्वं विज्ञातसंसारस्वभावैव, तस्मात्किमेतत? तापसकुमारिकया च तस्या मुखशुचीकरणजलं सविनयमुपनीतं, तया वदनं शुचीकृतं, वल्कलचिरप्रांतेन मुखं संशोध्यासनादुत्थिता, स्वयमेव होममंडपे होमकुंडे एव मंगलमिति कृत्वाग्निः प्रज्ज्वालितः, निजकाभरणविभूषिता विलासवती प्रिया मह्यं समर्पिता, सा च मया प्रथमं हृदयेन गृहीता, पश्चात्करतलेन मंमलानि भ्रमितानि, भगवती प्रणता, तदाज्ञया चावां तपोवनपार्श्वस्थमेव सुंदरवनं नामोद्यानं गतौ, तत्पुन ऋतूनां समुदाय इव, गंधर्वाणां निवास इव. वनस्पतिनां कुलगृहमिव, कामस्य मंदिरमिव रम्यतरं वर्तते, तत्रापि च कर्पूररससिच्यमानमालतीगुल्मवेष्टितमेलालतापिनद्धं हरिचंद-

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

नगहनं प्रविष्टौ, तत्र च भ्रमरशब्दगीतसंयुतमंदमलयपवनवशनृत्यंतीः प्रियंगुमंजरीरन्यांश्चापूर्वविला-सान् लोचनसुखदांस्तरुगणान् प्रेक्षमाणयोरावयोर्वासरोऽतिक्रांतः, पल्लवशयनीयं विरचितं, आवां प्र-सुप्तौ च. विश्वासः समुत्पन्नः, रात्रिरतिक्रांता.

एवं च प्रतिदिनं तिष्ठतोः कतिपयदिनेषु चातिक्रांतेष्वावां कुसुमेंधनार्थमुपगतौ. मया फलानि गृहीतानि. विलासवती पुनः पवनवशप्रकंपिताभिर्वनलताभिः सौकुमार्यलोभेनेव परामृश्यमानोद्भि-न्नकलिकानिकरैश्च तरुवरै रोमांचितैरिव विलोक्यमाना कुसुमगंधलोभितया चोपरि निपतितभ्रमर-जालेनाक्षिप्तहृदया समाप्तकर्तव्याप्येह्यावां गच्छाव इति मया भणितापि कुसुमोच्चयान्न निवर्तते. ततो मया चिंतितं नयनमोहपटप्रावरणेनैतां विस्मितचित्तां कुर्वे, समीपस्थितेनैव मया तस्यामप्रेक्षमाणा-यां पटः प्रावृतः, तया विलोकितं च, अहं न दृष्टः, ततो गमनविकल्पस्यासंभवेन हा आर्यपुत्रार्यपु-त्रेति वदंती पृथ्वीपट्टे निपतिता. ततो मया हा किमेतत्कृतमिति विचिंत्य तं पटं मुक्त्वा कुमुदालय-नामकात्सरसः कुमुदिनीपत्रपटे जलं गृहीत्वाहमागतः, झटिति पानीयेन सिक्ता, एषा समाश्वासि-ता, अनया प्रोक्तं च हे आर्यपुत्र! किमेतत्? मयोक्तं किं तत्? तयोक्तमिदानीमेव मया त्वं न

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

दृष्टः, इदानीमेव च दृष्ट इति. मयोक्तं न जानीमः, तयोक्तं हा कथं न जानासि? मम जयः स-
मुत्पन्नस्तस्मात्परमार्थं कथय? ततो मया स्त्रीणां हृदयानि कातराणि, मान्यथेयं संज्ञावयिष्यतीति
विचिंत्य पटरत्नवृत्तांतः कथितः, तया च विन्यासितः, प्रत्ययमुपलभ्य च पटो गृहीतः. एवं च प्रव-
र्धमानानुरागयोः कोऽपि कालोऽतिक्रांतः, मम च चिंता जाता स्वदेशं गच्छामः, विलासवत्यै प्रोक्तं,
तया जणितं हे आर्यपुत्र! यद्युष्माकं रोचत इति. तापसी पृष्टा, तयानुमतं, भग्नपोतध्वजः कृतः, क-
तिपयदिवसा गताः. अत्रांतरे तत्र प्रदेशे निर्यामकाः समागतास्ते च मया दृष्टास्तैश्च जणितं भो
महापुरुष! कटाहद्वीपवासिना सानुदेवसार्थवाहेन मलयदेशप्रस्थितेन जग्नपोतध्वजं दृष्ट्वा वयं प्रेषि-
ताः स्मः, तस्मादागच्छ वयं गच्छामः, ततो मयोक्तं हे जद्रा अहं जार्यासहितोऽस्मि, तैरुक्तं न दोषः,
सापि प्रवर्ततामिति.

ततस्तापसजनमापृच्छ्य तेनानुगम्यमानश्च समुद्रतटं गतः, तापसान् प्रणम्य स्त्रीसहितो लघु-
नावमारूढः, यानपात्रं प्राप्तश्च, सार्थवाहपुत्रेण बहुमानितः, ततो मया समुद्रस्य घोरतयातिविषमत्वं
विज्ञाय स्त्रीस्वजावतोऽस्याः पटरत्ने मा प्रमादो जविष्यतीति विचिंत्य पटरत्नमात्मना गृहीतं, कति-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चिद्दिवसा अतिक्रांताः. अन्यदा च प्रहरावशेषायां रजन्यां प्रश्रवणनिमित्तमहं सार्थवाहपुत्रश्चोत्थितौ, अत्रांतरे सार्थवाहपुत्रेण चिंतितमिदमीदृशं स्त्रीरत्नं वर्तते, सर्वापराधप्रच्छादिनी च रात्रिरस्ति, ईदृशोऽवसरो दुर्लभस्तस्मादेतं समुद्रे निक्षिप्यैतस्य स्त्रीरत्नमहमंगीकरोमि. ततो यथेष्टं संपादयामीति हृदये व्यवस्थाप्य तेन भणितं च त्वं तिष्ठ? अहं यानपात्रपर्यंतप्रदेशे स्थितः, तेन च कराभ्यां जलधिसन्मुखं प्रेरितः, संसारविशाले सागरे निपतितः, पूर्वभग्नबोहित्थसंबंधि फलकं प्राप्तं, आयुःशेषतया पंचभिरहोरात्रैः समुद्रो लंघितः, मलयकूलं प्राप्तः, समुद्रादुत्तीर्णः, मया चिंतितमथ सार्थवाहपुत्रस्य किं पुनर्मम व्यापादनप्रयोजनं? निश्चितं विलासवतीलोभस्तस्मात्स वणिग् खलु मूढः, विलासवतीचित्तस्यानभिज्ञः, सा खलु मम वियोगे प्राणान्न धारयति, पटप्रावरणावसरे एवं विज्ञातं, तया विना च निष्फलेन मम प्राणधारणेन किं कार्यं? तस्मादात्मानं व्यापादयामीति विचिंत्य दिशो विलोकिताः, नातिदूर एव च स्थलसंस्थितः कदंबपादपो दृष्टः, ततोऽत्रोल्लंबनेन प्रियतमाविरहसंतापितमात्मानं निर्वापयामीति विचिंत्य कदंबवृक्षसमीपं प्रवृत्तः, तस्मान्नातिदूर एव चैकं महासरो दृष्टं, कीदृशमित्याह—

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तीरतरुवनमंडितं, विकसितकमलसमूहसंछादितमध्यभागं, कुमुदगणैर्हसदिव, कृष्णोत्पलविलासैर्वि-
लोकयदिव, चक्रवाककूजितैः शब्दं कुर्वदिव, हृष्टमधुकरशब्दैर्गायदिव, प्रचलत्कल्लोलहस्तैर्नृत्यदिव,
कमलपरागपिंजरजलमिति. तत्र चैकः कलहंसः कथमपि प्रियतमारहितो दृष्टः, प्रियस्त्रीरहितः पुन-
रेभिश्चिह्नैर्विज्ञातः—तरलतारकं यथा स्यात्तथा दशसु दिक्ष्ववलोकते, खिन्नः सन् करुणशब्दं कृ-
त्वा क्षणमात्रं निश्चलस्तिष्ठति, स्वप्रियतमासदृशीमन्यां हंसीं दृष्ट्वा हर्षितः सन्नभिमुखं गच्छति, तां
चान्यां ज्ञात्वा सविषादं निवर्तते, मरणाविष्टचित्तः सन् प्रज्ज्वलितमग्निमिव कमलवनं प्रविशति. पु-
नर्मृणालखंडं विषमिव प्रेक्षते, नवरं पवनाकंपितकमलरजोमिश्रितपिंजरच्छायं विरहाग्निप्रज्ज्वलितं
मनोहरं पिच्छकलापं विधुनाति, मृदुपवनप्रचालितचपलतरंगोच्छलद्भिः शीतलैर्जलकणैः सिच्यमानो-
ऽपि परवशः सन् मूर्छति, पुनः कमलिनीपत्रैर्वीज्यमानश्च चेतनां लभते, तथा जले निजच्छायां दृ-
ष्ट्वा परितोषमुद्वहति. एवं प्रवर्तमानं तं हंसं प्रेक्षमाणस्य मम चिंता जाता, एषोऽपि वराकः प्रिया-
वियोगदुःखितो विधिना कथं विडंब्यते? अत एव पंडिता बिलगतं सर्पमिव प्रेम परिहरंति, येन
कारणेन प्रियवियोगविषवेगमाहात्म्यं जानंति, अहं यावदिति चिंतयामि तावत्कलहंसको दैववशा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्परिभ्रमन् सरस्येकमुद्देशं प्राप्तः, तत्र कुवलयच्छायायां स्थिता विरहदुर्बलांगी शोकेन जल्पितुमप्यसमर्था कलहंसिका तेन दृष्टा, तां दृष्ट्वा च हंसः सद्यः परितोषमापन्नः, सापि दैववशेन कलहंसकमागतं वीक्ष्य परितोषवती जाता, ततो ममापि मनस्येवं चिंता समुत्पन्ना, जीवतां जीवानां कदापि कालेन संप्राप्तिर्भवति, मृतानां पुनर्दीर्घसंसारे कुतः संप्राप्तिः? प्राणेषु च विद्यमानेषु निश्चयेन पुरुष उत्साहशक्तिममुंचन्निजोद्यमानुरूपं फलं प्राप्नोति, अन्यच्च कुलपतिना विलासवत्यै प्रागेव विपाकः कथितोऽभूद्यथा भर्तारं प्राप्य भोगान् भुक्त्वा परलोकसाधनेन मनुष्यत्वं सफलमेव करिष्यतीति, तस्मात्सात्मानं न व्यापादयति, विधेर्विलसितानि च विचित्राणि संति, तस्मादत्रेदं तावत्प्राप्तकालं यत्तस्या गवेषणमिति विचिंत्य नारंगफलैः प्राणवृत्तिः कृता, समुद्रतटे गंतुं प्रवृत्तः. अर्धयोजनमात्रं भूमिभागं गतः, समुद्रतीरे च कल्लोलैः प्रेर्यमाणं फलकं दृष्टं, तस्य समीपं प्रवृत्तः, तीरं च प्राप्तं, तत्र च तया कंठगतप्राणा विलासवती दृष्टा, चित्तेन हर्षितः, तया चोपलक्षितः, रोदितुं प्रवृत्ता, मया समाश्वासिता पृष्टा च हे देवि! किमेतत्? तयोक्तं हे आर्यपुत्र! शृणु?

मंदभागधेयाया ममापुण्यैस्त्वयि निपतिते सति त्वच्छोकेन च सार्थवाहे आत्मानं समुद्रप्रवाह-

णोद्यते सति तन्निवारणार्थं च मया सह परिजने आकुलीभूते सति रजन्यां प्रभातीभूतायां सत्यां कर्णधारेऽमार्गोऽमार्ग इति कथयति सति निर्यामकेषु रज्जुपरिवर्तनोद्यतेष्वप्रस्ताव एव गिरिशिखरनिपतितमिव यानपात्रं भग्नं, जनो विघटितः, आर्यपुत्रपुण्योदयेन च मया फलकं संप्राप्तं, समुद्रो लंघितस्त्वं च दृष्ट इति. ततो मया चिंतितमहो सार्थवाहस्य मायाशीलता! अहोऽकार्यसंकल्पपरिणामः! अथवा किमत्राश्चर्यं? अनुवादतः खलु न कार्यसिद्धिः, सुखानामनुवादतश्च पापाचरणं, येन तत्र प्रथममेवात्मनः संक्लेशः, पुनः परपीडा च, तस्मादेवंविधाभ्यासतः कथं शुभपरिणामः? तथाप्यज्ञातसुखसाधनोपायाः प्राणिनोऽत्र प्रवर्तंते गलसंपत्तितुल्यायां विपाकदारुणायां सुखसंपत्तौ वंचिता मत्स्या इव, अत्रांतरे विलासवत्या प्रोक्तं हे आर्यपुत्र! त्वं पुनः कथं निपतितः? कथं वोत्तीर्णः? ततः परदोषप्रकटनं न युक्तमिति विचिंत्य मया जल्पितं हे देवि! प्रमादतोऽहं निपतितः, तद्देशं प्राप्य पूर्वभग्नप्रवहणफलकेन चोत्तीर्णोऽस्मि. कापि वेलातिक्रांता, तया प्रोक्तं हे आर्यपुत्र तृषापीडिताऽस्मि, मयोक्तं हे देवीतो नातिदूर एव महत्सरोवरं, तस्मादागच्छावां गच्छावः, विलासवती प्रवृत्ता, स्तोकं भूमिभागं समागता, ततो नितंबस्य गुरुकतया समुद्रतरणेन खिन्नतया देहस्य सुकु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मालतया मम सामीप्येन विश्वस्ततया च गंतुं न शक्नोति. ततो मयोक्तं हे देवि! त्वं तावदत्रवृक्ष-समीप एव तिष्ठ? यावत्कमलिनीपत्रेण ते पानीयं संपादयामि, तयोक्तं तव वदनदर्शनतृष्णानो मां सलिलतृष्णा न बाधते, मयोक्तं हे देवि! धीरा भव? अहमागत एवेति. पल्लवशयनीयं कृतं, न-यनमोहनपटः समर्पितः, एषा भणिता च हे देव्यरण्यं बहुप्रत्यपायं, अत एतत्प्रच्छादितशरीरया स्था-तव्यं यावदहमागच्छामि, हृदयेनाबहुमतमपि प्रतिकूलया तयांगीकृतं, सरोवरं गतः, पानीयं गृहीतं, नारंगफलानि च गृहीतानि, प्रतिपथेन प्रवृत्तः, तमुद्देशं समागतः, सा भणिता च हे देवि नयन-मोहनं पटं मुंच? उदकं गृहाण? यावत्सा न जल्पति, ततो मयोक्तं हे देवि हास्येनालं, नयन-मोहनपटं मुंच? तथापि न जल्पति, ततो मया चिंतितं निश्चितमिह देवी नास्त्येव, अन्यथा मां दृष्ट्वा कथं नाभ्युत्तिष्ठति? कथं वा न जल्पति? स्रस्तरः परामृष्टः, देवी च नोपलब्धा. ततो मे हृ-दयेनाशंकितं, वामलोचनेन स्फुरितं, प्रयत्नगृहीतमपि सोदकं कमलिनीपत्रं च मम हस्तान्निपति-तं, विषादपराधीन इव दीनवदनचपलाक्षं यथा स्यात्तथा देवि देवीति जल्पन् गवेषयितुं प्रवृत्तः, वालुकास्थल्यां चाजगरगमनस्थूलरेखोपलब्धा, अहं कंपमानहृदयः संस्तदनुसारेण प्रवृत्तः, अग्रतो

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गुरुकतरवरवनेऽतिकृष्णदेहज्वविर्विषपूर्णनयनयुगलो महाकायो नयनमोहनपटग्रसनव्यापृतोऽजगरो दृष्ट इति. तं च दृष्ट्वा मया चिंतितं हा धिग्देवी व्यापादिता. ततो मया न ज्ञातं किं दिवसः किं रात्रिः किमुष्णं किं शीतं किं सुखं किं दुःखं किमुत्सवः किं कष्टं किं जीवितं किं मरणं किं गतः किं स्थित इति. केवलमनपेक्षणीयमवस्थांतरं प्राप्य मूर्छानिमिलितलोचनो धरणीपटे निपतितः, गतप्राण इव किंचित्कालं स्थितः. समुद्रपवनसमागमेन च चेतना लब्धा, मया चिंतितं यावदेषोऽजगरो न देशांतरमुपगच्छति तावदेवानेनात्मानं खादयामि, मृतस्यापि च मम देवीसंगमो बहुमत एव, अजगरसमीपं गतः, स च मां दृष्ट्वा कृतापराधः कुपुरुष इव संकुचितः, मया चिंतितं मृतस्यापि प्रियतमासंगमो दुर्लभः, ततः कुपितेनेव कथं नामाकुपितो ग्रसिष्यत इति विचिंत्य मयाजगरो मस्तकप्रदेशे आहतः, भयकातरेण च तेन नयनमोहनपटो वांतः, मंमृच्छ्याबद्धा, ततः प्रियतमागात्रसंगबहुमानेन पटो गृहीतः, वक्षःस्थले न्यस्तः, चिंतितं चैतमेव नयनमोहनं हृदये दत्वोल्लंबनेनात्मानं व्यापादयामीति, वटसमीपं गतः, यत्र च प्रियतमा सुप्तासीत्, पाशो निबद्धः, शाखागतेन च मया ग्रीवा स्थापिता, आत्मा विमुक्तः, कंठदेशो निरुद्धः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततश्च वनैर्भ्रांतमिवाकाशांगणेन निपतितमिव नेत्रे विनिर्गते, शरीरकं परवशीभूतं, अतः प-
रमनपेक्षणीयमननुभूतपूर्वं संमोहमनुप्राप्तोऽस्मि, स्तोकवेलायां च स्वप्ने इव मया कमंडलुपानीयेन
ममैव गात्रसेचनव्यापृत ऋषिर्दृष्टः, चेतना समागता, चिंतितं च हंत धरण्यां पतितोऽप्यहं मंदपुण्यो
नैव मृतः, तत ऋषिणा मेंगं संस्पृष्टं, मया च स भणितो हे भगवंस्त्वया किं कृतं? तेनोक्तं शृणवा-
त्मव्यापादनोद्यतस्त्वं दूरदेशवर्तिनेंधनाद्यर्थागतेन मया दृष्टः, ततो हा एष कः पुनः सत्पुरुषनिंदि-
तमार्गमंगीकरोति? किंवा तस्यैतद्व्यवसायकारणं पृष्ट्वैतन्निवारयामीति विचिंत्य त्वरितं त्वरितं प्रवृत्तो
यावत्त्वयात्मा मुक्तः, ततश्च मा साहसं मा साहसमिति भणंस्त्वरिततरं धावितः, वटसमीपं प्राप्तश्च,
अत्रांतरे ते पाशस्त्रुटितः, त्वं धरणीपटे निपतितः, ततश्च मया कमंडलुपानीयेन सिक्तश्च लब्धचे-
तनं च ज्ञात्वा तेंगं परामृष्टं, एतन्मे व्यवसितं, तस्माद् हे धर्मशील! कथय किं पुनस्तेऽस्य व्यव-
सायस्य कारणं? ततः सलज्जेन मया जल्पितं हे भगवन् मम व्यवसायकारणेनालं, तेनोक्तं हे व-
त्स मत्पुरो लज्जयालं, यतस्तपस्विजनो जननीभूतो भवति, अज्ञातवृत्तांतश्चाहं किं ब्रवीमि? तस्मा-
द्भवानाख्यातु, ततो मयाऽकारणवत्सलो गृहिणो माननीयश्च यतिजनोऽस्तीति विचिंत्य श्वेतंबिका-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निर्गमनादिक उल्लंबनावसानो निजकवृत्तांतः कथितः, तेन चोक्तं हे वत्सैष संसार ईदृशः, अत्र खलु जीवितं शरज्जलधरसदृशं, ऋद्धयः कुसुमिततरुतुल्याः, विषयभोगाः स्वप्नोपभोगसदृशाः, प्रियजनसंगमाश्च वियोगावसानास्तस्मादिमं व्यवसायं परित्यज? परित्यक्तप्राणोऽपि जीवः कुशलसंचयमकृत्वा वांछितं न प्राप्नोति, मयोक्तं हे भगवन्नेतदेवमेव, तथापि प्रियतमाविरहाग्निज्वालावलीपरिवेष्टितः क्षणे क्षणे मरणाधिकं दुःखमनुभवितुं न शक्नोमि, तस्मादवश्यं मरणोद्यताय मे कथय हे भगवन् केन पुनरुपायेनेदानीमेव लोकांतरगताया अपि प्रियतमायाः संयोगो भवेदिति. तेनोक्तं यद्येवं तर्हि शृणु?—

इहैव मलयपर्वते मनोरथापूरकं नाम शिखरमस्ति, तत्र किल कामितं वांछितार्थदं पतनं, तस्मादेतमारुह्य यथोचितं प्रणिधानं कृत्वा पतन् वांछितं प्राप्स्यसीति. ततो मया चरणयुगलं प्रणम्यर्षिः पृष्टो हे भगवन् क्व पुनस्तन्मनोरथापूरकं स्थानं? अनेन दर्शितं, अहं प्रवृत्तः, तृतीयदिवसे प्राप्ते सति तदुत्तुंगशिखरमारूढः, जन्मांतरेऽपि तस्याः समागमो भवेदिति प्रणिधानं कृतं, आत्मा विमुक्तः, अहो प्रमादोऽहो प्रमाद इति वदता गगनतलचारिणा विधूतचीनांशुकेन वामपार्श्वे स्थापित-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

खड्गेन सत्वसोत्तरणविचलितशिरोमालेन चंद्रानुकारिणात्यंतसौम्यदर्शनेन विद्याधरेणांतरेवाहं गृही-तः, स्वभावशीतलं चंद्रकांतमणिसंयुक्तं चंदनलतागृहकं नीतः, तेनाहं समाश्वास्य च भणितो भो महासत्व सर्वोत्कृष्टाकृत्या सूचितमहापुरुषभावस्य तव किं पुनरिदमीदृशं नीचपुरुषानुरूपं चेष्टितं? किं वात्र कारणं? यद्यकथनीयं न भवति तर्हि तावत्कथय? मयोक्तं परोपकाररताय दोषवर्जिने विज्ञातप्राणिधर्माय सज्जनायापि किं नामाकथनीयं? तस्मात शृणु?—प्रियतमावियोगेनात्मव्यापा-दनोद्यताय मे ऋषिणेदं मनोरथापूरकं कामितपतनं कथितं, ततो जन्मांतरेऽपि प्रियतमायोगो भ-वेदिति प्रणिधानं कृत्वात्मा विमुक्तः. एतदत्र कारणं? ततो विद्याधरेणेषद्विहस्य प्रोक्तमहो खलु स्नेहस्य दुष्करं किमपि नास्ति, स्नेहो नाम सर्वदुःखानां मूलं, अविवेकस्य निवासः, मुक्तेरर्गला, कुगतिवासस्य बांधवः, कुशलयोगानां प्रतिपक्षः, संसाराटव्या दर्शकः, असत्यव्यवसायस्य वत्सलः, एतेन पराभूताः प्राणिन उत्तरकालं न गणयंति, कालोचितं न पश्यंति, धर्मं न सेवंते, परमार्थं न प्रेक्षंते, महामोहपंजरगताः केसरिण इव समर्था अपि सीदंति, एष स्नेहः सविषयोऽप्येवं पापः, किमंग पुनरविषयस्तस्मादिममविषयस्नेहं परित्यज? विवेकदीपप्रकाशेन मोहतिमिरं निर्नाश्यालोच्य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

र्य? विचित्रकर्मपरिणामवशगानां जीवानां पतनप्रभावतः कथमेका गतिः? संगमो वा? तथा कर्मपरिणतिसद्भावे चानेन समारंभेण किं? वांछितसाधकोपायोऽपि च दानशीलतपोभावान्मुक्त्वान्न परमार्थप्रेक्षकैर्दृष्ट इति. हे सौम्याहं सर्वसत्वानां प्रत्ययजनकमन्यत्कथयामि यदत्यंतविरुद्धं वणिग्जातीयजायापत्योश्चरित्रं, यथा जायापती स्नेहेन प्रद्वेषेण च भिन्नमिह प्रणिधानं कृत्वा नाशं प्राप्तौ तथा शृणु?—

मलयदेशे कर्णिकारनामसन्निवेशोऽस्ति, तत्र सप्रिल्लको नाम गृहपतिस्तस्य नामतोऽप्यमनोज्ञा सिंहा नाम भार्या, स पुनरस्या जीवितादपीष्टतरः, तयोश्च परस्परं वियोगदर्शने बहुमन्यमानयोः कोऽपि कालोऽतिक्रांतः. अन्यदा च तेन मनोरथापूरकं कामितं पतनं श्रुतं, स्त्रीसंबंधौदासीन्यतस्तत्रागत्य मम जन्मांतरेऽप्येषा भार्या मा भवत्विति प्रणिधानं कृत्वात्मा विमुक्तः, स मृतश्च, एष वृत्तांतो भार्यया च ज्ञातः, शोकेन गृहीता चेदं पतनमागता, भर्तुः स्नेहतस्तया प्रणिधानं कृतं, मम जन्मांतरेऽपि स एव भर्ता भवेदिति, आत्मा विमुक्तः, सा च मृता, परस्परविरोधतश्च तयोर्मनोरथा न संपन्ना इत्यहं तर्कये, तस्मादेतेन युक्तिविरहितविषयेणानुष्ठानेन किं? तव प्रियतमावियोगः क-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

थं कदा वा संजात इत्येतत्कथय? ततो मया सुंदरमुक्तमिति विचिंत्याजगरवृत्तांतः कथितः, अस्य वृत्तस्य तृतीयदिवसश्च वर्तते, विद्याधरेणोक्तं कियद्दूरे वृत्तं? मयोक्तमितो दशभिर्योजनैरस्ति, विद्याधरेणोक्तं यद्येवं तर्हि विषादेनालं, तव प्रियतमा न मृता, मयोक्तं कथं ज्ञातं? तेनोक्तं शृणु—

अनेकविद्याधरनरेंद्रमौलिमणिप्रभासमूहकर्बुरितपादपीठश्चक्रसेनो नाम विद्याधरपतिरस्ति, तेन चाप्रतिहतचक्राया महाविद्यायाः साधनं प्रारब्धं, तस्या द्वादशमासिकी पूर्वसेवा कृता, ततोऽष्टचत्वारिंशद्योजनानि यावत क्षेत्रशुद्धिं कृत्वा सर्वसत्वेभ्योऽभयदानं दत्वा सप्तरात्रं यावदिह महाप्रयत्नेन हिंसा रक्षणीयेति निजकशरीरतुल्यान् विद्याधरानुक्त्वा प्रधानसिद्धिनिमित्तं सांप्रतमेव स्फटिकमणिजपमालां गृहीत्वा सिद्धिनिलयानाम्नीं मलयगिरिगुहां प्रविष्ट इति. तेन सप्तलक्षप्रमितो मंत्रजापः प्रारब्धः, तस्य चाद्यैव प्रणयिमनोरथैः सह सप्तरात्रिंदिवानि पूर्णानि, स्वामिनः श्वो विद्यासिद्धिर्भविष्यति च, अतो जानाम्येतावन्मात्रक्षेत्रमध्यगता ते प्रियतमा न मृता, यतो विद्याधराः स्वामिकार्ये उद्युक्ताः, ततो मया चिंतितमेवमेतत, युक्तिसंगतं च, अन्यथा पटरत्नप्रावृतायास्तस्याः केवलं पटरत्नग्रसनं कथं? तत्क्षणोपभुक्ताया अजगरस्य तथा मंमलीकरणं वा कथमिति विचिंत्य मया

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विद्याधरो भणितो भो महापुरुष! यद्येवं तर्हि ते मनोरथा पूर्णा भवंतु. भवताहमाश्वासितोऽकुश-लव्यवसायाच्च निवर्तितस्तस्मात्तिष्ट त्वमहं पुनः प्रियतमां गवेषयितुं गच्छामि, विद्याधरेणोक्तं क्लेशेनालं, अहमेव प्रातः संपादितदेवाज्ञः प्रतिपूर्णमनोरथः सन् शेषविद्याधरेभ्यो यथास्थितं वृत्तांतं विज्ञाय ते प्रियतमां मेलयिष्यामि.

ततो मयाऽलंघनीयवचन एष सुहृदिति विचिंत्य यत्त्वं ब्रवीषीति विद्याधरो बहुमानविषयीकृतः, दिवसोऽतिक्रांतः, अर्धप्रहरावशेषायां रजन्यामप्रस्ताव एवोद्योतितगगनांगणं संक्षुभितसमुद्रं प्रकंपितमहीधरं गीयमानमंगलं सुरविमानाकारमनुकुर्वाणं विद्याधरविमानं समागतं, विद्याधरः संभ्रांतः सन्नुत्थितः, तेन प्रोक्तं च भो भो संसिद्धमहाविद्यस्य स्वामिनश्चक्रसेनस्यार्द्धिं प्रेक्षस्व? प्रेक्षस्व? ततः प्रेक्षमाणयोश्चावयो रात्रिरतिक्रांता, प्रभातं संजातं, सूर्य उद्गतः, ततश्च स मां गृहीत्वा चक्रसेनसमीपं निर्वृतिकरं नाम मलयशिखरं गतः, तेन विद्याधरेश्वरः प्रणतः, आसने दत्ते, आवामुपविष्टौ, तेनातीतवृत्तांतश्चक्रसेनाय कथितः, तेन च भणितं भो महापुरुष! मा संतापं कुरु? अद्यैव ते प्रियतमां मेलयिष्यामि. अत्रांतरे द्वौ विद्याधरौ समागतौ, ताभ्यां चक्रसेनः प्रणतः, एकेन प्रोक्तं च

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हे महाराज! देवाज्ञयैव सकलजीवोपघातपरिरक्षणनिमित्तं भ्रमद्भिरस्माभिर्वनमध्ये एकस्मिन्नुद्देशे महाकायाजगरभयेनोत्तरीयं पटं मुक्त्वा हार्यपुत्रार्यपुत्रेति ब्रुवाणा पलायमानैका स्त्री दृष्टा, मृत्युभीतैर्निपत्य गृहीता च, मलयशिखरमुपनीता, पल्लवशयनीये विमुक्ता, कंचित्कालं मूर्छितेव स्थिता, ततो भयकंपमानांगी हा आर्यपुत्रार्यपुत्रेति ब्रुवाणा पल्लवशयनीयादुत्थिता, अस्माभिर्भणिता च हे सुंदरि! तव भयेनालं, तावत्कथय क्व ते आर्यपुत्रः? तयोक्तं जलार्थं सरोवरं गत इति. ततोऽस्माभिस्तत्र गवेषितः, न पुनरुपलब्धः, सा पुनस्तत एव दिवसादारभ्याकृतप्राणवृत्तिर्हार्यपुत्रार्यपुत्रेति जल्पनतत्परा तिष्ठति, एतत् श्रुत्वा देवः प्रमाणमिति. ततो विद्याधरसहितोऽहं नंदनवनाभिधानं मलयशिखरं गतः, सकलकलोपेतापि द्वितीयाचंद्रलेखाकारमनुकुर्वाणा कंठगतजीविता च विलासवती दृष्टा, मम हृदयेनोच्छ्वसितं, एषा समाश्वासिता, विद्याधरोपनीतेन सकलेंद्रियोपकारिणा दिव्याहारेण प्राणवृत्तिं कारिता, चक्रसेनाय कथितं यथा सैव मे प्रियतमेति. चक्रसेनेनोक्तं सुंदरं जातं, हे भद्र कथय तवापरं किं करोमि? मयोक्तमतोऽप्यपरं करणीयं नास्ति, तेनोक्तं हे भद्र देहलक्षणैरेवाहं जानामि, त्वया विद्याधरनरेंद्रेण भवितव्यं, तस्माद् हे महापुरुष! एतां व्यवसायमात्रसाध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नामजितबलां नाम महाविद्यां गृहाण? प्रायेणैषाऽविघ्नसाधना परिणामफलदा च. ततो मया बालभावे सांवत्सरिकेणोक्तं वचनं स्मृत्वा महापुरुषा माननीया इति विचिंत्य जल्पितं यद्यूयमाज्ञापयथेति. विद्या दत्ता, साधनोपायः कथितः, ततो विद्याधरेषु गतेषु मे चिंता समुत्पन्नास्याश्चैतत्सिद्धिक्षेत्रं, परमुत्तरसाधकेन विना कथं पुनरेतां साधयामीति, वसुभूतिः स्मृतिमागतः.

अत्रांतरे भवितव्यतावशेन महाविद्यासिद्धिं सूचयन्निव तापसवेषधारी वसुभूतिः समागतः, बाष्पार्द्रलोचनं सगद्गदाक्षरं चाहो दिव्यपरिणाम इति जल्पतानेनाहमालिंगितः, किमेतदिति सवितर्केण मया देव्या च स प्रणतः, हे मित्र! त्वं चिरं जीव? हे भ्रातृजाये! त्वमविधवा भवेत्यनेन जल्पितं, मया शब्देन वसुभूतिरित्युपलक्षितः, अहमनपेक्षणीयं परितोषं संप्राप्तः, आनंदबाष्पभरितलोचनं मया तस्मै पल्लवासनं दत्तं, देव्या चरणशौचं निष्पादितं, प्राणवृत्तिं कारितः, वृत्तांतः पृष्टो हे मित्र! कथं पुनस्त्वं समुद्रं निस्तीर्णः? किं वा त्वया प्राप्तं? सांप्रतं कुत इति. वसुभूतिनोक्तं शृणु?—यानपात्रे भग्ने सति फलकलग्नोऽहं भवितव्यतावशेन पंचभिर्दिनैः समुद्रमुल्लंघ्य मलयतटे उत्तीर्णः, समुद्रतटविलोकनगतेन तापसेन दृष्टः, तेन समाश्वासितो भणितश्च हे वत्स तपोवनं ग-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भावः, तपोवनं गतः, कुलपतिर्दृष्टः, सबहुमानं वंदितः, तेनाहं प्राणवृत्तिं कारितः, पश्चात्पृष्टो हे वत्स भवान् कुतः? मया तस्मै सकलवृत्तांतः कथितः, एष ईदृशः संसार इति तेनाहमनुशासितः, ततो मया चिंतितं मित्रवियुक्तस्य तपोवनमेव रमणीयं, अन्यत्र गमनेनालं, स्वप्नसमागमविभ्रमे स्वजनसंगमेऽनेन संसारपरिक्लेशेन चालमिति विचिंत्य कुलपतिंप्रति निजकाभिप्रायो निवेदितः, तेन च भणितं हे वत्सेदमुचितं, किंतु कर्मपरिणती रौद्रा, स्नेहतंतवो दुःपरित्याज्याः, इंद्रियाणि विषमाणि, विषया अभ्यस्ताः, संसारपरिक्लेशो दुस्त्यजः, सुमुनिजनचरितं विषमं, अंगीकृतापालनं च परभवेऽनर्थहेतुः, इहलोके लज्जाकारणं, तस्मादुचितमागमार्थं ज्ञात्वात्मनस्तुलनां कृत्वा संसारपरिक्लेशत्यागो युज्यते, न पुनरन्यथेति. अन्यच्च ज्ञानेनाहं जानामि तव प्रियसुहृत्सुखेन वर्तते, तेन तव संगमो भविष्यति, तस्मादिदं तावत्प्राप्तकालं, तपस्विजनमेव सेवमानः कंचित्कालं तिष्ठ? ततोऽहं मुनिवचनतस्तव दर्शने संजातप्रत्याशस्तपस्विजनसेवनपर एतावंतं कालं स्थितः, तृतीयदिवसे च मया तापसेन कुलपतेः पुरो निवेद्यमानस्तव वृत्तांतः श्रुतः, कथाप्रांते च स एव मे सुहृदिति कुलपतये उक्त्वा कुलपतिमनुज्ञाप्य मनोरथापूरकं प्रवृत्तः, संप्राप्तश्च, प्रभाते विद्याधरो दृष्टश्च, तव प्रवृत्तिं

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

पृष्टः, पूर्वबांधवेनेव तेन संपूर्णा कथिता च, ततोऽहं भवतो गवेषणां कुर्वाण इहागतः, एष मे वृत्तांत इति.

ततो मया चिंतितं विद्यासंपत्त्या भवितव्यमन्यथाऽप्रस्ताव एव वसुभूतेः समागमः कथं भवेत्? तस्मै विद्यालाभवृत्तांतः कथितः, तेनेषद्विहस्य भणितं च भो मित्र! सांवत्सरिकवचनमन्यथा न भवेत, विलासवत्या विद्यायाश्च संपत्त्यैव जानामि त्वया विद्याधरनरेंद्रेण भवितव्यं, तस्माद्वांछितं कुरु? ततस्तस्मिन्नेव मलयशिखरे पूर्वसेवा प्रारब्धा, मौनव्रतसेवनया परिमितफलाहारस्य विशुद्धब्रह्मचारिणो मम षण्मासा अतिक्रांताः. पूर्वसेवाकल्पः समाप्तः, विलासवती भणिता हे देवि धीरा भव? वांछितं संपन्नं, इह यद् दुष्करं तत्कृतं, सांप्रतमहोरात्रसाध्यं फलमिति. तयोक्तमार्यपुत्रस्य मनोरथाः पूर्णा भवंतु. ततो मया स्त्री कातरहृदयेति विचिंत्य सा नातिदूरदेशवर्तिन्यां मलयगिरिगुहायां स्थापिता, प्रधानसेवा प्रारब्धा, पंचवर्णानि कुसुमान्युपनीतानि, देवता स्थापिता, वसुभूतिर्दिक्पालः कृतः, पद्मासनबंधः कृतः, मुद्रामंडलानि निविष्टानि, शतसाहस्रिको मंत्रजापः प्रारब्धः, कापि वेलातिक्रांता, यावद्गगनांगणेन हसितमिव, अकालमेघैर्गर्जितमिव, समुद्रेण गुलगुलितमिव, पृथिव्या कं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पितमिव. ततो मया चिंतितं प्रियतमा जयं प्राप्स्यति, चक्रसेनवचनं स्मृतं, नात्रान्यो बिन्नीषिकां वेदयति, मंत्रजापः प्रवृत्तः, ततः स्तोकवेलायामेव मत्तहस्ती दृष्टः, कीदृश इत्याह—

दंताग्रविभिन्नलंबमानहस्तिपकः, कर्णपालीत्रुटितांकुशः, अमर्षावेशकुंमलीकृतकरः, करविक्षिप्त शीतलजलकणासारः, आसारतुल्यप्रवृत्तमदवारिपरिमलः, परिमलावपतन्मुखरभ्रमरकुलः, जलधरमेघ इव गुलगुलायमानः, हार्यपुत्रार्यपुत्रेति विलपंतीं विलासवतीमतिक्रम्यात्मन एव सन्मुखमागच्छन्निति. अहं च चित्तेन न क्षुभितः, बिभीषिकापगता. स्तोकवेलायां चातिभीषणकृष्णवर्णा विद्युत्स्फुलिंगलोचना गलोल्लंबितकरचरणमाला रुधिरार्द्रनरचर्मवस्त्रा कपालभाजनेन रुधिराश्रवं पिबंत्यट्टट्टहासाग्निना नभोंगणमुद्योतयंती वामहस्तेन भयसंभ्रांतलोचनां विलासवतीं गृहीत्वारेरे विद्याधरसंगदुर्विदग्धकापुरुष! क्व व्रजसीति जल्पमानाऽऽगमनवेगवायुनिपातितवृक्षसमूहा त्वरितं त्वरितमभिमुखमुपागच्छंती दुष्टपिशाचिका मया दृष्टेति. हृदयेनाहं न क्षुभितश्च, बिभीषिकोपशांता. स्तोकवेलायां चानभ्रमेव मेघैर्गर्जितं, रुधिरधाराभिर्वृष्टं, शृगालीभिः फेत्कारः कृतः, वेतालैर्धावितं, कबंधैर्नर्तितं, पुनः प्रज्ज्वलन्नयनतारकाभिरूर्ध्वकेशिकाभिर्डाकिनीभिर्विमुक्तवस्त्रं किलकिलितं, तथाप्यहं चित्तेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

न क्षुभितः, बिभीषिका प्रणष्टा. स्तोकवेलायां च केनाप्यज्ञातमेव प्रणष्टचंडदिवाकरे नरकप्रायघोरांधकारे महापातालभीषणे कूपेऽहं प्रक्षिप्तः, तत्र च भयस्यापि भयंकरा दंष्ट्राविकरालभीषणैर्मुखैः कपालमालाव्याप्ताभिर्ग्रीवाभिर्नाभिमंडलगतैः स्तनैः प्रलंबमाणमहोदर्यो मृतश्वानकलेवरतुल्यैः सक्थिभिस्तुंगतालस्कंधसंस्थानाभिर्जंघाभिस्तीक्ष्णकर्तरीभिर्नरकलेवराणि विकृतंत्यो ज्वलन्नयनतारकं चातिभीषणमितस्ततो विलोकमाना दुष्टा राक्षस्यो हण हण छिंद छिंदेति जल्पंत्योऽभिमुखं धाविताः, तथाप्यहं चित्तेन न क्षुभितः, बिभीषिका प्रशांता. ततोऽर्धप्रहरावशेषायां रजन्यां मंत्रजापे समाप्तप्राये सति सुरभिकुसुमपरिमलयुक्तो मनोज्ञपवनः प्रवातः, कुसुमवृष्टिर्निपतिता, जय जयेति कलरव उच्छ्रितः, किन्नरीभिर्गीतध्वनिः कृतः. ततः स्तोकवेलायामेव गगनांगणमुद्योतयंत्यनेकदेवतापरिवृताऽजितबलादेव्यागता, सा च दीपाग्नेः शिखेव, शारदरवेः प्रभासमृद्धिरिव, पूर्णचंद्रस्य ज्योत्स्नेव, वसंतकमलाकरश्रीरिव मया दृष्टा, तया च प्रोक्तमहो ते व्यवसायः! अहो ते पौरुषं! अहो ते निश्चयः! अहो ते उपयोग इति, तस्मादहं ते सिद्धा, इतो व्यवसायादुपरम? ततो मयाऽसमाप्तकतिपयमंत्रजापेन बिभीषिकाशंकया भगवतीमप्रणम्य मंत्रजापः पूर्णीकृतः, पश्चात्प्रणता च. अ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्रांतरे प्रधानकायहृदयंगमाः सुगंधगंधसंयुताः प्रधानमाल्यमंडिता लसद्धेमसूत्रकाः स्फुरदायुधप्रभा-श्चलत्कर्णकुंभला ज्वलच्छीर्षभूषणा निबद्धयौवनोद्धरा मृगांकशोभितानना नवारविंदसत्प्रभाः समस्त-लक्षणांकिता विचित्रकामरूपिणः समुद्रदुंदुभिस्वराः प्रणामविहितांजलयो विद्याधराः समागता इ-ति. देवतया प्रोक्तं च हे पुत्रक! महापुरुषव्यवसायगुणानुरंजितमंगीकृतभृत्यभावं चंडसिंहप्रमुखं विद्याधरबलं भवंतमेव प्रणमति.

ततो मयैष भगवत्याः प्रसाद इत्युक्त्वा विद्याधराः समीप्सिताः, देवतया प्रोक्तं च हे पुत्रक! तव विद्याधरनरेंद्राभिषेकं करोमि, मयोक्तं भगवती करोतु, किंतु देव्या वसुभूतेश्च प्रत्यक्षमिति. ततो वसुभूतिराहूतो यावन्न जल्पतीति, ततो निभालितो यावन्न दृश्यत इति. ततो मे हृदयेनाशं-कितं, विद्याधरसमेतश्च गगनांगणगमनेन गवेषयितुं प्रवृत्तः, एकस्मिन्निकुंजे इतस्ततः परिभ्रमन् व-सुभूतिर्दृष्टः. स चास्मान् प्रेक्ष्योभयकरगृहीतवृक्षशाखोऽरेरे दुष्ट विद्याधर मम प्रियमित्रजीवितादप्य-त्यधिकां विलासवतीं देवीमपहृत्य क्व गच्छसीति ब्रुवन् सन्मुखं धावित इति. ततो मया चिंतितं दे-व्यपहृता, मम परिश्रमोऽफलो जातः, वसुभूतिः पृष्टो हे मित्र देवी क्व क्व? ततस्तेन विद्याधरविप्र-

लब्धबुद्धिना ममोपरि प्रहारः कृतः, स मया वंचितः, तस्य शाखापहृता, ततो हस्ते गृहीत्वा हे मित्रान्यथा विकल्पेनालं, तावत्कथय क्व क्व देवीति पुनः पृष्टः, ततो विशेषेण प्रयुक्तलोचनव्यापारं मां विलोक्यानेन भणितं भो मित्र शृणु?—त्वयि प्रयुक्तविद्यासाधनारंभे जाते सत्यर्धरात्रसमये विद्याधरवृंदं समागतं, बिभीषिकाशंकया च तन्मयावगणितं, ततः स्तोकवेलायामेव हार्यपुत्रार्यपुत्रेति जल्पंत्या देव्याः शब्दः श्रुतः, मम हृदयेनाशंकितं, हे आर्य वसुभूते परित्रायस्व परित्रायस्वेत्याक्रंदं कुर्वाणा देवी विद्याधरविमानारूढा दृष्टा च. संभ्रमविशेषतः संजाताशंकेन मया गुहायां विलोकिता, यावन्नास्ति, ततो विमानानुसारेणाहं पृष्टतो धावितः, विमानं च न प्राप्तमतो न जानामि सांप्रतं क्व देवीति. मया चिंतितं विद्याधरेण देवी हृता, मम च गगनगमनशक्तिरस्ति, तस्मात्स क्व नश्यति? वसुभूतिश्च भणितो विषादं परित्यज? ममाजितबला सिद्धास्ति, तस्मात्स्तोकमेतदिति.

अत्रांतरे विद्या समागता, तया प्रोक्तं च हे वत्स किमेतत? तस्यै वृत्तांतः कथितः, त्वां कः पुनः परिभवतीत्येषा कुपिता, तस्या गवेषणनिमित्तं पवनगतिप्रमुखा विद्याधराः सर्वासु दिक्षु प्रेषिताः, विद्यादेव्याज्ञया च वयं तत्रैव मलयशिखरे स्थिताः, तृतीयदिवसे पवनगतिः समागतः, प्रोक्तं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

च हे देव! देव्युपलब्धा, मयोक्तं कुत्रोपलब्धा? तेनोक्तं हे देव! शृणु?—वैताढ्यपर्वते रथनूपुर-चक्रवालपुरं नाम नगरमस्ति, तत्रोपलब्धा, मयोक्तं कथं? तेनोक्तं हे देव शृणु?—इतोऽहं देवा-ज्ञया परिभ्रमन् रथनूपुरचक्रवालपुरं नगरं गतः, तत्सर्वमेव चोद्विग्नजनवृंदं दृष्टं, पुनः कीदृशमित्याह—सर्वदेवगृहेषु संपादितपूजोपचारं, भ्रमद्बलिशकटसहस्रसंकुलं, चत्वरेषु समारब्धविविधवस्तुहोमं चेति. ततो मया तत्रैको विद्याधरः पृष्टो हे भद्र! किमेतत? तेनोक्तं स्वामिनो दुर्नीतिवृक्षस्य कुसुमोद्गमः, मयोक्तं कथं? तेनोक्तं शृणु—

अत्रानंगरतिर्नाम विद्याधरो नगरस्वाम्यस्ति, तेन कामवशवर्तिना कस्यापि महापुरुषस्य विद्यासाधनोद्यतस्य प्रियतमापहृत्येहानीतेति, अनिच्छंतीं च तां बलाद् गृहीतुं प्रवृत्तः, अत्रांतरे एषा कथेत्यविचार्य प्रवर्धमानकोपानलोऽहमरेरे दुष्टविद्याधर! मयि जीवति सति मम जायां कथं परिभवसीति, कुत्र खङ्गं खङ्गमिति जल्पन्नमर्षणोत्थितोऽभिमुखं प्रवृत्तः, ततो देवः प्रसीदत्विति पवनगतिना जल्पितं, तेन प्रोक्तं च हे देवेदं कथानकं, श्वानः केसरिकिशोरभार्यां न पुनः पराभवति, तस्मात्कथाप्रांतमपि तावद्देवः शृणोत्विति. ततोऽहमुपविष्टः, पुनस्तेन भणितं बलाद्ग्रहणप्रवृत्तस्यायोग्य-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वमिति कृत्वा महाकालीविद्योपस्थिता, भूमिकंपः संजातः, उल्का निपतिताः, निर्घातः समुद्भूतः, तयानंगरतिर्विद्याधरो भणितश्च भो भो संप्राप्तविद्याधरनरेंद्रशब्दस्येदं कापुरुषचेष्टितं न युक्तं, ततः सोऽस्माद्व्यवसायात्कायेन निवृत्तः, न पुनश्चित्तेन, नगरदेवतायां च प्रकुपितायां पुनर्नगरविनाशो भावीति संजाताशंकैर्नागरिकैः शांतिकर्म प्रारब्धं ततो मयोक्तं सा पुनः स्त्री क्व तिष्ठति? तेनोक्तं नरेंद्रभवनोद्याने सहकारवृक्षतले इति. ततो मया नातिदूरदेशवर्तिना गगनतलसंस्थितेन देवी विलोकिता, अनेकविद्याधरीवृंदमध्यगता वामकरतले स्थापितं वदनकमलमुद्वहंती दृष्टा चेति, आरक्षकविद्याधरसंबाधभावाद्देवस्यादेशाभावाच्चाहं तस्याः समीपं न गत इहागतश्च, एतच्च श्रुत्वा देवः प्रमाणं, ततो मया वसुभूतिः प्रलोकितः, तेन च प्रोक्तं भो मित्रेदं तावदत्र प्राप्तकालं, नगरदेवतोपदेशेन खलु स राजा लज्जितः, तस्मात्तस्य समीपे मधुरवचनपूर्वकमेव देवीयाचनानिमित्तं कंचिद् दूतं प्रेषय? तदा ब्रह्मदत्तविद्याधरभटेनोक्तं स्वदारानयनेऽपि दूतसंप्रेषणमपूर्वः सामभेदः, समरसेनभटेनोक्तं तस्यापि दूतसंप्रेषणमिति महानक्रमभावः.

वायुवेगविद्याधरेण पुनर्वांछितं न संपन्नमिति प्रोक्तं, वायुमित्रेण तु देवो जानातीत्युक्तं, चंडसिंहेन

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विहसितं, पिंगलगंधारेणोन्नाटितं, मतंगेन प्रकंपितं, अमृतप्रभेण निःश्वसितं. ततः सुभटत्वेन वी- रैकरसानां तेषामनिष्टोऽप्येषा राज्यस्थितिरिति तान् प्रतिबोध्य पवनगतिरेव दूतः प्रेषितः, एष भणि- तश्च हे भद्र त्वया स विद्याधरनरेंद्रो वक्तव्यो यत्खल्वयशसः कारणमात्मनो हारकं मर्यादावारकं लोकस्य हासकं शत्रूणामानंदकमुभयलोकविरुद्धं च तत्सत्पुरुषः कथं समाचरति? परदारहरणं च विरुद्धं, तस्मादेतमसद्व्यवसायं परित्यज? तस्य भार्यां प्रेषय? अप्रतिपद्यमाने च त्वया देवी वक्त- व्या यथा त्वया खेदो न कर्तव्यः, त्वमुपलब्धेति. ततो यद्देव आज्ञापयतीत्युक्त्वा पवनगतिर्गतः, द्वितीयदिवसे चागतः, तेन च भणितं हे देव! भवता यथादिष्टं तथा भणितः स विद्याधराधमः, परं देवाज्ञा नांगीकृता, तेन प्रोक्तं च धरणीगोचरोऽप्येतमसद्व्यवसायं परित्यजेत्याज्ञां मम कथं प्रेष- यति? तस्मात्तस्य भार्यां न प्रेषयामि, यस्मै कथनीयं तस्मै कथयत्वहं धावित्वा रणसंमुखमागमि- ष्यामि, एतत् श्रुत्वाहं सद्यो वलित्वा विलासवत्याः समीपं प्राप्तः, भक्तवांश्च भवत्या मनसि खेदो न कर्तव्यः, तव शुद्धिर्लब्धास्ति, अथ स्तोकैरेव दिवसैर्वियोगो नाशं प्राप्स्यति, तदा विलासवत्युवाचा- र्यपुत्रस्य गृहिणीशब्दं वहंत्या मम कः खेदः?

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत एवं श्रुत्वा विद्याधरभटाः क्षुभिताः, ब्रह्मदत्तेन गुरुकं विजृंभमाणामर्षविशेषेण हुंकारितं, समरसेनेन रणोत्साहपुलकितेन भुज आस्फालितः, वायुवेगेन रोषरक्तीभूतनेत्रतारका भृकुटीविशेषभीषणा दृष्टिः खड्गरत्ने निपातिता, वायुमित्रेण रिपुप्रहारविषमं वक्षःस्थलमुन्नामितं, चंडसिंहेन कोपानलप्रज्ज्वलितेनापि मुखमंधकारितं, पिंगलगंधारेण बाहुयुगलमुच्चैलितमिव विजृंभितं, मतंगेन प्रकंपितपर्वतं धरणीतलं समाहतं, आसन्नसमरपरितोषस्फुटितव्रणमुखेनामृतप्रभेणाश्वसितं, निःशेषभरितगिरिगुहाकंदरं देवौषधेन हसितं. ततो मया भणितमासन्नविनिपातः प्रणष्टबुद्धिविभवश्च स तपस्वी, तस्मात्तस्मिन् संरंभेणालं, यूयं तिष्ठत? अहं पुनरितो गत्वा खड्गद्वितीयश्चैव तस्य भूमिगोचरपराक्रमं दर्शयामि. विद्याधरैर्भणितं हे देव खलु स देवस्य भृत्यपराक्रममपि सोढुमसमर्थः, किमंग पुनर्देवपराक्रमं?

अत्रांतरे विद्याधरबलं मिलितं, मे विमानमुपानीतं, अजितबलाप्रवर्तितविमाने वसुभूतिसमेत उपारूढः, मंगलतूर्यं समाहतं, अनुकूलमारुतांदोलितविमानध्वजपटं विद्याधरबलं चलितं, जयजयशब्दः समुद्घुष्टः, कुसुमवृष्टिर्निपतिता, आनंदः समुद्भूतः, आकाशगमनेन नानाविधग्रामाकरनगर-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शतशोभितं महीमंडलं प्रेक्षमाणः रणरसोत्साहेनाजातपरिश्रमोऽहं स्तोकवेलयैव वैताढ्यपर्वतं प्राप्तः, अजितबलादेशतस्तदधस्तादावासितः, त्रिरात्रोपवासः कृतः, सर्वविद्यानां पूजा संपादिता, शेषविद्याधरा मम मैत्रीमुपागताः, अवद्यविलसितेनानंगरतिना ज्ञातं, तेन दुर्मुखो नाम सेनापतिः प्रेषितः, स महता विद्याधरबलेन सह समागतः, परसैन्यमागतमित्यस्माकं सैन्ये कलकलरव उत्थितः, समरभेर्याहता, विद्याधराः सन्नद्धुं प्रवृत्ताः, मया खड्गरत्नं गृहीतं, अत्रांतरे तस्य दूतः समागतः, तेन च भणितं भो भो प्रपन्नभूमिगोचरभृत्यभावा विद्याधरभटाः सेनापतिशासनं निशामयत? अहं दुर्मुखाभिधानेनानंगरतिसेनापतिना प्रेषितोऽस्मि, तेन पुनर्भणितं भूमिगतयोधानां युष्माकमतिप्राचुर्यमस्ति, यदप्रतिहतशासनेनानंगरतिदेवेन सार्धं समरश्रद्धा कृता, यूयं देवराजधानीं प्रवृत्ताः, तस्मादमुना क्लेशेन किं? सज्जा भवत? देवस्यैकभृत्योऽहमत्र युष्माकं विग्रहं संपूर्णयामि, एतत् श्रुत्वानंगरतिर्नागत इति मया खड्गरत्नं मुक्तं, सेनापतिरागत इति विद्याधरबलं मुकुलितं, अहमप्यत्र सेनापतिरिति चंडसिंह उत्थितः, चंडसिंहेन भणितं हे देवाज्ञां देहि? विद्याधरभटा देवस्य भृत्यविलसितं प्रेक्षंतां? ततो मयैतदुचितमिति विचिंत्य कंठकुसुमदाम दत्तं, तेन प्रणामपूर्वकं तद् गृही-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तं, दुर्मुखबलाभिमुखं धावितः, अहं विद्याधरैः सह विमाने स्थितः, समरप्रेक्षकाः सुरसिद्धा अप्सर-
सश्चागताः, युद्धं प्रवृत्तं, गगनतलं शरसमूहेन मेघवृंदेनेवाछन्नं, निर्घाता इव खड्गप्रहाराः पतंति,
आहन्यंते विद्याधराः, मिलितौ च सेनापती, ततश्चंडसिंहेन जल्पितमरेरे दुराचारकुतो भव? अहं
चंडसिंहस्त्वं च दुर्मुख इति, एषोऽहं समागतः, गदायुद्धं लग्नं, दुर्मुखेन प्रहारो दत्तः, चंडसिंहेन प्र-
तीक्षितः, ततो रोषारक्तलोचनेन कीदृशस्तव प्रहारः? मे सांप्रतं सहस्वेति भणता तस्योत्तमांगे प्र-
हारो दत्तः, विह्वलः सन् स मुक्तरुधिरोद्गारं धरणीपृष्ठे निपतितः, दुर्मुखबलं भग्नं, जयजयरव उद्घु-
ष्टः, सुरसिद्धैश्चंडसिंहस्योपरि कुसुमवृष्टिर्विमुक्ता, सेनापतौ विनिर्जितेऽहं वैताढ्यपर्वतमारूढः, रथनू-
पुरचक्रवालपुरप्रदेशं गतः, मयानंगरतिसमीपं द्वौ विद्याधरौ प्रेषितौ, तौ च भणितौ, तं कथयतां
भोऽनंगरतेऽनेनाल्पोदकसंस्थितमीनचेष्टितेन किं? राज्यं मुक्त्वा तपोवनं वा याहि? मम विषमको-
पेंधनोत्पन्नशस्त्रानलाग्न्याहुतिरिव भविष्यसि, तौ मम चरणयुगलं वंदित्वा गतौ, स्तोकवेलयैव पश्चा-
दागतौ, ताभ्यां भणितं हे देवावाभ्यां भवच्छासनमनुशिष्टं, देवेन यथादिष्टं तथैवानंगरतये उक्तं,
कुपितश्चैषः, धरणीपृष्टं समाहतं, अरे धरणीगोचराहं ते शस्त्रानलाग्न्याहुतिर्भवामि न, पुनर्मम त्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मिति, तस्मात्किमनेन? स्तोकमत्रांतरमित्युक्त्वा तेन समादिष्टं सन्नाहभेरीं ददत? शकटव्यूहं रचयत? धरणीगोचरो बहुभूमिमुल्लंघ्य समागत इति.

ततो भेर्याहता, सैनिकैरनेकधा भेरीशब्दः श्रुतः, किंविशिष्टैः सैनिकैः? प्रथमं भयग्रस्तलोचनैः कातरपुरुषैः, आसन्नविरहोत्सुक्यगलदश्रुधाराभिः सेनाभटीभिः, चिररूढस्फुटितव्रणकंदरैः, रणरसोद्भिद्यमानपुलकैः, स्वस्वामिकृतप्रतिमोदनाशतैः सुभटैः, प्रथमरणदर्शनोत्सुकै राजकुमारैः, निजनियोगसंपादनत्वरितैर्नियोगकारिभिरिति. ततोऽनंगरतिबलं सन्नध्धुं प्रवृत्तं, दीप्तौषधीपरिगताः शैलकूटा इव कांचनसन्नाहा ढौक्यंते, दुर्जनवाण्य इव विभेदकारिण्यो भल्ल्य आनीयंते, यमजिह्वासदृश्यः सुभटजनरुधिरलालसा बहुजनजीवितहारिण्योऽसियष्टयः प्रकटीक्रियंते, गुणनिबद्धा अतिप्रकृतिकुटिला वेश्यास्त्रिय इव धनुर्यष्टयः, खलजनालापा इव मर्मोद्घाटनसमर्थाश्च नाराचाः, अशनिलतासदृशाश्च गदाः प्रकटीक्रियंते. एवमुपनीयमानैः समरोपकरणैः केनापि प्रियतमापयोधरस्पर्शरोधक इति सन्नाहो न कृतः, अन्येन समरमुखबद्धरागेण घोराश्रुकं शब्दं रुदंत्यपि वधूर्न गणिता, अन्येन तत्क्षणशिथिलवलया विवलितकांचीदामा नयननिर्गताश्रुसलिला मंगलविलक्षहसितैर्गाढं सं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तापमवधीरयंती प्रियैषोऽहमागत इति समाश्वासिता, गमनोत्सुकस्यान्यस्य प्रियया वदनसमर्पितं वारिणा भृतं वर्तुलकं पीयमानमपि तयाश्रुभिः सुष्टुतरं भृतं, अन्यया च प्रियतमे निर्गच्छति सति मूर्छया चैवानुरागो दर्शितः, एवं च वर्तमानेऽनंगरतिबल्ले वयमत्र समागताः, सांप्रतं देवः प्रमाणमिति. ततो मया भणितं समरसन्नाहभेरीं ताडयत? आदेशसमनंतरमेव समरभासुरेण सा ताडिता, सा च कुपितकृतांतहुंकारसन्निभा वज्रप्रहारस्फुटद्गिरिभीषणा प्रलयजलदशब्दसदृशं गर्जितुं प्रवृत्ता. समरसाहसरसिकानां विद्याधरभटानां च कलकलरवः समुच्छितः, ततो नीयमानविलेपनं, दीयमानसुरभिकुसुममालं, पीयमानप्रवरासवं, हास्यमानवल्लभं, सन्मान्यमानसुभटं, आलोक्यमानसंनद्धं, वर्ण्यमानप्रतिपक्षं, सज्जमानविमानं, उद्ध्रियमानसुभटेंधनं, भिद्यमानपताकं, प्रलंब्यमानचामरं, बध्यमानकिंकिणीजालं, रच्यमानपुष्पविशेषं, मंड्यमानातपत्रं, संपाद्यमानगमनमंगलं, उद्घोष्यमानजयजयशब्दं, श्रूयमानवादित्रशब्दं, आपूर्यमाणरणांगणं, प्रवर्तमानकलकलं, प्रधावमानपरिजनमस्माकमपि बलं सन्नद्धमिति.

विद्याधरभटा उत्पतिताः, विमानानि प्रचलितानि, पद्मव्यूहरचना विन्यस्ता, व्यूहस्याग्रतश्चंम-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सिंहः स्थितः, वामपार्श्वे समरसेनः स्थितः, दक्षिणेन देवौषधः, पश्चिमेन मातंगः, मध्ये पिंगलगं-
धारश्च स्थितः. अहमपि च वायुवेगप्रमुखविद्याधरराजपरिवृतो विमानारूढो गगनमार्गे स्थितः. ततो-
ऽनंगरतिबलं निकटीभूतं, मया परबलराज्ञां नामान्यमितगतिः पृष्टः, तेन च भणितं हे देव! शकट-
व्यूहस्य मुखे कंचनदंष्ट्रः स्थितः, वामपार्श्वेऽशोकः स्थितः, दक्षिणे कालजिह्वः, मध्ये विरूपः स्थि-
तः, अनंगरतिश्च पृष्टतः स्थितः, परबलदर्शनप्रहृष्टं चंडसिंहबलं प्रचलितं, युद्धसज्जं कांचनदंष्ट्रसैन्यं
तस्य पुरतः स्थितं. ततो वाद्यमानसमरतूर्यं बलवद्विद्याधरमुद्घोष्यमाणपूर्वपुरुषगोत्रं मुच्यमानसिंह-
नादं युद्धं समारब्धं, तत्र खलसमूहस्य इवासुखदा भल्ल्यो निपतंति, कालरात्रिदृष्टिसदृशा नाराचा
आयांति, यममहिषशृंगतुल्या गदाः पतंति, लघुकृतवज्रपातमाहात्म्या मुद्गराः प्रसरंति, अर्धचंद्रछिन्ना-
न्युत्पातमम्लानीवातपत्राणि पतंति. ततः शोणितसिक्तमहीतलं विद्याधरशीर्षसंकुलं बहुपतितकबंध-
भीषणं निपत्यमानप्रहरणशब्दसंकुलं, संनाहनिपतितासिसंभूतहुतवहज्वालाकुलं च महासमरं संजा-
तमिति. असिशक्तिकुंतचक्रैर्द्वावपि नायकौ योध्धुं लग्नौ, प्रधानयुद्धमापतितं, ततः कांचिद्वेलां युध्वा
चंडसिंहो विषण्णः, कांचनदंष्ट्रेन खड्गरत्नेन ललाटपट्टे आहतः, एष निपतितश्च, अनंगरतिबले वि-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

षमतूर्यनिर्घोषसहितः प्रबलकलकलरवः समुद्भूतः, चंमसिंहसैन्यं भग्नं, अनंगरतिबलमुच्छ्रितं. ततोऽहं समरसेनप्रमुखविद्याधरनरेंद्रसहितोऽनंगरतिबलस्याभिमुखं धावितः, तेन सार्धं मया महायुद्धं समारब्धं, किंविशिष्टं युद्धं? तच्च मुक्तत्रिदशकुसुमौघं प्रतिभटसंघटितभटौघसंकुलं संजातं, तत्क्षणमेवाकर्णाकृष्टजीवाकोटिवक्रीकृतचापमुक्तैः शरैर्घनजलधरैरिव गगनतलमापूर्णं, अन्योन्यापतत्खणखणत्करवालनिवहसंजनितस्तम्भिज्वाल इव समंताद्विस्फुलिंगौघो विस्फुरितः, तत्क्षणं क्षुरप्रनिवहैश्छिन्नशरघनजालांतरिता विमानानां धवलध्वजा राजहंसा इव नष्टाः, कुंताग्रभिन्ना निर्दयदर्पितविद्याधरेश्वरसमूहा रुधिरवृष्टिं वर्षंति, भयजनकप्रलयमेघ इव सिंहनादं मुंचंति, अन्योन्यरणरसोद्भूतपुलकाः सुभटा दर्पोध्धुरं भिन्नमालवक्षाशक्तीः प्रहरंतीति.

एवं च वर्तमाने महासमरे मयानंगरतिर्दृष्टः, एष भणितो भो भो विद्याधरेश्वर! एतैर्विद्याधरभटैर्व्यापादितैः किं? तव मम च विवादोऽस्ति, तस्मादित एहि? ततः सोऽपि हसित्वा मेऽभिमुखं चलितः, भणितं चानेनारे धरणीगोचर! तव मया सह विवादः कीदृशः? किं त्वया केसरिशृगालयोर्विवादः क्वचित् श्रुतः? मया भणितमनेन जल्पितेन किं? समागता निर्णयवेला, तस्मादे-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ते समरसाक्षिणः सुरसिद्धविद्याधरा भणिष्यंति, योऽत्र शृगालो यश्च वा केसरीति, अत्रांतरे सुरसिद्धविद्याधरैः साधुवादो वितीर्णः, बलान्यपसृतानि, समरव्यवहारसाक्षिणो विद्याधरेन्द्राः स्थिताः, आवामपि गगनचारिणौ स्थितौ, अनेन ममोपर्यशनिवृष्टिर्मुक्ता, सा च चर्मरत्नेन भगवत्या वारिता, स्फुरत्करवालभासुरा विद्यासंगता मेधाबलापि च भगवती मे वामपार्श्वेऽदूरे स्थिता, मया भणितं भो भो विद्याधरेश्वर! एतन्न न्याययुद्धं, तस्मादनेन मायायुद्धेन किं? निजबलेन युध्यावः, तेन प्रतिपन्नं, अहं तेन शक्त्या हतः, प्रहारवेदनाकुलः सन्नहं धरणीपृष्ठे निपतितः, कलकलरवः समुच्छितः, अनंगरतिबलेन किलकिलितं, अमर्षवशेन रोषस्फुरिताधरं चाहमुत्थितः, मयाप्यनंगरतिर्गदया हतः, भिन्नशिरस्त्राणमस्तकः स धरायां निपतितः, कलकलरव उच्छितः, स मया निवारितः, तस्य समीपं गतः, समाश्वास्यैष उत्थापितः, स बाहुयुद्धे मया सह लग्नः, ततो दर्पोद्धुरौ वृषभाविव, पवनाहतौ जलधराविव, मत्तौ दिग्गजाविव द्वावप्यावां तथा संप्रलग्नौ यथा रुधिरधारापरिसिक्तगात्रयोः प्रहारसंचूर्णितमुकुटयोरावयोः सुरसिद्धविद्याधरैर्विशेषो न लक्षितः.

ततो मया विद्याबलातिरेकेणानंगरतिर्विनिर्जितः, सुरसिद्धविद्याधरैर्जयजयशब्द उद्घुष्टः, म-

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

मोपरि कुसुमवृष्टिर्विमुक्ता, जयतूर्यं समाहतं. ततो मया दीयमानमपि राज्यमनंगीकृत्यानंगरतिस्तपोवनं गतः, अहमपि सकलविद्याधरेंद्रपरिवृतो नगरं प्रविष्टः, विरहपरिदुर्बलांग्यानंदाश्रुप्रवाहाकुललोचना देवी दृष्टा, मयेषद्विहसितं, एषा च लज्जिता, रूपविस्मिताकृष्टहृदयैर्विद्याधरेंद्रैः प्रणता, नगरव्यवस्थाश्च कृताः, उभयबलविद्याधरेश्वरैरहं तत्र राज्येऽभिषिक्तः, नीतयः स्थापिताः, कतिचिद्दिनानि व्यतिक्रांतानि, कतिपयविद्याधरैर्विलासवत्या च समं गुरुजनदर्शनार्थमहं गतः, तेषां च चरणौ वंदितौ, विभूतिदर्शनेनानंदो जनितः, विलासवतीनिर्गमनदुःखितः सिद्धादेशविज्ञातसकलवृत्तांतस्तत्प्रभृत्यनंगवत्युपरि कुपित ईशानचंद्रस्तत्र गत्वा सविनयं प्रसादितः. एवं कतिपयदिनानि गमयित्वा निजराज्ये समागतः, कोऽपि कालोऽतिक्रांतः, राज्यसुखमनुभवतश्च मे पुत्रो जातः, तस्य चाजितबल इति नाम कृतं, स कुमारभावं प्राप्तः. अत्रांतरे बहुशिष्यपरिवृतः संपूर्णश्रमणगुणधरश्चतुर्ज्ञानसंयुतश्चित्रांगदो नाम भगवान् विद्याधरश्रमणः समागतः, मया परिजनमुखात्तदागमं ज्ञातं, भगवद्दर्शनप्रतिपत्त्यै चाहं निर्गतः, भगवान् वंदितः, भगवता धर्मलाभितः, तेन च भणितं भो भो विद्याधरेश्वर! त्वया पूर्वभागधेयानां फलं प्राप्तं, तस्मादेतद् ज्ञात्वा पुनरपि कुशलपक्षे मतिं कुरुष्व-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ति. मया भणितं कीदृशः कुशलपक्षः? भगवता प्रशमसंवेगमूलो जिनदेशितो धर्म आविःकृतः, अस्माकं परिणतः, सम्यक्त्वं प्रतिपन्नं, अणुव्रतानि गृहीतानि, भगवांश्चित्रांगदः पृष्टो भगवन् किं मया पूर्वमाचरितं यस्यायं विचित्रः प्रियतमाविरहज्वलनसंतापरूपः परिणामः संजातः? भगवता भणितं शृणु?—

अस्त्यत्रैव भारते वर्षे कांपिल्यं नाम नगरं, तत्र चंडगुप्तो नाम नरपतिरभूत्, जगत्सुंदरी तस्य भार्यासीत, तयोः सुतो रामगुप्तो नाम त्वं बभूव. एषा च ते प्रियोत्तरापथे नरेश्वरतारापीठनृपसुता हारप्रभा नाम प्रियासीत्, त्वया चानया सह विषयसुखमनुभवतानाभोगत इदं कर्म कृतं, वसंतसमये उपस्थिते युवां भवनोद्याने क्रीडितुं गतौ, क्रीडा कृता च, भवनदीर्घिकायां युवां मज्जितौ, तीरसंस्थितेषु कदलीगृहेषूपविष्टौ, कुंकुमविलेपनमुपनीतं, अंगरागश्च कृतः. अत्रांतरे हंसमिथुनं समागतं, ततः कौतुकेन सरसकुंकुमविलिप्तहस्तेन त्वया हंसी गृहीता, राज्ञ्या हारप्रभया हंसश्च गृहीत इति. तयोर्विरहदुःखं जनितं, कुंकुमरागेण परिस्पृष्टौ, स्तोकवेलया विमुक्तावन्योन्यं गवेषितुं प्रवृत्तौ, कुंकुमरागसंगेन चक्रवाकाशंकया दर्शनेऽपि परस्परमनभिजानद्भ्यां विरहवेदनातुराभ्यां मरणं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्यवसितं, द्वाभ्यामपि गृहदीर्घिकायामात्मा प्रवाहितः, निरुद्धनिःश्वासं च जलमध्ये निमग्नौ. ततो जीवितस्य दुःपरित्यज्यतया प्रियसंगमस्य भवितव्यतया कर्मणोऽचिंत्यशक्त्या कुंकुमरागमुपनीतं. कंठगतप्राणौ सहसोन्मग्नौ, परस्परं दर्शनं जातं, अन्योन्यं प्रत्यभिज्ञातौ. एतद् दुःकर्म त्वयाचरितं, अत्र व्यतिकरे च यत्कर्म बद्धं, तस्यैष परिणामः संजातः. ततो मया चिंतितमहोऽल्पं निदानं महांश्च विपाक इति, तस्मादनेकदुःखसंवर्धकेनानेन प्रयासेनालमतो भगवतः समीपे श्रमणत्वं प्रपद्ये, इति भणितश्च भगवांश्चित्रांगदो हे भगवन्ननेन निजचरित्रश्रवणेन मे चित्तं विरक्तं, तस्मान्मेऽनुग्रहं कुरुध्वं? अस्या भवाटव्या निस्तारयथ? मह्यं श्रमणलिंगं ददत? भगवता प्रतिपन्नं. ततोऽहं निजसुतायाजितबलाय राज्यं दत्वा वसुभूतिना देव्या च सह श्रमणत्वं प्रपन्नः, तदेतन्मे विशेषकारणमिति.

ततो जयकुमारेण भणितं हे भगवन् शोभनं विशेषकारणं, त्वं धन्यः, कथं पुनर्भवाटव्या उत्तरणं स्यात? उत्तीर्णानां वा कुत्र गमनं? भगवता भणितं शृणु?—अत्राटवी द्विविधा, द्रव्याटवी भावाटवी च, तत्र द्रव्याटव्यास्तावदुदाहरणं—यथा कुतोऽपि नगरात्कोऽपि सार्थवाहः पुरांतरं गं-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तुकामो घोषणं करोति, यो मया सहामुकं पुरं गच्छति तमहं निर्देशकारिणमविघ्नेन तं पुरं प्रापयामि, तेन सह बहवः सार्थिका गंतुं प्रवृत्ताः, ततश्च स तेभ्यः पथो दोषगुणान् कथयति, भो भो सार्थिका अत्र खल्वेकः पंथा ऋजुरपरो मनागनृजुः, तत्र योऽनृजुस्तेन बहुना कालेन सुखेन गम्यते, पर्यंते सोऽपि ऋजुकमवतर्यैप्सितं पुरं प्राप्यते, यः पुन ऋजुस्तेन दुःखतरेण गम्यते, शीघ्रं च पुरं प्राप्यते, यस्मात्सोऽतीवविषमः संकीर्णश्च, तत्र खल्ववतारे चैवात्यंतभीषणावभिलषितपुरसंपत्तिविघ्नहेतू द्वौ व्याघ्रसिंहौ परिवसतः, तौ चावतरितुं चैव न प्रयच्छतः, ततस्तौ पुरुषाकारेण विध्वस्यावतरितव्यं, अवतीर्णानामपि च तावदनुवृत्तं यावदभिलषितपुरीसमीपयुन्मार्गलग्नांश्च प्राणिनो व्यापादयतः, मार्गलग्नांश्च न भञ्जवतः. अत्रैके स्निग्धपत्रयुताः सुरभिकुसुमशोभिताः शीतलच्छाया मनोहरा वृक्षाः संति, अन्ये च परिशटितपांडुपत्राः कुसुमफलविवर्जिता अमनोहराश्च वृक्षाः संति, तत्र प्रथमानां छायापि विनाशकारणं, किं पुनः परिभोगः? तेषु न विश्रमितव्यमिति, इतरेषु मुहूर्तमात्रं विश्रमितव्यं. अत्र मार्गे तटस्थिता मनोहररूपधारिणो मधुरवचनाश्च बहवः पुरुषा आह्वयंति, भो सार्थिका आगच्छत? आगच्छत? वयमपि तत्पुरं गमिष्यामः, तेषां वचनं न श्रोतव्यं. सुसार्थि-

काः पुनः किंचित्कालं क्षणमपि न मोक्तव्याः, एकाकिनश्च नियमाद्भयं, दुरंतश्च स्तोको दवाग्निरप्रमत्तैरुल्लंघितव्यः, अनुल्लंघ्यमानो नियमाद्दहति, पुनश्चोच्चैर्दुर्गश्च पर्वतोऽस्ति, सोऽप्युपयुक्तैर्लंघितव्यः, अलंघने च नियमान्म्रियते. ततोऽपि च महत्यतिगंभीरगह्वरा वंशकुडंग्यस्ति, सापि च द्रुततरं त्यक्तव्या, तस्यां संस्थितानामनेके उपद्रवा भवंति, ततोऽनंतरं च लघुको गर्तालयोऽस्ति, तस्य समीपे मनोरथो नाम ब्राह्मणो नित्यमेव परिवसति, स च भणति मनागेतं पूरय? ततो गच्छ? तस्य वचनं न श्रोतव्यं, तदवगत्य गंतव्यं, स खलु न पूरयितव्यः, स हि पूर्यमाणो महत्तरो भवति, पथश्च परिभ्रंशते, अत्र च दिव्यानि पंचप्रकाराणि नेत्रादिसुखकराणि किंपाकानां फलानि संति, तानि न प्रेक्षितव्यानि, नापि भोक्तव्यानि.

अत्र द्वाविंशतिर्घोरा महाकरालाः पिशाचाः क्षणं क्षणमुपद्रवंति, तेऽपि न गणितव्याः, अत्र विभागतो विरसं दुर्लभं च भक्तपानं भवति, विषादिना न भवितव्यं, अप्रयाणकं न कर्तव्यं, रजन्यामपि यामयुग्मं नियमेन गंतव्यं, एवं च गच्छद्भिर्देवानुप्रिय! क्षिप्रमेवाटवी लंघ्यते, लंघित्वा च तमेकांतदौर्गत्यवर्जितं निर्वृतिपुरं प्राप्यते, तत्र पुनः केऽपि क्लेशोपद्रवा न भवंति. एष दृष्टांतोऽयंपु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नरुपनयः—अत्र त्रिलोकचिंतामणिः सुरासुरपूजितोऽर्हन् सार्थवाहोऽस्ति, तथा क्षेपणीविक्षेपणीसंवेदनीनिर्वेदनीलक्षणा धर्मकथा घोषणा, संसाराटवीलंघनेन निर्वृतिपुरप्रस्थिता जीवाः सार्थिकाः, नारकतिर्यग्मनुष्यदेवगतिलक्षणः संसारः पुनरटवी, साधुधर्म ऋजुः पंथा, श्रावकधर्मो मनागनृजुश्च, सोऽपि पर्यंते साधुधर्मफल एव, भावतः प्रपन्नसाधुधर्माश्च संसाराटवीं लंघयंति, जन्मजरामरणरोगशोकाद्युपद्रवरहितं शिवपुरं पुनरिप्सितपुरं, मोक्षविघ्नहेतू रागद्वेषौ व्याघ्रसिंहौ, आज्ञयामनिभूताः प्राणिनो मायेंद्रजालसदृशं जीवलोकं प्रेक्षमाणा अपि परमपदसाधकं श्रमणत्वं प्रतिपत्तुं न शक्नुवंति, एतौ प्रपन्नव्रतानामप्यसंप्राप्तकेवलभावानां मार्गं न मुंचतः, विमुक्तजिनवचनमार्गान् जीवांश्चाभिभवतः, न पुनरितरानिति. सप्रतिबंधाः स्त्रीपशुपंडकसंसक्ता वसतयो मनोहरवृक्षच्छायाः, अनवद्यवसतयः परिशटितपांडुपत्रा वृक्षाश्च, श्रमणाः पुनः सुसार्थिकाः, क्रोधो दवाग्निः, मानः पर्वतः, माया वंशकुडंगी, लोभो गर्तालयः, इच्छाविशेषो मनोरथब्राह्मणः, घनपूरणादप्यस्यापर्यवसानगमनं, शब्दादयो विषयाः किंपाकफलानि, शीतोष्णक्षुधापिपासादयश्च द्वाविंशतिः परीषहाः पिशाचाः, अनवद्यं मधुकरवृत्त्यैषणीयं विरसं भोजनं, अप्रमादः सदा प्रयाणकं, स्वाध्यायकरणं रजन्यामपि यामयु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गमगमनं, देवानुप्रिय! एवं च वर्तमानैः शीघ्रमेव भवाटवीं लंघ्यते, लंघित्वा च तदेकांतमनाबाधं शिवपुरं प्राप्यत इति. ततः संजातसम्यक्त्वदेशविरतिपरिणामेन जयकुमारेण भणितं हे भगवन्नेव-मेतन्नान्यथा. अणुव्रतानि गृहीतानि, नगरं प्रविष्टः, पित्रा तस्य युवराज्याभिषेकः कृतः, तं सनत्कुमारं भगवंतं सेवितुं प्रवृत्तः, मासकल्पो निवृत्तः, भगवांश्च गतः.

अत्रांतरे स धनश्रीजीवस्तस्मान्नरकादुध्धृत्य संसारं भ्रांत्वानंतरजन्मनि तथाविधां कामप्यकाम-निर्जरां प्राप्य मृतः सन्नस्यैव जयकुमारस्य भ्रातृत्वेन समुत्पन्नः, कालक्रमेण जातः, तस्य विजय इ-ति नाम प्रतिष्ठापितं, स च कुमारभावं प्राप्तः, विजयो जयकुमारस्य वल्लभोऽभूत्, जयकुमारश्च वि-जयस्यावल्लभोऽभूत, एवं च कोऽपि कालोऽतिक्रांतः. अन्यदा च संसारस्यासारतया मृत्योर्निरपेक्षत-या कर्मपरिणामस्य विचित्रतया जन्मनः सपर्यवसानतया च राजा पंचत्वमुपगतः, सामंतमंत्रिभिर्जयकुमारो राज्येऽभिषिक्तः, प्रद्वेषेण पलायमानो विजयश्च राज्यस्थितिरिति कृत्वा राज्यचिंतकैर्बद्धः, तस्य जनन्याः शोको जातः. अन्यदा चास्थानिकामंडपगतस्य राज्ञोऽग्रे समुद्रवीचीव मुक्तानिकरवा-हिनी, वर्षालक्ष्मीरिव समुन्नतपयोधरा, मलयमेखलेव चंदनगंधवाहिनी, वसंतलक्ष्मीरिव रुचिरपत्रति-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लकाभरणा प्रतिहारी समागता, तया च संघटितकमलयुगसंपुटेनेव मस्तकावस्थितेनांजलिना प्र·
णामं कृत्वा राजा विज्ञप्तो हे देवैषा खलु ते जननी केनापि कारणेन देवदर्शनमभिलषंती प्रतिहा·
रभूमौ तिष्ठति. ततः ससंभ्रमं यूयं तिष्ठतेति भणन् राजोत्थितः, द्वारभागं गतः, जननी प्रणता भ·
णिता च हे अंबाहं किं नाहूतः? किं वागमनप्रयोजनं? तत एषा प्ररुदिता, अनेन च भणितं हे
अंब! किंनिमित्तमेतत्? तयोक्तं हे पुत्र सुतस्नेहसंवर्धितशोकानलविकारस्तस्मान्मे पुत्रजीवितं दे·
हि? राज्ञा भणितं हे अंब कुमारस्य कुतो भयं? तया भणितं हे पुत्र प्रजापरिपालनोद्यतानां नर·
पतीनामेषा राज्यस्थितिर्यत्प्रतिपक्षभूतो महता यत्नेन रक्ष्यते, यतः कुमारोऽन्यसामंतप्रतारितः सांप्रतं
मा उपद्रवं करोत्विति राजचिंतकैर्गृहीतः, एतन्मेऽनुमतं, किंच पुनर्यथा तस्य शरीरे कष्टं न भवेत्त·
था त्वया यतितव्यं. राज्ञा भणितं हे अंब मे कुमारः किं प्रतिपक्षभूतोऽस्ति? यद्येवं तर्हि पुनः
स्वपक्षः कः? तस्मात्किमेते नैह्यावामभ्यंतरं प्रविशावः, राजा प्रविष्टः, जनन्या आसनमुपनीतं, एषा
चोपविष्टा, भणितं चानेन भो भो महत्तरा इह कुमारमानयध्वं? कुमारानयननिमित्तं राजपुरुषा
गताः, राज्ञा चिंतितमहो खल्वीदृशमेतद्राज्यं, यस्य कृते महदनाप्रेक्षितकारणांतरमवलंब्य महद्भि·

P.P. Ac. Gunratnasuri M.S.    Jun Gun Aaradhak Trust

रेतदपि व्यवसितं, तस्माद्बंधुजनस्याप्यनिर्वृत्तिकारणेन विविधक्लेशायासमात्रेण परमप्रमादैकहेतुना विपाकदारुणे नैतद्राज्येन किं? अविदितसंसारस्वरूपाणां जीवानामत्रापि बहुमानः, अत एतद्राज्यं विजयकुमाराय ददामि, ततोंबायाः सुतस्नेहसंवर्धितशोकानलविकारमपनयामि.

अत्रांतरे पूर्वकृतकर्मदोषेण राज्ञ उपरि वधपरिणामपरिणतः कुमार आनीतः, राज्ञा दृष्टः, सबहुमानं च सिंहासने स्थापितः, शुद्धोदकभरिताः कनककलशा आनायिताः, एकः कलशो राज्ञा स्वयमेव गृहीतः, अन्ये च कलशाः प्रधानसामंतैर्गृहीताः, कुमारोऽभिषिक्तः, राज्ञा भणितं च भो भो सामंताः! भो भो प्रधानाः! एष भवतां राजा, राज्ञा शेषसामंतैश्च प्रणतिः कृता. ततश्चरणयोः पतित्वांबा पृष्टा हे अंब! किं ते शोकानलोऽपगतः? ततो महापुरुषचरित्रविस्मयाक्षिप्तहृदययांबया भणितं हे जात! कथमेवमपि तु खल्विंधनेऽन्य एव शोकानलस्यापगमो न भवति. राज्ञा भणितमंब! किं पुनरत्र कारणमित्यहं नावगच्छामि, तया भणितं हे पुत्र शृणु? महामिषभूतं खल्वेतद्राज्यमेतद्बहुमानेन च कुणिमगृध्रा मंडला इव परमार्थाप्रेक्षिणः कापुरुषाः सुकृतं न गणयंति, उचितं न जानंति, आयतिं न प्रेक्षंते, विषयविषमोहितमनसः सर्वथा तत्तदाचरंति, येन स्वर्गनिर्वा-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

णगमनसाधनेऽचिंत्यचिंतामणिरत्नभूते मनुजत्वे स्वाधीने सति नरकमेव गछंतीति. महापुरुषश्च त्वमित्यहं कार्यतोऽवगछामि, एष पुनस्ते भ्राता कदाचिदप्येवंविधो न भविष्यतीति. अकल्याणमित्रवांश्च राजा भवति, तस्य खल्वनार्यविषयलोलुपत्वेन कथं नाम वयं प्रिया भविष्यामः? ततो विषयसाधनमेतद्धनमनेनाकार्यं कुर्वंति, अजल्पितव्यं जल्पंति, उभयलोकविरुद्धे प्रवर्तंते, धर्मव्यवसायान्निवर्तंते. ततः स स्वयमपि पापकर्मान्यैः पापकर्मभिश्च प्रवर्तितो यन्नास्ति तन्न सेवते, तस्मात्कथं मे शोकानलोऽपैति? राज्ञा भणितं हे अंब? शंकयालं, खलु कुमारः स्वस्थः, अथवानेन किं? अंबयानुज्ञातः सकलजीवनिर्वृत्तिकारकं श्रमणत्वं प्रपद्ये इति. तया भणितं हे पुत्रालं ते श्रमणत्वेन, प्रजां परिपालय? एतस्यापि च यौवराज्याभिषेकं कुरु? राज्ञा भणितं हे अंब तातप्रसादलालिता इमाः प्रजा धन्याः, आसां परिपालने कुमारश्च नियुक्तः, कृतराज्याभिषेकस्य च यौवराज्याभिषेको विरुद्धः, जिनधर्मबोधेन मे चित्तं संसारचारकाद्विरक्तं, तस्मात्किं बहुना? अंबा मे प्रसादं करोत्वहं श्रमणत्वं प्रपद्ये, इति भणित्वा चरणयोर्निपतितः. तया भणितं हे जात! यत्ते रोचते तत्कुरु? किंत्वहमपि श्रमणत्वं प्रपत्स्ये. राज्ञा भणितं हे अंब प्रकृतिनिर्गुणे संसारे एतद्युक्तं.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अत्र खलु सर्वे निजकाः सपर्यवसानाः, उत्सेधाः पतनांताः, संयोगा वियोगपर्यवसानाः, जीवितं मरणांतं, अकृतसुकृतकर्मणां दारुणो विपाकः, मनुष्यत्वे जिनेंद्रवचनं दुर्लभं, तस्मादंबाया अप्येतत्कृत्यं. विजयकुमारो भणितश्च हे वत्स तातप्रसादलालिताः प्रजाः संति, तस्मात्त्वया तथा चेष्टितव्यं यथैताः केनाप्युपद्रवेण तातं न स्मरंति, कुमारचेष्टितं परित्यक्तव्यं, राजर्षिचरितमवलंबितव्यं, पूर्वपुरुषोपार्जितं यशो न मलिनीकर्तव्यं, किं बहुना? यथेह मानुषत्वं सुलब्धं भवति तथा कर्तव्यमिति. राज्यचिंतकाः सामंताश्च भणिता युष्माभिरपि निजविवेकस्योचितं तातप्रसादस्य सदृशं महाकुलस्यानुरूपं कीर्त्या वृद्धिकारकं प्रजाकुमारयोर्हितमुभयलोकसुखावहं चेष्टितव्यमिति. तत्रेहलोकसापेक्षकैः कैरपि भणितं हे महाराज! भवद्भिरहितानामस्माकं कीदृशौ द्वावपि लोकौ? तथापि यद्देव आज्ञापयति तत्प्रमाणं, अप्रतिहतशासनो देवः, समीहितांतरायकारकाणि वयं के? परलोकमार्गे विशेषतः. ततस्तेषामेतद्वचनमभिनंद्य राजा समुत्थितः, सनत्कुमाराचार्यसमीपे प्रवृत्तः. अत्रांतरे गुरुप्रवृत्तिकथननियुक्तः सिद्धार्थो नाम ब्राह्मणः समागतः, तेन भणितं हे देव ते मनोरथाः संसिद्धाः, इहैव भगवान् सनत्कुमाराचार्य आगतः, तिंदुकोद्याने आवासितः. एतच्च श्रुत्वा राजा हृ-

ष्टः, सप्ताष्टौ वा पादाः समभिगम्य तत्प्रदेशस्थितेन प्रतिलेखितमहीतलेन समुल्लसितरोमांचेन धरणीनिहितजानुकरतलेनानेन भगवान् वंदितः, वंदित्वा भगवद्दर्शनप्रतिपत्त्यै प्रवृत्तः, महत्तरसामंतै र्विज्ञप्तो देवः, देवस्य समीहितं संपन्नं, तस्मादत्रैव प्रशस्ततिथिकरणमुहूर्तयोगे देवः प्रव्रजतु. राज्ञा तत्प्रतिश्रुतं. गुरुसमीपं गतः, इतरैरपि विजयं भणित्वा महादानं दापितं, सर्वजिनायतनेषु पूजा कारिता.

अन्यदा च प्रशस्ते तिथिकरणमुहूर्तयोगे रथवरं समारूढः, राजलोकेन परिवृतः, उद्घोष्यमाणया वरवरिकया, अर्थिमनोरथान् पूरयन्, अहो आश्चर्यमहो उत्तमपुरुषचेष्टितमिति भणद्भिर्नागरिकैरवलोक्यमानः, काकंदीनगर्यनाथा, एष प्रव्रज्याया अकालश्चेति नागरिकाभिर्जल्पंतीभिः कथं कथमपि सदुःखं दृश्यमानः, पुण्याहतूर्यैर्वाद्यमानैः, बंदिवृंदैर्मंगलानि पठद्भिः प्रव्रज्यानिमित्तं राजा नगरीतो निर्गतः, तिंदुकोद्यानं प्राप्तः, सनत्कुमाराचार्यसमीपे जनन्या प्रधानपरिजनेन च सह प्रव्रजितः, कांचिद्वेलां स्थित्वा भगवंतं वंदित्वा बाष्पाकुललोचनाः काकंदीराजनागरिकाः पुरीं प्रविष्टाः. अन्यदा च मासकल्पे समाप्ते भगवांस्ततो विहृतः, जयानगारेण सूत्रमधीतं, ततो निरतीचारं

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

चारित्रमनुपालयतस्तस्य कोऽपि कालोऽतिक्रांतः. इतश्चाहो मयासौ न व्यापादितः प्रव्रजित इति विजयस्य मत्सरो जातः. अनेन च कुतोऽपि कालादस्मै निजप्रत्ययितपुरुषा व्यापादकाः प्रेषिताः, तैश्च किंनिमित्तमनिमित्तं व्यापादनमित्यव्यापाद्य व्यापादित इति विजयाय निवेदितं, खल्वेष परितुष्टः. अन्यदा च कदाचित्कस्यापि मां दृष्ट्वा जिनधर्मप्रतिबोधो भवेदिति गुरुमनुज्ञाप्य कतिपयसुसाधुपरिवृतः स्वजनालोकननिमित्तं काकंदीं चैव नगरीं जयानगार आगतः, केनापि राज्ञे निवेदितं, एष कुपितश्च, ते व्यापादकपुरुषा अनेन शब्दिताः पृष्टाश्चारे कुत्र कथं वा युष्माभिः स श्रमणरूपधारी मे वैरी व्यापादितः? ततस्तैर्जयकुमारागमनं विज्ञाय भणितं हे देव! नंदिवर्धने सन्निवेशे केशालंकारविगमेनास्माभिर्न प्रत्यभिज्ञातः, ततस्तत्रैकः श्रमणकः पृष्टोऽत्र जयोऽनगारः कुत्रास्ति? तेन भणितमत्र नागदेवगृहे य एष ध्यानमुपगत इति. ततः शून्यमेतदुद्यानमिति गत्वास्माभिर्व्यापादितः, राज्ञा भणितमन्यः कोऽपि तपस्वी भवद्भिर्व्यापादितः, स पुनर्महापाप इहागतः, तैर्भणितं वयं न सम्यग्विजानीमः, राज्ञा भणितं किं गतमत्र सांप्रतं व्यापादयत? अमीभिः प्रतिश्रुतं, एष च निजमंदिराद्भगवद्दर्शननिमित्तं निर्गतः, अनेन च भगवान् दृष्टो वंदितश्च, भगवता ध-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मेवाभितः, तस्मै सर्वज्ञभाषितो धर्मः कथितः, तथापि संसारवासान्न विरक्तः, भगवता तस्याभिप्रायो न ज्ञातः, एष भणितश्च हे महाराज! त्वयैतदवगतमेव यथा संसारिकसत्वानां सुखं दुःखं च कर्मपरिणामफलं, सर्वे च सत्वाः सुखमभिलषंति न तु दुःखं, पुनः सुखस्य मूलं धर्मस्तस्य परिणामः सुरूपता प्रियसमागमसुखानि सौभाग्यमारोग्यता विपुला भोगाश्च, तस्मात्सकलसौख्यनिधानभूतं धर्ममवलंबय? सन्मैत्रीमाचर? दानं प्रवर्तय? सर्वसत्वेषु दयां कुरुष्वेति. विजयेन चिंतितमस्य मरणभयं समुत्पन्नमत एवं भणति, तस्मात्कुत्र व्रजनीति चिंतयित्वानेन भणितं हे भगवन् यत्त्वमाज्ञापयसि तत्प्रमाणं, अन्यच्च यत्प्रभृति त्वयायं वीतरागभाषितो धर्मः प्रतिपन्नस्तत्प्रभृत्येव मयायं धर्मः प्रतिपन्नः, भगवता भणितं त्वया शोभनं कृतं, ततः कांचिद्वेलां पर्युपास्य स नगरीं प्रविष्टः, अनेन चिंतितं चाद्यैव तं दुराचारं व्यापादयामि, प्रशांतस्यापि भगवत उपसर्गकरणं पूर्वकृतक्लिष्टकर्मपरिणतिरेवात्र विजयस्य कारणं, भणितं च—

अइसंकिलिठकम्मा—णुवेयणे जो उ होइ परिणामो ॥ सो संकिलिट्ठकम्मस्स । कारणं जमिह पाएणं ॥ १ ॥ रजनी समागता, राज्ञा पूर्वप्रेषिता व्यापादकपुरुषाश्च भणिता अरेऽद्य तं दु-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राचारं व्यापादयामः, इत्यमीभिः प्रतिश्रुतं, मृगांकोऽस्तमितः, कतिपयपुरुषपरिवृतो विजयो जयान-
गारसमीपं गतः, अनेन च निर्वातस्थानस्थप्रदीपवत्सद्ध्यानसंगतो भगवान् दृष्टः, तीव्रानुभावकषायो-
दयेन तेन खड्गं कर्षितं, कषायैरधिकतरं गृहीतः, सुकृतवासनापगता, महामोहः प्रवृत्तः, तीव्रकर्मपरि-
णत्या प्रक्षिप्तः, प्रवर्धमानकोपानलेन विजयेन शिरोधरायां प्रहतः, एकप्रहारेणैवोत्तमांगं पातितं,
विजयकुमारश्चैवैषः, अहो जीवचरित्राणां विचित्रता, कर्मणो गतिरचिंत्येति चिंतयित्वा साधवोऽप-
गताः, भगवांश्च पुनराशयस्य गंभीरतया मैत्र्या विशुद्धतया ध्यानस्याचलिततया शरीरे निर्ममत्व-
तया जिनवचनस्य भाविततया पापकर्मणः क्षीणतया लेश्याभावस्य विशुद्धतया संयमधृतेः स्थिरत-
या परमपदस्यासन्नतयाऽप्रतिपतितशुभपरिणामो देहं त्यक्त्वाऽऽनताभिधाने देवलोके श्रीप्रभे विमा-
नेऽष्टादशसागरोपमायुर्वैमानिकः सुरः समुत्पन्न इति. इतरोऽपि च विजयनरपतिस्तत्प्रभृति महता पा-
पोदयेन समुत्पन्नमहाव्याधिवेदनो जयो व्यापादित इत्येतावन्मात्रेणात्मानं कृतार्थं मन्यमानो यथा-
युः पालयित्वा दुःखमृत्युना मृतः सन् पंकप्रभायां पृथिव्यां दशसागरोपमायुर्महाघोरनारक उत्पन्नः.

इति श्रीमद्बृहत्खरतरगच्छाधीश्वरश्रीजिनसौख्यसूरिशिष्यश्रीजिनभक्तिसूरिशिष्यश्रीजिनलाभ-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

३६७ ३६८

सूरितत्सतीर्थ्यश्रीप्रीतिसागरगणिशिष्यवाचनाचार्यसंविग्नपक्षीयश्रीमदमृतधर्मगणिशिष्यपाठकश्रीक्षमा· कल्याणगणिविनिर्मिते प्राक्सुमतिवर्धनमुनिसंस्कृतमयसमरादित्यचरित्रे जयविजयद्विभ्रातृप्रबंधरूपः पंचमो भवः समाप्तः. ॥ इति श्रीसमरादित्यचरित्रस्य प्रथमो भागः समाप्तः. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादन्नदाधरितदिव्यसुधासमूहं ॥
संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥
वंदे मम गुरुं तं च । चारित्रविजयाह्वयं ॥ परोपकारिणां धुर्यं । चित्रं चारित्रमाश्रितं ॥ २ ॥ युग्मं.

चारित्रपूर्वा विजयाभिधाना । मुनीश्वराः सूरिवरस्य शिष्याः ।
आनंदपूर्वविजयाभिधस्य । जातास्तपागच्छसुनेतुरेते ॥ १ ॥

---

आ ग्रंथ श्रीजामनगरनिवासी पंन्डित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे.

શ્રી મોહનલાલજી
જૈન જ્ઞાન ભંડાર
ગોપીપુરા, સુરત.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

१९५८
२३५५

॥ इति श्रीसमरादित्यचरित्रे प्रथमो भागः समाप्तः ॥

શ્રી
જૈન જ્ઞાન ભંડાર
ગોપીપુરા, સુરત.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust